Digitized by Arya Samaj Foundation Chennai and eGangotri

BHARTI
1981 G. K. U.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Samaj Foundation Chennai

BHARTI

Domain. Gurukul Kangri Colle

113528

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ारती

संस्कृत-मासपत्रिकायाः

COMPILED

श्री बद्रीनाथः

पुस्तकालय गुरुकुल काँगड़ी

जगन्नाथः

ी द्वारका

र्षम् ३१

षः

ङ्कः ३

जनवरीः,

१९९१

रामेश्वरः

ज्ञानस्य सन्मार्गं
लोकानुपदिदेश यः ।
विवेकानन्दः श्री-
स्वामी सर्वैः प्रणम्यताम् ॥
—श्रीरामगोपालशास्त्री

वार्षिकमूल्यम् पञ्चदशमुद्राः १५.००
एकप्रतेः-सार्धैकं रूप्यकम् १.००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आन्ध्र-उत्तरप्रदेश-बिहार-पञ्चनद-सर्वकारैः स्वीकृता

विषय-सूची

क्र.सं	विषयाः	निबन्धारः	पृष्ठ-संख्या
१.	मङ्गलम्	श्रीरामगोपालशास्त्री, जयपुरम्	६१
२.	मासावतरणम्	" " "	६१
३	दार्शनिकम्	श्रीचन्द्रशेखर सारस्वतः, जयपुरम्	६२
४.	नीति-पञ्चाशिका	श्रीरामगोपालशास्त्री, जयपुरम्	६६
५.	सम्पादकीयम्	प्रधानसम्पादकः	६६
६.	आयुर्वेद-स्तम्भः—	वी० बी० नटराज शास्त्री, त्रिचिरापल्ली	१०३
७.	पुस्तक समालोचनाः	प्रधानसम्पादकः	१०६
८.	कंबलवन्तं न बाधते शीतम्	श्रीकलानाथशास्त्री, जयपुरम्	१०७
९.	विश्व-वार्ता	श्रीविश्वदर्शी	१०८
१०.	देशवार्ता –	श्रीपद्मशास्त्री जयपुरम्	११०
११.	नारी-स्तम्भः	श्रीमती राजेश्वरीभट्ट, जयपुरम्	११२
१२.	संस्कृतव्याकरणप्रवेशिका	श्रीविश्वनाथमिश्रः, बीकानेरः	११४
१३.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, जयपुरम्	११८
१४.	सूक्ति-सुधा	डा० श्रीगङ्गाधरभट्टः, जयपुरम्	१२३
१५.	यतमानो दिने दिने	श्रीरामस्वरूपशास्त्रीः, बम्बई-८६	१२३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानसंरक्षकाः—
जगद्गुरुशङ्कराचार्य-
स्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः
कांचीकामकोटिपीठाधिपतयः

संस्थापकः
स्व. श्री उमाकान्तकेशव आप्टे
(बाबा साहब आप्टे)
प्रधान सम्पादकः
जगदीशशर्मा
साहित्याचार्यः
सम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
सहसम्पादकः
रामगोपालशास्त्री जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

संरक्षकः
श्रीदेवीशङ्करतिवाड़ी
जयपुरम्
प्रबन्ध-सम्पादकः
श्रीगिरिराजशर्मा
भारती-भवनम्
बी १५, न्यू कालोनी
जयपुरम्—१
(राजस्थानम्)

वर्षम् ३१ | पौषः, विक्रमाब्दः, २०३७ [जनवरी, १९८१] | अङ्कः ३

मङ्गलम्

"वासांसि देहि सुकृतज्ञ ! दयस्व शीघ्रं
संव्रीडिताभ्य इह पाथसि वेपिताभ्यः ।"
एवं विनम्र-वचनाभिरुपास्यमानौ
श्रीमन्मुकुन्द-चरणौ शरणं प्रपद्ये ।।

मासावतरणम्

दिव्यं पतङ्ग[1] गमयन्नुदीचीं कुर्वन् पतङ्गैः[2] खमनेकवर्णम् ।
संमोदयन् मोदक-भोजनैश्च लोके समागच्छति **पौषमासः** ।

—श्रीरामगोपालशास्त्री, जयपुरम्

१—सूर्यम् । २—कर्गल-निर्मितैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

113528

Digitized by Arya Samaj Foundation Chennai and eGangotri

113528

दार्शनिकम्

श्रीचन्द्रशेखर सारस्वतः

श्री दिगम्बर जैन संस्कृत महाविद्यालयः, जयपुरम्

जिज्ञासनं मानवस्य सहजप्रवृत्तिः, चिन्तनं तस्य प्रकृतिः। तथा च जिज्ञासाचिन्तनयोः मनोरमसंयोगस्य परिणामोऽस्ति—दर्शनम्। मानुषं जीवनं पशुजीवनवत् नैव निरुद्देश्यं नापि प्रकृत्याः दृष्टादृष्टप्रभावैः अप्रभावितमेव। मानवः जीवनस्य प्रत्येकं क्रियाकलापं कार्यंकारणबुद्धौ संयोज्य निष्कर्षरूपे सैद्धान्तिकव्यावहारिकमान्यताः निश्चिनोति। अयमेव दर्शनस्य उत्सः। इतः एव उद्भवति दर्शनस्य पुण्यसलिला, या विचाराणां, रुचीनां- दृष्टिकोणानाञ्च भिन्नभिन्नान् मार्गान् संप्राप्य विविधधारासु प्रवहति। मानवमनीषया अन्विष्टानि अन्तरङ्गाणि बहिरङ्गाणि च जागतिकरहस्याणि तथा च तेषां सूक्ष्मरहस्याणां ज्ञानप्रणाल्याः क्रमबद्धं विवेचनं कथ्यते दर्शनशास्त्रम्। शास्त्रमिदं जीवनस्य जगतश्चावबोधस्य विद्या तथा च जीवनमूल्यानां निर्धारणस्य विज्ञानमस्ति। रहस्यान्वेषणं विज्ञानमपि करोति दर्शनमपि च। परमुभयोः दिशाः लक्ष्याणि च भिन्नानि सन्ति। विज्ञानं मानवाय पार्थिवसमृद्धिं प्रयच्छति, दर्शनञ्च तस्मै आध्यात्मिकं धनम्। पूर्वं जीवनं सुरक्षति अपरञ्च तत्र रमणीयतां विदधाति। जीवनयात्रायाः साधनेभ्यः विज्ञानस्योपयोगिता वर्तते तथा च तस्मै दिशानिर्देशाय दर्शनमावश्यकम्।

दर्शनं मानवजीवनेन सहानुस्यूतं वर्तते। गभीरविचारेण स्फुटति यत् मानवः आजन्मदार्शनिको भवति। प्रतिजनं दर्शनं धारयति। तस्य जीवनस्य एका निश्चिता दिशा वर्तते। तस्य कार्यप्रणाल्याः एकः सुचिन्तिताधारः प्रकारश्चास्ति। प्रत्येकं मानवः कतिपयश्रद्धानां विचाराणां कल्पनानाञ्च पुञ्जमात्रमस्ति। अतोऽयं स्पष्टतामेति यत् प्रत्येकं जनः जन्मनैव दार्शनिको भवति। किन्तु समुचितसंस्काराभावेन सर्वमानवानां दर्शनानि न विकसन्ति। यत्र दर्शनबीजायोर्वरभूमिः समृद्धखाद्यं संस्कारजलञ्चोपलभ्यन्ते तत्रैव तत् प्ररूढ्वा पुष्पितं फलितञ्च भवति।

दर्शनशब्दस्य यौगिकार्थो वर्तते दृश्यते अनेन इति दर्शनम्—दर्शनस्य साधनम्। ईक्षणस्य सम्बन्धो वस्तुतस्तु चक्षुषा वर्तते, स्थूलजगदेव द्रष्टुमर्हति। अतः दर्शनशास्त्रस्य सन्दर्भे ज्ञानमपि चक्षुत्वेनैव बुध्यते येन सूक्ष्मतमानां दूरतमानामपि पदार्थानां साक्षात्कारः क्रियते। एवंहि दर्शनं सूक्ष्मस्थूलजगतः वीक्षणस्य साधनमपि च वस्तुतः यथार्थस्वरूपावबोधस्य माध्यमं वर्तते। वस्तुतस्तु दर्शनं तत्त्वज्ञानं तस्य साधनमित्युभयमेवास्ति।

भारते वर्षे दार्शनिकचिन्तनस्य परम्पराः अति प्राचीनाः समृद्धाश्च सन्ति। अस्माकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शनेतिहासः ऋग्वेदादेव प्रारभ्यते। पुरुष-नासदीयप्रजापतिसूक्तानि दार्शनिकगभीरताभिराप्लावितानि सन्ति। ब्रह्ममायात्मासृष्टिमोक्षादिप्रमेयानां विवेचनमुपनिषत्सु साङ्गोपाङ्गं बभूव। उपनिषदामनन्तरं तु वेदानुयायिनां वेदवाह्यानाञ्च दर्शनानामाप्लाव एव समागतः।

मीमांसावेदान्तन्यायवैशेषिकसांख्ययोगजैनबौद्धानि—प्रसिद्धभारतीयदर्शनानि सन्ति। एषु पूर्वस्थानि "षड्दर्शन" नाम्ना अभिज्ञायन्ते। "नास्तिको वेदनिन्दकः" इति मनुवचनं मत्वा जैनबौद्धचार्वाकदर्शनानि वेदप्रमाणास्वीकरणात् नास्तिकत्वेन मन्यन्ते। किन्तु परलोकेऽविश्वासात् चार्वाकदर्शनमेव नास्तिकतां भजते। उक्तदर्शनानां विपुलं व्यवस्थितञ्च वाङ्मयं विद्यते। भारतीयदर्शनानां अनिरुद्ध-परम्परया विपुलसाहित्येन पारस्परिक समन्वयेन चाद्य विश्वस्य निखिलान्यपि दर्शनानि एकीभूयापि तस्य तुलां नाधिरोहन्ति। एतादृशस्य भारतीयदर्शनस्य काश्चन असाधारणताः एवमवबोद्धुं शक्यन्ते।

आध्यात्मिकता

भारतीयदर्शनस्योदयः मुख्यतः आध्यात्मिक जिज्ञासायामेव बभूव। पाश्चात्यदर्शनवदिदम् आश्चर्याणां कौतुकमयोघटनानां वा व्याख्यातृ बौद्धिकं व्यायाममात्रं नास्ति। इदं दर्शनं ध्रुवचेतनसत्तात्मापरमात्म-पुनर्जन्म-कर्म-मोक्ष सदृशाध्यात्मिकप्रमेयाणां सुदृढभूमौ तिष्ठति। चार्वाकदर्शनमन्तरा अन्यानि प्रायेण सर्वाणि भारतीयदर्शनानि संसारं दुःखात्मकं मन्यमानानि शाश्वतसुखगवेषणसदृशाध्यात्मिकसमस्यया सह युध्यन्ते। इयमास्माकीणदर्शनस्य मूला विशेषतास्ति।

धर्ममूलकता

अन्यद्देशीयदर्शनानां धर्मेणासम्बन्धः दृश्यते, किन्तु भारते अनयो सुन्दरं समन्वयं वर्तते। दर्शनेन सुचिन्तितेषु आध्यात्मिकतत्त्वेष्वेव भारतीयधर्मस्य प्रतिष्ठा वर्तते। अत्र दर्शनं विचारः धर्मश्चाचारः। आचारविचारयोरैक्यं भारतीयजीवनस्य मूलमन्त्रम्। अत्रत्यधर्मदर्शनयोः लक्ष्ये नास्ति मतभेदः। उभावेव मानवं दुःखमुक्तं कारयितुं कृतकार्ये। अत्र दर्शनं विना धर्मः धर्मं विना च दर्शनं विकलं विद्यते। अस्मादेवकारणात् यथा वैदिकधर्मेण सह वैदिकदर्शनानि सन्ति तथैव जैनबौद्धधर्मयोः सह आर्हतसौगतदर्शने स्तः।

स्वतन्त्रविवेचनम्

अस्मदीयदर्शनानां स्वतन्त्रविवेचनात्मकता एकापरा महती विशेषतास्ति। तेषु कुत्रापि तर्कासहानाम् अस्वाभाविकराद्धान्तानां निर्धारणं समर्थनं वा नैव मिलति। तत्त्वविवेचनाय प्रत्येकं दर्शनस्य समीपे स्वकीया स्वतन्त्रा सुव्यवस्थिता विचारप्रणाली प्रमाणमीमांसा च अस्ति। स्वस्वविमर्शप्रणाल्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तानि इतरेतरयोः आभ्यन्तरिकं सत्वं निरीक्षन्ते तथा तार्किकविश्लेषणेन सिद्धान्तान् परीक्षन्ते। तर्कसिद्धदार्शनिकसिद्धान्तः यदि-कस्यापि नाम स्यात् भारतीयदर्शनेषु समाद्रियते। अनेनैव भारतीयवाङ्मये प्रायेण सर्वाणि एव प्रमुखशास्त्राणि स्वकीयं नैजं दर्शनं दधति।

आयुर्वेदसदृशस्य प्रायोगिकस्य व्यावहारिकविज्ञानस्यापि स्वायत्तदर्शनमस्ति रसेश्वरदर्शनम्। इह सहिष्णुतापूर्वकं परेषां सत्तां स्वीकृत्य तेभ्यः समुचितसम्मानप्रदानमिति भारतीयादर्शः लोकवत् दर्शनेऽपि अक्षुण्णः दृश्यते।

व्यावहारिकदृष्टिकोणः

दर्शनविषयकप्रवादोऽयं बहुधा श्रूयते यद् शास्त्रमिदं बुद्धेः व्यायामः कल्पनालोकसमाश्रितं वाचां विजृम्भणमात्रमास्ते। किन्तु अस्मद्दर्शनानां स्थितिरस्मात् वैपरीत्यमेति। प्रत्येकं भारतीयदर्शनस्य रमणीयव्यावहारिकपक्षोऽपि वर्तते। किमु यावत् सांख्ययोग जैनदर्शनानान्तूत्पत्तिरपि लोकव्यवहारादेवा॰स्ति। आचाराद्भिन्नं किमपि भारतीयदर्शनं नावतिष्ठते। मीमांसावेदान्तन्यायसदृशानि शास्त्रीयदर्शनान्यपि आचारव्यवहारेभ्य अस्पृष्टानि नैव वर्तन्ते।

इहत्यदर्शनानामयं प्रबलविश्वासो वर्तते यद् आचाराद् विना ज्ञानं नावतिष्ठते। केवलक्रियापि ऋते ज्ञानाद् निष्फला। अस्मादेव हेतोः भारते योगसदृशस्य प्रायोगिकदर्शनस्योभवविकासौ भूतौ।

मोक्षवादः

"दुःखादुद्विजते लोकः सर्वस्य सुखमीप्सितम्" किन्तु किन्नाम सुखं ? कथञ्च तत् प्राप्यते ? इति जिज्ञासायामेवेहत्य दर्शनस्य उद्भूतिः।

दुःखत्रयाभिघाताज्जिज्ञासा
तदपघातके हेतौ।
दृष्टे सापार्था चेन्ने—
कान्तात्यन्तोऽभावात्॥

इति ईश्वरकृष्णस्योक्तिः भारतीयदर्शनानां पथनिर्दशिका। किं नाम जगत् ? कीदृशं तत् ? कथं सृष्टं तत् ? इति प्रश्नेषु दार्शनिकनिकाये स्यान्नाम वैमत्यं किन्तु तद्दुःखरूपदुःखमूलञ्चेत्यत्र समेषामैकमत्यमस्ति। संसारात् मोक्षःएव दुःखहानेः निदानमिति भारतीयदर्शनानां डिण्डिमनादः। मुक्तौ कीदृशः आनन्दः ? मुक्तस्य कुत्र कीदृशी च स्थितिः ? इति विषयेषु दार्शनिकविवादा समभवन्,, परं "मोक्षः एव परमपुरुषार्थः" अस्माकं भवितव्यः इत्यत्र सर्वे सम्मताः। पुष्पदन्तस्योक्तिरियं सर्वं स्पष्टयितुं सक्षमा—

रुचीनां वैचित्र्याद् ऋजुकुटिल
नानापथजुषाम्,
नृणामेको गम्यस्त्वमसि
पयसामर्णव इव॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्यत्वे प्राच्यविद्यानां मान्यतां प्रति तु जना बद्धादराः दृश्यन्ते, किन्तु कस्यापि चमत्कारिकपरिणामस्य अचिरादेवालाभात् तेषां धैर्यं च्यवते । दर्शनमपि तास्वेव प्राच्यविद्यासु गण्यते । अतोऽधुनातनपरिप्रेक्ष्ये भारतीयदर्शनानामपि प्रभावकारिरूपेण उपस्थापनम् अनिवार्यं संजातम् । दार्शनिकानां कृते हर्षाय इदं यत् जनाः भारतीयदर्शनं चिन्तनं चावबोद्धुं तेषां देहलीः आश्रयन्ते । सम्प्रति भारतीयदार्शनिकैरेतद् भाव्यं यत् ते शास्त्रीयप्रमेयाणां खण्डनमण्डनात्मिकां शैलीं विरमय्य तुलनात्मकदृष्टिकोणं स्वीकृत्य आस्माकदर्शनपरम्परायाः लोकोपयोगितां साधयेयुः । येन लोकस्य, दर्शनस्य, दार्शनिकस्य चेति त्रयाणामेवोपकाराः भवेयुः ।

जगद्गुरु भारत की मान्यता

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम ॥

योगिराज श्रीकृष्ण

शुभकामनाओं सहित

श्री बजरंग दाल एवं तेल मिल

गोवर्धनपुरा, कोटा (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। श्रीसर्वेश्वरो जयति ।।

दधीचि वंशोद्भव–जयपुर निवासी–कवि पण्डित–गोपीनाथ विरचिता

नीति-पञ्चाशिका

(पूर्वतोऽनुवृत्ता)

सम्पादकोऽनुवादकश्च —
श्रीरामगोपालशास्त्री, जयपुरम्

न चित्तवृत्ति र्महतां कदापि
वैकृत्वमाप्नोति, महेश्वरस्य ।।
वामाङ्कसंस्थाऽपि गिरीन्द्र-कन्या
मनोज-खिन्नं न मनः करोति ।। २७ ।।

नेति । महतां चित्तवृत्तिः कदाऽपि वैकृत्यं नाऽऽप्नोति । वामाङ्कसंस्थाऽपि गिरीन्द्र-कन्या महेश्वरमनो मनोजखिन्नं न करोति । उपजातिवृत्तम् ।। २७ ।।

भावार्थः—महापुरुषों की चित्तवृत्ति कभी भी विकार को प्राप्त नहीं होती। वाम अङ्क में संस्थित होती हुई भी पार्वती परमेश्वर शिव के मन को मनोज (काम-विकार) से खिन्न नहीं करती ।। २७ ।।

भुक्तं यथा वस्तु तनोति शोभा–
मभुक्तमेतन्न तथा विभाति ।।
पत्योपभुक्ता रमणी सखीना–
मानन्ददा स्यान्न तथाऽस्त्यभुक्ता ।। २८ ।।

भुक्तमिति । [1]भुक्तं वस्तु यथा शोभां तनोति, एतत् अभुक्तं सत्तथा न विभाति । पत्या उपभुक्ता रमणी यथा सखीनामानन्ददा स्यात् तथाऽभुक्ता आनन्ददा नास्ति । उपजातिर्वृत्तम् ।। २८ ।।

भावार्थः—पालित (रक्षित) अथवा सद् उपयोग में लाई गई वस्तु जिस प्रकार शोभा का विस्तार करती है, अर्थात् शोभित होती है, उस प्रकार अभुक्त (अरक्षित

१. भुज पालनाभ्यवहारयोः (रु. प. अ.) + क्त (निष्ठा ३।२।१०२) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा काम में न ली गई) वस्तु शोभित नहीं होती। पति के द्वारा उपभुक्ता रमणी जिस प्रकार सखियों को आनन्द देने वाली है, उस प्रकार अनुपभुक्ता वह आनन्ददायिनी नहीं होती ॥ २८ ॥

विनिह्नुतार्थं वचनं व्यनक्ति
भावं तथा नोक्तिरगूढतत्त्वा ॥
मुखं वधूनामतिसूक्ष्मवासो-
वृतं यथाऽऽनन्दकरं न चाऽन्यत् ॥ २९ ॥

वीति। यथा विनिह्नुतोऽर्थो यस्मिन् तद् वचनं भावं व्यनक्ति, तथा गूढतत्त्वा उक्तिः भावं न व्यनक्ति। वधूनां मुखमतिसूक्ष्मवासोवृतं सद् यथाऽऽनन्दकरं तथाऽन्यत् न। उपजातिर्वृत्तम ॥ २९ ॥

भावार्थः—जिसमें अर्थ निगूढ है, वह वचन जिस प्रकार भाव को अभिव्यक्त करता है, उस प्रकार अगूढ तत्त्व वाली उक्ति भावाभिव्यक्ति नहीं करती। वधुओं का मुख सूक्ष्मवस्त्र से आवृत होता हुआ जितना आनन्दकर होता है, उतना अन्य नहीं होता ॥२९॥

गुणैकभावैर्मनुजैर्न भूयते
परस्य दोषेक्षणदत्तमानसैः ॥
विधौ कलानन्दभुजोऽङ्कदर्शनं
न कुर्वते कामिजनाः कदापि हि ॥ ३० ॥

गुणैकेति। गुणे एको भावो येषां ते, तैर्मनुजैः परस्य दोषेक्षणदत्तमानसै र्न भूयते। विधौ चन्द्रे कलानन्दभुजः कामिजनाः, हीति निश्चयेन, अङ्कदर्शनं कदापि न कुर्वते। वंशस्थं वृत्तम् ॥ ३० ॥

भावार्थः—एक मात्र गुण में भाव रखने वाले (गुणग्राही) मनुष्य दूसरे के दोष-दर्शन में दत्तचित्त नहीं होते। चन्द्रमा में उसकी कलाओं से आनन्द प्राप्त करने वाले कामी जन, उसके कलङ्क का दर्शन कभी नहीं करते—यह निश्चित है ॥ ३० ॥

नरस्समर्थोऽप्यसहायवांश्चे-
न्न कार्यकाले विजयं समैति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसून-चापो विभुतामितोऽपि
वधूकटाक्षाश्रयणाज्जयीह ।। ३१ ।।

नर इति। समर्थोऽपि नरोऽसहायवांश्चेद्भवेत् तर्हि काले विजयं न समैति[1]। विभुतामितो ऽपि प्रसूनचापः कन्दर्पो वधूकटाक्षाश्रयणादिह जयी। उपेन्द्रवज्रावृत्तम् ।।३१।।

भावार्थः—सब प्रकार से समर्थ होता हुआ भी मनुष्य यदि असहाय है-अर्थात् उसका अन्य कोई सहायक नहीं है तो अवसर आने पर वह विजय को नहीं प्राप्त होता। विभुता को प्राप्त हुआ भी पुष्पधन्वा कामदेव वधूजन के कटाक्षों का आश्रय लेने से ही यहां विजयो होता है।। ३१ ।।

विशिष्टलोका दधते विभूतिं
परार्थमेवेति विचारणीयम् ।।
पयोनिधी रत्नगणान् परार्थं
धत्ते न च स्वाभरणक्रियायै ।। ३२ ।।

विशिष्टेति। विशिष्टलोकाः परार्थमेव विभूतिं[2] दधते। इति विचारणीयम्। पयोनिधिः परार्थं रत्नगणान् धत्ते। च पुनः स्वाभरणक्रियायै न। उपजातिर्वृत्तम् ।। ३२ ।।

भावार्थः—विशिष्ट पुरुष परोपकार के लिये ही ऐश्वर्य (सम्पन्नता) को धारण करते हैं—यह विचारना चाहिये। समुद्र दूसरों के लिये ही अनेक रत्न धारण करता है, अपने आभरण (शृंगार) के लिये नहीं।। ३२ ।।

(क्रमशः)

१. सम् + आ + एति । २ विभूतिर्भूतिरैश्वर्यम् इत्यमरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सृष्टेरारम्भतः कतिकृत्वो न गणतंत्राणि समुद्भूतानि, कति वा न विलुप्तानि । सर्वोऽयं कालकृतो विपर्यासः । अत एवासौ भणितिः प्रबोधयति सर्वमेतत्—

कालो हि कारणं राज्ञो
न राजा कालकारणम् ।

इत्यादिनात्मनः कालरूपत्वमेव प्रकटितवान् । जनिमन्तः सर्वेऽपि भावाः कालपारतन्त्र्यात् स्थितिमेवंविधामाप्नुवन्ति परं साम्प्रतिकगणतन्त्रदिवसारम्भायोजनेदृशासन्नसहस्राब्दीपारतन्त्र्यपाशशृङ्खलीभूतमखण्डं भारतं वर्षं शकलीकृत्यापि 'सर्वनाशो हि दुस्तरः' इति नीतिमवलम्बमानैरस्माकं नेतृगणैर्यत्किमपि समाचरितं तदस्माकं भारतीयानां मोदायैव । तादृङ्नीतेरनाश्रयणे किमस्माभिरद्यतनो वासरः सोल्लासं मानयितव्यः स्यात् ? दिवसेऽस्मिन् राष्ट्रध्वजं दोधूयमाना वावन्द्यमानाः राष्ट्रगीतं जेगीयमानाश्च प्रतिजनपदं प्रतिनगरं प्रतिग्रामं समवेताः सन्तो-वयं मोमुद्यामहे । यद्यपि १९४७ तमे ख्रिष्टाब्देऽगस्तमासस्य पञ्चदशदिनांके विभक्तमपि भारतं वर्षमविभक्तमिव सडिण्डिमघोषं स्वतंत्रं घोषितं परं स्वतन्त्रराष्ट्रार्थमपेक्षितं संविधानजातं शासनसूत्रादिकं न निश्चितप्रायमिति तच्छ्वरूपनिष्पत्तिसमनन्तरमेवैतत्षड्विंशदिनांके १९५० तमे ईशवीये वर्षे सर्वप्रभुत्वसम्पन्न-गणतन्त्रात्मक-राष्ट्रतया परिणतम् । अतएव दिवसोऽयमस्माकं सर्वेषां भारतीयानां गौरवास्पदमस्ति ।

वर्तमानेऽस्मिन्ननेहसि केवलं भारतस्यैव न अपि तु सर्वस्यापि विश्वस्य विषमा परिस्थितिः । केचन देशाः सुपक्वा इन्द्रवारुण्य इव बहिरेव मनोहराः अन्तःकाटवपूर्णाः, मणिधरा भुजंगा इव विषधराः, परस्परमीर्ष्यन्ति, द्रुह्यन्ति, मधुरमधुरं भाषमाणा अप्यसूयन्ति । स्पर्धमानाश्चाहमहमिकयाऽऽयोधनायास्त्रनिर्माणाय च दरीदृश्यन्ते विषमायामस्यां परिस्थितौ सर्वोऽपि जनसमुदायो नितरामहर्निशं क्लिश्यन् नानन्दमनुभवति सुखंशान्ति च न लभते । गणतन्त्रराष्ट्रे हि मताधिकारप्रयुक्ते केनापि नेत्रावश्यं भाव्यम् । स च राष्ट्रपतिपदवाच्यो भवेत् राजपदवाच्यो वा । उभयेऽपि सचिवायत्तसिद्धयो भवन्ति गणतन्त्रे । सचिवश्च नेतृगुणसम्पन्नः स्यात् । तदैव राष्ट्रं सञ्चालयितुं सुराष्ट्रमापादयितुञ्च शक्तः । इतरथावृत्तिश्च स एव राष्ट्रमन्यथयितुं प्रभवेत् । अस्माकं राष्ट्रे दलीयं शासनं बद्धमलमिवाभाति । किन्तु दलान्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राणि तत्रासहयोगभावनाप्रेरितानि स्वीयमेव कार्यंजातं विचारयन्ति दृश्यन्ते। समाजे व्याप्तां महर्घतां भ्रष्टाचारमनाचारं दुर्व्यवहारं बलात्कारं शोषणं प्रति तेषां विरोधो वाग्रूप एव। एवमेव गणराज्ये जनतायाः सुरक्षार्थं संस्थापितस्य बहुव्ययायत्तस्यारक्षिविभागस्य कार्यमपि विपरीतमेव सर्वत्र लोलुक्यते। यदि वृतिरेव क्षेत्रं विनाशयेत् रक्षक एव च भक्षकः स्यात्तर्हि सर्वमपि व्यस्ततामाप्नुवद् विनश्येत। समाप्तप्रायेऽवधौ निर्वाचनार्थं नेतारो धावन्तः प्रतिगृहमवलोक्यन्ते, जनसमक्षञ्च तद्दुःखदूरीकरणार्थं कानि प्रतिश्रवणानि न विदधति, फलपुष्पसमृद्धिपूर्णान्युद्यानानि चालोकयन्ति, सर्वाः सुविधाः प्रतिजानन्ति परं जाते च निर्वाचने सर्वमपि प्रतिज्ञातमप्रतिज्ञातमिव सर्वथा विस्मरन्ति। जनसमुदायान्तर्गतोऽस्मास्वेवान्यतमो व्यापारिवर्गोऽप्यात्मानं न चेतयते, अपितु स्वबान्धवान् महामूल्यैर्वस्तूनि विक्रयन् सततं क्लेशयत्येव। स्वकीयां लोलुपतामपरित्यजन् स्वातिरिक्तान् सर्वानपि दुःखाकुर्वन्, भोगविलासादिभिः केवलमात्मानं सुखाकरोति, किमेतन्न्याय्यम्? सुखस्वप्नं विचिन्तयन्ती जनता कार्यालयेषु निजकृत्यसाधनाय तत्रत्यकार्यकारिणां मुखमालोकयन्ती तदीयानीतिमवलोक्य भर्त्सनां च तत्कृतामधिगम्य विवशा भूत्वोत्कोचाय स्पृह्यतः कार्यसिद्धये सत्करोत्येव। दधिघृतपयसां कुल्या स्वतन्त्रे भारतेऽवश्यमेव वृद्धिमेष्यति न्यायश्चापि सुलभो भविष्यति, कोऽपि दीनतां दुःखं वा न लप्स्यते—इत्यादीनि महात्मनो वचनानि स्मारं स्मारं ततो वैपरीत्यभाञ्जि च सर्वाणि कार्याणि दर्शं दर्शं, न्यायस्य कृते आक्रोशन्ती जनता पुनरपि प्रार्थयते शासकवर्गं, यत् प्रातिस्विकरूपेण भवना कार्यन्यायपालिकयोः संस्थापनं क्रियेत चेत्तदैव न्यायो न्याय्योऽन्यथा तु राजनीतिप्रभावितया न केनापि न्यायं कर्तुं शक्यते। सुदृढतया स्थिरीभूतायां न्यायपालिकायां शासकवर्ग एव न, प्रत्युत नेतृगणोऽपि यत्र तत्र निरंकुशतया प्रबलतया च यत्किमपि कर्तुमीहेत न। यदि राजनीतिनिपुणानां हस्तक्षेपो न्यायपालिकायां प्रसज्येत का गतिः स्याद् गणतन्त्रस्येति नास्ति कल्पनातीतम्।

'अनायका विनश्यन्ति नश्यन्ति वहुनायकाः'—एवंविधतया दलानि यदि स्वकीयं रागं भिन्नं भिन्नमेव भास्यन्ति (अपनी-अपनी ढफली अपना-अपना राग) तदा न कस्याप्यभीष्टसिद्धिर्यदर्थं च स्वतन्त्रं जातं भारतं तदपि गतप्रायमेव स्यादिति राष्ट्रस्य हिताय क्षेमाय च सर्वैरेवास्माभिर्विरोधिभिरविरोधिभिश्च सम्भूय यौधिष्ठिरीनीतिरेवावलम्बनीया। तदालम्बनेन देशस्य सुरक्षा स्यात् सा च नीतिर्यथा पाण्डवानां हिताय जाता समये समये धार्तराष्ट्राणामपि तथैवोभयेषामपि हिताय स्यादेवेत्यस्माकं विचारणा। नीतिरियं शिक्षयत्यस्मान् यदस्माकं राष्ट्रेण सहान्येषां राष्ट्राणां विरोधे जातेऽ- 'न्यैः', सह विरोधे तु वयं पञ्चोत्तरं शतमित्ये-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्न विस्मरणीयम् । शासकदलेन क्रियमाणे चाकार्येऽस्माभिः सह विरोधे तु वयं पञ्चशतंच ते—इत्येतं मार्गमुररीकृत्य स्पष्टं विरोधः-करणीय एव। न तत्र विभीषिकाश्रयणं समीचीनं स्यात् । शासनसूत्रेण समुचितः पन्थाः कश्चनाश्रीयते तत्र प्रतिपक्षिभिर्विरोधभावनया न तदपघाताय यतितव्यम् प्रत्युत तस्य समर्थनेनैव राष्ट्रोन्नतये सहयोगः प्रदेयः । प्रतिकूलाचरणे गणतन्त्रमिदं 'पूर्ववत्' 'द्वयोः कलहे तृतीयस्य लाभः'—इत्याभाणकानुसारं पुनरपि तादृशीमेवावस्थां यायात् कुतः पुनरधिकाराभिलाषिभिर्दलैः शासनं करिष्यते किञ्चाप्स्यते ? 'संघे शक्तिः कलौ युगे' इत्युक्ति कृतार्थयद्भिः केन्द्रशासनेन सह राज्यसर्वकारैः सौमनस्येन पक्षपातराहित्येनैव च सर्वं विरोधं विहायैकमत्यं स्थापनीयम् । एकीभूय वयं सर्वे गोव्याघ्रादय इव निपानेऽत्र द्वात्रिंशगणतंत्रदिवसे राष्ट्रोत्कर्षाय चिरस्थायित्वाय च सन्नद्धाः स्याम । अस्माकं राष्ट्रियध्वजोऽयं चिररात्राय दोधूयेत कालमहिम्ना च गणतन्त्रदिवसोऽय युगयुगपर्यन्तं न समाक्रान्तः-स्यादित्यनया सद्भावनया सह सर्वोऽपि जनसमवाय-आत्मानमुन्नमिताननं सर्वराष्ट्रसम्मुखं कुर्यादिति वयं कामयामहे ।

भारती के कतिपय प्रकाशन

१.	अम्बिकासूक्तम् संस्कृत हिन्दी टीका सहित	मूल्य २.५०
२.	गल्पकल्पलतिका (बालोपयोगिनी)	,, १.५०
३.	गोलनवाङ्कुरः (खगोलवर्णनम्)	,, २.००
४.	आयुर्वेदविशेषांकः	,, ५.००
५.	आरोग्याङ्कः	,, ५.००
६.	बालोपदेशमणिमाला (हिन्दी अनुवाद सहित)	,, ३.००
७.	सूक्तिसुधा (हिन्दी अनुवाद सहित)	,, २.००
८.	मातृस्तवनं (हिन्दीपद्यानुवाद सहित)	,, २.००
९.	आध्यात्मिकशिवायनम् (हिन्दीगद्यानुवादसहित)	,, ५.००
१०.	श्रीगुरुजीस्मृत्यङ्कः	५.००
११.	दुर्गासप्तशतीसर्वस्वम् (हिन्दीपद्यानुवाद सहित)	,, ५.००
१२.	भारतभक्तिस्तोत्रम् (हिन्दीगद्यानुवाद सहित)	,, १०.००
१३.	लघुकथासंग्रह (हिन्दीगद्यानुवाद सहित)	,, ५.००
१४.	शिवराज्योदयम् प्रथमखण्डः (सारसंक्षेपसहितः)	,, २०.००

व्यवस्थापक
भारती-संस्कृत-मासिक, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❖ राजस्थान प्रगति के पथ पर ❖

1 बीस सूत्री एवं पांच सूत्री कार्यक्रम के क्रियान्वयन से राज्य के चहुँमुखी विकास का कार्य प्रशस्त करना ।

2 राजस्थान नहर, चम्बल एवं माही आदि सिंचाई योजनाओं से हरित क्रान्ति का सूत्रपात ।

3 सूखा संभाव्य एवं मरुक्षेत्रों का नियोजित विकास ।

4 अन्तर्राज्यीय परियोजनाओं में राजस्थान के हिस्से का पानी व बिजली प्राप्त करने के विशेष प्रयास । थीन बांध परियोजना से पानी एवं बिजली पाने की आशा ।

5 पेयजल समस्या को सर्वोच्च प्राथमिकता। छठी योजना के अन्त तक 24 हजार समस्या ग्रस्त गांवों में पेयजल पहुँचाने का दृढ संकल्प । हर वर्ष 5 हजार गांवों में पेयजल की व्यवस्था हेतु वृहद कार्यक्रम । चालू वर्ष में इसके अन्तर्गत 29 करोड़ रुपये का प्रावधान । इस वर्ष जब तक 1503 ग्रामों में यह सुविधा पहुँचा दी गई है व 1660 पम्प लगाये जा चुके हैं ।

6 ग्रामीण विकास योजनाओं के माध्यम से ग्रामीण क्षेत्रों का द्रुतगति से आर्थिक विकास । इस वर्ष 21 करोड़ रुपये का प्रावधान ।

7 अनुसूचित जातियों, जन जातियों एवं पिछड़े वर्गों के लोगों के आर्थिक उत्थान व जीवन स्तर को सुधारने के भरपूर प्रयास । इन लोगों को विभिन्न सुविधाएं देने हेतु पहली बार 43.76 करोड़ रुपये का विशेष "कॅम्पोनेंट प्लान" ।

(राजस्थान सरकार द्वारा प्रसारित)

उत्तम वस्त्रों एवं अच्छी किस्म के औद्योगिक अन्य धागों के निर्माता

महाराजा श्री उम्मेद मिल्स लिमिटेड पाली-मारवाड़

उल्लेखनीय उत्पादन :

वस्त्र :

खूबसूरत एवं क्वालिटी में बेजोड़ "**उम्मेद**" वस्त्रों की शानदार परम्परा में नवीन उपलब्धियां

❖ डाइड पापलिन एवं आधुनिकतम प्रिन्ट स्टाइलस और डिजाइनों में बढ़िया काटन शर्टिंग व ड्रेस मेटिरियल्स ।

❖ टू×टू रुबिया वायल विभिन्न रंगों में ।

❖ पालिएस्टर-शर्टिंग व ड्रेस मेटिरियल्स सुन्दर और लुभावने रंगों में डाइड एवं प्रिन्टेड ।

सूत :

❖ इन्डस्ट्रियल यार्न-काउन्ट ४ से १४ तक सिंगल, डबल व मल्टीपल प्लाई ।

❖ पावरलूम तथा हैन्डलूम यार्न-काउन्ट २० से १२० तक ।

❖ स्टेपल यार्न-काउन्ट २० से ४० सिंगल व डबल प्लाई ।

❖ रजिस्टर्ड आफिस

ए/२ पृथ्वीराज रोड़, सी स्कीम, जयपुर

❖ रिटेल शाप :

लक्ष्मी मार्केट पाली मारवाड़

पता : पोस्ट बाक्स नं० १९
पाली मारवाड़ ३०६४०१

तार : "उम्मेदमिल्स"

फोन: ६२८६ (पांच लाइनें)

टेलेक्स : ०३५-२४०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद-स्तम्भः–

आयुर्वेदीयं आत्मस्वरूपम्

वी० बी० नटराज शास्त्री, त्रिचिरापल्ली

पूर्वाऽनुवृत्तम्—

अस्मिन् षाड्धातुके पुरुषे प्रतितिष्ठिता इमे भावाः–कर्म शुभाशुभं नास्य फलम्, ज्ञानं शास्त्रजन्यं, आत्मज्ञानं च, मोहः तमोगुणप्रभव आवरणविक्षेपादिरूपः, सुखं सुकृतजन्यं मनः-शरीरस्वास्थ्यं च अनुकूलतया वेदनीयम्, दुःखं रजस्तमसोः वातपित्तश्लेष्मणां च वैगुण्यात् जायमानं, पूर्वजन्मदुष्कृतफलं प्रतिकूलतया वेदनीयम्, जीवितमरणे शरीरसंयोग-वियोग-रूपे, स्वता–ममता अहंता च, इत्यादयो भावाः सर्वे षड्धातुके पुरुषे एव प्रतिष्ठिताः, नैव निर्गुणे चेतनाधातुपुरुषे परमात्मनि । न च पुरुषरहिते पञ्चभूतादिषड्गे जडे । 'अत्र' इति चतुर्वारप्रयोगः वैदिकलौकिकेषु सर्वेषु कर्मसु षड्धातुपुरुषस्य प्राधान्यं प्रकाश-यति ।

एतत् तत्त्वसूक्ष्मं यो वेद स एव विद्वान् अयं प्रपञ्चः स्वयोनौ ब्रह्मणि अव्यक्ते प्रलयं याति कल्पान्ते, पुनः सर्गकाले उदयं अभि-व्यक्तिं आप्नोति इत्येवंरूपं परं पराक्रमं, तथा स्वस्यैव जनिमृती वेत्तुं अर्हति, नैतावन्मात्रं स्वकीयसंसाररोगस्य निवारिणीं सत्यबुद्धिरूपां चिकित्सां, तदर्थं यत् ज्ञातव्यं साधनं श्रवण-मनन-सदुपासन-निदिध्यासनादिकं रजस्तमो-

वर्धनानां परिवर्जनादिकं सर्वं यथावद् बोद्धुं-कर्तुं च प्रभवतीति भावः ।।

जीवात्मज्ञानस्य अत्यन्तं सूक्ष्मत्वेन दुर्वि-ज्ञेयत्वात्, आत्मनः अस्तित्वं मुख्यत्वं च प्रकारान्तरेण वर्णयति—

"भास्तमः सत्यमनृतं वेदाः
कर्म शुभाशुभम् ।
न स्युः कर्त्ता च भोक्ता च
पुरुषो न भवेद् यदि ।।
नाश्रयो न सुखं नार्तिः
न गतिः नागतिः न वाक् ।
न विज्ञानं न शास्त्राणि
न जन्म मरणं न च ।।
न बन्धो न च मोक्षः स्यात्
पुरुषो न भवेद् यदि ।
कारणं पुरुषस्तस्मात्
कारणज्ञैरुदाहृतः ।।
न चेत् कारणमात्मा स्याद्
भादयः स्युरहेतुकाः ।
न चैषु संभवेद् ज्ञानं न च तैः
स्यात् प्रयोजनम् ।।

[illegible] भाः प्रतिभा सत्वगुण प्रकर्षप्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवा, तमः मोहः। पद्योक्ताः भा आदयः मोक्षान्ताः यथासंभवं मनो वाक्कायाश्रिताः विविधा भावाः मनुष्येषु प्रदृश्यन्ते। त एते व्यापाराः यैः करणैः क्रियन्ते, तेषां जडत्वेन, कर्त्तारं विना क्रियाणां असंभवात्, करण-भिन्नः चेतनः कर्त्ता कर्मणां, फलभोक्ता च यदि न स्यात्, तर्हि एते मनुष्यव्यापाराः कथं संभवेयुः? अतः पुरुषस्य अस्तित्वं कारणत्वं च सिद्धं, तस्यैतच्चेतनत्वात् तद्भिन्नसंघातस्य च जडत्वात्।

किञ्च, अखिलानामेव भावानां आत्माश्रिताः धर्माधर्मा एव हेतवः यदि आत्मा न अभविष्यत् तर्हि तदाश्रिता धर्माधर्माः, तेषां फलानि सुखदुःखानि वा न अभविष्यन्। वेद-शास्त्रविज्ञानादिभिर्वा किञ्चित् प्रयोजनं ज्ञातुरभावे। तस्मात् पुरुष एव कारणमिति कारणतत्त्वपरीक्षकाणां राद्धान्तः॥

मन्दमतीनामपि सुबोधैः परिदृश्यमानैः दृष्टान्तैः उपपादयति आत्मानः कर्त्तृत्वम्—

"कृतो मृद्दण्डचक्रैश्च
कुम्भकाराद् ऋते घटः।
कृतं मृत् तृणकाष्ठैश्च
गृहकाराद् विना गृहम्॥

यो वदेत् स वदेद् देहं
सम्भूय करणैः कृतम्।
विना कर्त्तारं अज्ञानाद्
युक्त्यागमबहिष्कृतः॥
कारणं पुरुषः सर्वैः
प्रमाणैरुपलभ्यते।
येभ्यः प्रमेयं सर्वेभ्यः
आगमेभ्यः प्रमीयते॥"

"घटस्य समवायिकारणं मृत्, निमित्त-कारणे दण्डचक्रे एतैरेव स्वातन्त्र्येण कुलालं विनैव घटो रचितो भवति। गृहनिर्माण-सामग्रीभिः मृत् तृणकाष्ठैरेव स्वातन्त्र्येण शिल्पितक्षाणं विनैव गृहं निर्मितं भवति।" इति यो वदेत् स एव वदेत् पञ्चभूतैः देहस्य समवायिकारणैरेव सम्भूय आत्मनिरपेक्षं देहोऽयं कृत इति। विना कर्त्तारं करणानि कार्यं निष्पादयन्ति स्वयं इति कथनं मुग्धबाल-जल्पितमिव, कञ्चित् कर्त्तारं अन्तरेण देहो-त्पत्तिवादी स्वानभिज्ञतामेव प्रकटयति। यैः प्रमाणैः प्रमितं प्रमेयवस्तु प्रमैव निरपवादं यथार्थज्ञानं भवति, तैः प्रत्यक्षयुक्त्यनुमाना-गमैः सर्वैः प्रमाणैः पुरुषः कर्त्ता इति निश्चितो भवति।

ननु दृष्टान्तौ इमौ नोपपद्येते। कथं? श्रूयताम् घटकार्यकर्त्तृत्वेन कुलालः साक्षाद् दृश्यते, घटकार्ये निष्पन्ने घटात् पृथग् वर्त्तते एव। अनेन व्याख्यातः तक्षा च गृहकर्त्ता। शरीरकार्यकर्त्तृतया तु कोऽपि न दृश्यते शरी-रात् पृथक्। कथं कुम्भकारादिदृष्टान्तेन शरीरकर्त्तुः सत्तां प्रत्ययेमहि? इति चेद् ब्रूमहे—विषयबोधनार्थं प्रयुज्यमानो दृष्टान्तः दार्ष्टान्तिकैकदेशेनैव समानो भवितुमर्हति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैव सर्वात्मना । दृष्टान्तदार्ष्टान्तिकयोः सर्वथा सामान्ये सति, तौ द्वावपि अभिन्नौ हि भवेताम् । न बोद्धव्यं भागं बोधयेत् दृष्टान्तः । यत् किञ्चित् कार्यस्य निष्पत्तिः समवायिनिमित्तकारणकरणैः चैतन्यवत्पुरुषकर्त्तारं विना नैव कदाऽपि सम्भवेत् इति तत्त्वं साधयत एव मृद्दण्डचक्रकुलाल–मृत्तृण-काष्ठगृहकारदृष्टान्तौ ।।

पुरुषस्य शरीरकारणताविषये विज्ञातव्योऽयं तत्त्वविशेषः—त्रिविधकारणे निमित्तकारणं द्विविधं निमित्तकारणेन समवेतं असमवेतं चेति । घटकार्यं प्रति निमित्तकारणं कुलालः घटोपादानमृदा असमवेत निमित्तकारणं भवति । अतः घटोपादानमृदः पृथक् तिष्ठति घटनिष्पत्तेः परं दण्डचक्रादिवत् । एषा रीतिः मनुष्येण जडवस्तुभिः सृज्यमानेषु कृत्रिमपदार्थेष्वेव भवति । नैवं नैसर्गिक्यां सचेतनचतुर्विधभूतग्रामस्य सृष्टौ । तत्र तावत् कर्त्ता आत्मा शरीरोपादानकारणपञ्चभूतैः समवेतं निमित्तकारणं भवति । अतः शरीरात् बहिर्नोपलभ्येत शरीरी, कृतकजडवस्तुनिर्मातृवत् । यथैवं प्रतिव्यक्तिगतं सृष्टितत्त्वं तथैव कृत्स्नस्य विश्वस्य कर्त्ता मायाशबलितः परमेश्वरश्च विश्वस्य अभिन्ननिमित्तोपादानकारणं सन् कार्यंजगतः पृथग् न उपलभ्यते कार्यप्रपञ्चानुप्रविष्टत्वात् । अयं सिद्धान्तः आयुर्वेद-वेदान्तदर्शनयोः समान इति च विज्ञेयम् ।।

एवं आत्मास्तित्वं आयुर्वेददर्शनप्रमाणैः निरूप्य, पुरुषकारणत्वं अनङ्गीकुर्वतां क्षणिकवादिबौद्धानां मतं खण्डयिषुः, तेषां आक्षेपस्वरूपं प्रथमं अनुवदति । एतत् स्वकीयास्तित्वमतस्य द्रढीकरणार्थम् ।

न ते तत्सदृशास्त्वन्ये
पारंपर्यसमुत्थिताः ।
सामान्यात् ये त एवेति
निर्दिश्यन्ते नवा नवाः ।।

(क्रमशः)

मुफ्त ! मुफ्त !! मुफ्त !!!

सफेद दाग

अगर आप सफेद दाग या किसी प्रकार के चर्म रोगों से परेशान हैं तो चिन्ता न करें । आप हमारे यहां से दो पाकेट लगाने की विजय बूटी मुफ्त मंगाकर केवल ५ दिनों में लाभ प्राप्त करें । रोग विवरण लिखें ।

सफेद बाल

मैं अधिक प्रशंसा करना नहीं चाहता, हमारे आयुर्वेदिक "केश कान्ति" तेल से बालों का पकना रुक कर सफेद बाल काले हो जाते हैं । मूल्य १०) तीनशीशी २७) रु० ।

हिन्द आयुर्वेद भवन, (B. H. 579) पो० कतरी सराय (गया)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तक-समीक्षाः—

प्रधानसम्पादकः

सूक्तिसुधा

संस्कृतसाहित्यस्तबकान्तर्गताऽसौ सूक्तिसुधा दशमस्तबकतया गुम्फिता बालानां कण्ठस्थाऽमराणामिव नितराममृतमेवसिञ्चति जीवनेऽमरत्वाय जगति। अस्याः सूक्तिसुधाया अधिगमे ऋते हरेर्नान्यस्य कस्यापि शक्तिन्निभालयामो वयम्। महामनसोऽस्याशुकवेः संस्कृत साहित्याम्बुधिमन्थनेऽपूर्वमेव योगदानं मन्महे हरेरिव देवानाम्। शास्त्रिणोऽमुष्याशुकवेर्हरेः स्वतन्त्रैव रचनापद्धतिः शैशवादेव। एतामेवानुसरति हरिप्रवाहितमुक्तकपद्यामृतनिर्झरीयम्। प्रारम्भत एकोनविंशतिपृष्ठपर्यन्तं प्रकीर्णपद्यानि सर्वथा हितकारीणि समेषां विशेषतो विद्यार्थिनां बालानां च। तत्रापि मातृकागतानामादिमपञ्चवर्णानाङ् क्रमोऽतीव रोचकतयानिबद्धः कन्न विस्मयसागरे निमज्जयति।

अनन्तरञ्च कविना स्वकीयाऽपूर्वकवित्वशक्तिर्मातृकावर्णस्वरचवर्गाद्यादिमवर्णक्रमोपन्यासोपदेशविधया प्रदर्शिता। समुपदिष्टेन पथा व्यवहरद्भिरादावरिषड्वर्गोऽवश्यमेव जेतव्य इति तद्गतदोषान्दर्शयताऽधोगतिविधायिनोभ्युदयाभिलाषिभिः सूपपादितमेतत्कविना।

आमभाण्डेषु कुम्भकाराङ्कितविशिष्टरेखा इव शैशवे बालेषु विनिहितान्संस्कारानन्यथयितुं पारयेन्नाम कोऽपि किं परिणतेषु तेषु। गुणग्रहणेन सह शिक्षार्थिनां कृते तदीयः समुदाचारोऽपि सङ्कलितः। बालकैर्विद्याभ्याससमकालमेव वर्णविन्याससौष्ठवेत्याहृतमनोभिरवश्यमेव भाव्यम्।

पुस्तकाकृतिरपि सूक्तिसुधा मातेव हितमाचक्षाणा पुमांसमुन्नतिमार्गानुयायिनं कर्तुं क्षमा सततं पीता मता ध्याता च।

सद्गृहस्थै रखिलैरेव स्वकीयालयेषु संस्थाप्य ध्रुवमेव पेपीयमानाऽन्तःप्रविष्ठासौ सुधा जीवनेऽमरत्वं प्रापयेदेव।

प्राप्तिस्थानम्—

संस्कृत-प्रचार-परिषद्

भारती-भवनम्-बी० १५ न्यू कालोनी, जयपुरम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समस्यापूर्तिः

"कंबलवन्तं न बाधते शीतम्"

देवर्षि श्रीकलानाथशास्त्री
मंजुनिकुञ्जः, पृथ्वीराजमार्गः जयपुरम्

'कोटा'ऽऽविष्कारात् प्राक्, ऊर्णा-"मफलर"-पटस्य चाज्ञाने ।
आसीत् पुरा प्रवादः, "कम्बलवन्तं न बाधते शीतम् ।"

"ट्वीड"—विनिर्मित—सूटस्यानन्दं खल्वजानद्भिः ।
अज्ञैः कैश्चन कथितं "कम्बलवन्तं न बाधते शीतम् ।"

एटम-बम्ब-रवं तं श्रुत्वाऽऽरात् कम्प-जाड्यमुपयन्तम् ।
धन-सम्बलवन्तं ह्यपि कं बलवन्तं न बाधते शीतम् ?

अरुणा उद्योग

माइन आनर्स, रेंजिग कोन्ट्रेक्टर्स ट्रांसपोर्ट्स
वैंकर्स एण्ड कमीशन एजेन्ट्स

दूरभाष : ७३६२६
ग्राम अरुण उद्योग

हैड आफिस :
श्री राम भवन
किशनपोल बाजार, जयपुर-१

ब्रांच आफिस :
गांधी मार्ग, भद्रक (उडीसा)
स्टेशन मार्ग के सामने, जे० के० रोड़
(उडीसा)

वकिंग एट :

बाउला क्रोमाइट माइन्स एट : धानपुर जैपुर, जिला के उनझर (उडीसा)
केथपाल क्रोमाइट लाइन्स एट: बिरसल जिला धेनकानाल (उडीसा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्व-वार्ताः—

कोसिगिननिधनम्, ईरानीयानां बन्धः

(श्री विश्वदर्शी)

रूसदेशस्य भूतपूर्वः प्रधानामात्यः अलेक्सी कोसिगिन इत्याख्यो दिसम्बरमासस्य १९ तारिकायां पञ्चत्वमगात्। विश्यां तारिकायां यद्यपि विविधसमाचारसमितिभिरयं संवादः प्रसारितोऽभूत्तथापि तदवधि रूसदेशीयया अधिकृतसमाचारसंस्थया "तास" इत्याख्यया नास्य समाचारस्य पुष्टिः कृताऽभूत्। किन्तु तदनन्तरं दिनद्वयावधिः तस्यान्त्येष्टिक्रियायाः समाचाराः प्रासार्यन्त। २३ दिसंबरतारिकायां क्रेमलिनप्रासादे तस्य भस्मकलशः स्थापितः, रूसराष्ट्रपतिना लियोनिद ब्रेझनेवेन, प्रधानमन्त्रिणा तिखानोवेन च तस्मै सादरं श्रद्धाञ्जलिश्च समार्प्यत।

× × × ×

प्रायो वर्षाधिकोऽवधिर्व्यतीतः ईरानदेशस्थस्य अमरीकीयदूतावासस्याधिकारिणः कर्मचारिणश्च (पञ्चाशदधिकसंख्याका) अद्यापि ईरानदेशे दृष्टिबन्धका अर्थात् बलादवरुद्धाः सन्ति, अमरीकीयानुरोधान् न मत्वा ईरानीयैर्न तेऽद्यापि विमुक्ताः। एतत्परिवर्ते अमरीकीयराष्ट्रपतिना कार्टरेण अमरीकीयेष्वधिकोषेषु (बैंकेषु) न्यस्तम् ईरानीयानां समग्रमपि धनं तत्रैवावरुद्धम्, अन्याश्च विविधाः क्रियाकलापाः प्रसारिता येन ईरानीयास्तान् विमोक्तुं प्रयतेरन् किन्तु न कोऽपि परिणामोऽभूत्। एतदन्तरे द्वयोरपि देशयो राजनैतिकं घटनाचक्रं परिवर्तितम्। ईरानईराकयोर्युद्धमभूत् प्रवर्तमानं चास्ति। अमेरिकायां राष्ट्रपतिनिर्वाचनमभूत् यत्र हि कार्टरः पराजितः, रीगनश्च निर्वाचितः। एवं च परिवृत्तासु स्थितिषु संप्रति ईरानीया स्तान् बन्धकान् विमोक्ष्यन्तीत्याशाऽभूत् किन्तु गतेष्वेव दिनेषु तेषां बन्धकानां विमोकाय ईरानीयैरयं प्रतिबन्धः (समयः, शर्त) पुरःस्थापितो यद् यदि अमरीकादेशः ईरानदेशाय त्रयोविंशत्यर्बुदमुद्राणां प्रतिकररूपं राशिं परिवर्ते प्रदद्यात्। सोऽयं राशिः अमरीकीयबैंकेषु ईरानीयानामवरुद्धस्य धनस्य समानोऽस्ति, स्वर्गीयस्य ईरानसम्राजः पहलवीशाहस्य अमरीकायां व्ययीकृतस्य धनस्य चापि तत्र योगः। तर्हि ईरानीया बन्धकान् विमोक्ष्यन्तीति। एतदुपरि वर्तमानराष्ट्रपतिना कार्टरेण तु सहमतिर्न दत्ता किन्तु अग्रे किं भावीति प्रतीक्षन्ते सौत्सुक्यं विश्वस्य राजनीतिपर्यवेक्षकाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद साहित्य की अमूल्य भेंट

वैद्य सहचर

लेखक—पं० विश्वनाथ द्विवेदी

वैद्य बन्धुओं,

चिकित्सा पद्धति को आगे बढ़ाने के लिए एक ही मार्ग है, और वह है—चिकित्सा शास्त्र के योगों पर पुनः नये सिरे से अन्वेषण कर उन्हें इस रूप में रख देना कि प्रत्येक साक्षर पुरुष उनको एक निश्चित रूप में प्रयोग कर समुचित लाभ उठा सके ।

'**वैद्यसहचर**' ऐसे ही रहस्य का भण्डार है । इसमें श्री ललित-हरि आयुर्वेदिक कालेज, पीलीभीत में प्रयुक्त होने वाले ५० वर्षों के सुपरीक्षित और अव्यर्थ योगों का भी संग्रह है ।

प्रस्तुत पुस्तक का उद्देश्य साधारण वैद्य को चिकित्सा मार्ग में सफल चिकित्सक बनाना है । सन्तोष का विषय है कि वैद्य समाज ने इसे अपनाया । इसके ६ संस्करण हो चुके हैं, यह इसकी उपयोगिता का स्पष्ट प्रमाण है ।

पं० विश्वनाथ जी द्विवेदी ने इसके नये संस्करण को अधिक उपयोगी बना कर श्री बैद्यनाथ आयुर्वेद भवन लिमिटेड के निर्देशक वैद्यराज पं० रामनारायणजी शर्मा को प्रकाशित करने को दिया । ३४५ पृष्ठ की वैज्ञानिक पुस्तक का मूल्य ६-५० रु० मात्र है । बैद्यनाथ दवाओं के विक्रेताओं के पास भी यह पुस्तक मिलती है ।

प्रकाशक,

श्री बैद्यनाथ आयुर्वेद भवन लिमिटेड,

गेट नाग रोड, नागपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशवार्ता—

१—जयपुरे-राष्ट्रिय-पुस्तक-मेलापकः

श्री "पद्म" शास्त्री
मुक्तानन्दनगर, गोपालपुरा रोड़, जयपुर-४

राष्ट्रियपुस्तकमण्डलेन दशमः पुस्तकमेलापको राजस्थानस्य राजधान्यां, जयपुर-नगरे, समायोजितः। अयं मेलापकः २ दिनाङ्कात् ११-१-८१ दिनांकपर्यन्तं प्रचलिष्यति। मेलापकस्य मुख्यमुद्देश्यं जनेषु पुस्तकानां प्रति प्रेमोत्पादनं वर्तते। मण्डलमिदं प्रतिवर्षं भारतस्य विभिन्ननगरेषु मेलापकमायोजयति। संविधानस्वीकृतासु विभिन्नभाषासु पुस्तकानां प्रकाशनं मण्डलस्य प्रमुखं कार्यं वर्तते। अद्यावधि मण्डलेन यानि २१५३ पुस्तकानि प्रकाशितानि तेषु १७८६ पुस्तकानि भारतीयभाषासु वर्तन्ते।

रामनिवास-उद्यान-प्रांगणे मेलापकस्य समुद्घाटनं राजस्थानस्य मुख्यमन्त्रिणा कृतम्। पुस्तकानां मूल्यमपि न्यूनं स्यादेतदर्थं प्रयतते मण्डलम्। अद्यावधि मोहमयी-अहमदाबाद-कलकत्ता-दिल्ली-हैदराबाद-मद्रास-बंगलोरनगरेषु मेलापकानामायोजनमभूत्। मण्डलेनाद्यावधि ६०० विक्रयकेन्द्राणि स्थापितानि।

विश्वविद्यालयेषु स्तरीयांग्लपुस्तकानां स्तरीयानुवादाः प्राकाशिताः। भारतीय-कोषेभ्य ऋणं नीत्वा मण्डलमिदं पाठ्यपुस्तकानां निर्माणं कारयिष्यति तथा चायुर्विज्ञान-पुस्तकानां कृतेऽपि साहाय्यं करिष्यति। भारतीयग्रामेष्वपि मण्डलस्य प्रकाशनानां प्रचारः स्यादेतदर्थं योजनैका निर्मिता वर्तते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदिरापान व उन्मादक वस्तुओं का त्याग करो, जो जीवन में कलह घोलते है। स्वच्छ विचार और स्वच्छ शरीर को सोमरस की आवश्यकता नहीं है।

—भगवान गौतम बुद्ध

'यदि कोई कलाकार (ईसा की मूर्ति बनाने के लिए जीवित नमूना चाहे या कोई चित्रकार सेन्टपीटर के चित्र बनाने के निमित्त नमूना मांगे. तो मैं मुन्शीराम (अमर शहीद स्वामी श्रद्धानन्द) जैसे भव्य मानव के दर्शन करने की उसे सलाह दूंगा।'

—रेम्से मैकडोनल्ड (ब्रिटिश प्रधानमंत्री)

आदत आदमी को खा जाती है। अतएव हमें इसका विचार करके बुरी आदत से छूट जाना चाहिए।

—महात्मा गांधी

न मे स्तेनो जनपदे न कदर्यो न मद्यपः। नानाहिताग्निनाऽविद्वान् न स्वैरी स्वैरिणी कुतः ।।

मेरे राज्य में न चोर है, न भिखारी या कृपण है, न शराबी है, न यज्ञ न करनेवाला है, न मूर्ख है, न व्यभिचारी पुरुष और न व्यभिचारिणी स्त्री ही कोई है।

—सम्राट् अश्वघोष

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।

धैर्य-क्षमा-मन को वश में रखना-चोरी न करना-पवित्रता-इन्द्रियों को वश में रखना-बुद्धि धारण करना-विद्या-सत्य का होना तथा क्रोध का न होना। यही धर्म के दस लक्षण हैं।

—मनुस्मृति

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते ।।

श्रेष्ठ व्यक्ति जैसा आचरण करता है—लोग भी वैसा ही करते हैं। और जिसे वह ठीक बतलाता या करता है—उसके अनुयायी भी वैसा ही करते हैं।

—धर्म्मनीति

सुरा मत्स्याः पशोर्मांसं द्विजातीनां बलिस्तथा ।
धूर्तैं प्रवर्तितं यज्ञं नैतद् वेदेषु कथ्यते ।।

मदिरा-मछली-पशुओं का मांस तथा द्विजाति मनुष्यों का बलिदान धूर्तो द्वारा चलाए गए हैं। वेदों में ऐसे किसी यज्ञ का विधान नहीं।

—महाभारत शान्तिपर्व

पंजाबी चन्दू हलवाई करांचीवाला

कार्यालयः—१८५, बालकेश्वर रोड, तीनबत्ती, बम्बई—४००००६

स्थापना—१८९६ शाखायें :— तारका पताः—'चन्दूमेवा'

(१) जवेरी बाजार (२) ग्रान्टरोड (३) कोलावा (४) दादरा (५) वरली नका (६) सायन सर्कल (७) ठाकुरद्वार (८) सूर्योदयस्टोर्स, चर्चगेट (९) घाटकोपर (पश्चिम) (१०) लिंकिंग रोड, (११) रेलवे स्टेशन के सामने, सांताक्रुज (पश्चिम)

कारखाना :—चन्दू भवन, ग्रान्टरोड, बम्बई—४०००७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारी-स्तम्भः (सुपुत्र-प्रशस्तिः)

बालानां नामानि परिहासपदं न भजेयुः

डॉक्टर श्रीमती श्रीराजेश्वरीभट्टः
लालबहादुर शास्त्री कालेज, जयपुर

शिशूनां नामभिः सहः कदापि क्रीडा न विधेया। स्नेहातिशयेन मातापितरौ स्व बालकं येन केनापि संकेतेनाह्वयन्ति तदेव तस्य नाम वयः प्राप्तौ परिहासास्पदं भवति। तमनुश्रुत्य जातः लज्जते पश्चात्तापमनुभवति च। यथा केचन मक्खीबाबू, पकोडीमल आदि नाम धारयन्ति आजीवनञ्च तानि नामानिताननुसरन्ति। नामानि तदनुरूपमेव करणीयानि। यदि कस्याश्चन कुरूपायाः नाम सुन्दरीति भवति। यथाहि तस्याः नेत्रे काणत्वं, वर्णश्च कज्जलवत्, ध्वनिरपि जीर्णवेणुयष्टिरिव कर्कशः, मुखस्याकृतिरपि विगुणेति-तामवलोक्य सुन्दरीति नामापि श्रुत्वा यः परिहासो जायते सोऽनिर्वचनीयः। एव मेव परमसुन्दरीं कन्यां यदि चौथबाई आदि नामभिराहूयते तदापि केवलां हासपरम्परा-मेव जनयति। अतः नामकरणन्तथा भवेत् येन तस्य गुणानां प्रकाशो भवेत्। माता-पितृभ्यो पूर्णतया सावधानतया नाम्नां चयनं कर्तव्यम्। नाम्ना सह मानवस्य घनिष्ठः सम्बन्धो वर्तते।

बच्चों के नाम के साथ खिलवाड कभी नहीं करनी चाहिये। बहुत से माँ-बाप लाड़-प्यार में अजीब से नाम लेकर अपने बच्चों को बुलाते हैं। किन्तु बड़े होने पर वह हँसी का पात्र बन जाता है। जिसे सुन कर नामधारी लज्जित होता है और माता-पिता के कृत्य पर पश्चात्ताप करता है। मक्खी बाबू, पकोडीमल आदि नाम उन्हें आजीवन परेशान करते हैं। नामकरण बालकों के गुणों के अनुरूप करना चाहिये। नामकरण बालकों के गुणों के अनुरूप करना चाहिये। ऐसा न हो कि किसी कुरूप नारी का नाम सुन्दरी या हसीना हो। जिसकी आँखें काणी हो, काजल जैसा वर्ण हो आवाज फटे बाँस जैसी हो, मुँह कद्दू जैसा हो—लोग हँसेंगे नहीं तो क्या करेंगे। इसी तरह किसी अनुपम सुन्दरी का नाम यदि चौथबाई हो तो भी वह लज्जा का ही कारण होगा। हर व्यक्ति चाहता है कि उसका सुन्दर सा नाम हो। नाम का मानव जीवन से घनिष्ठ सम्बन्ध रहता है अतः माता-पिता को अत्यन्त सावधानी पूर्वक बालक का नाम रखना चाहिये। नाम उसके गुणों का प्रकाशक हो और समाज में मानव प्रतिष्ठा दिलावे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपने पहले बच्चे से उसका अधिकार मत छीनिए

दो बच्चों के जन्म में तीन साल का अंतर रखिए।

बच्चे के मानसिक व शारीरिक विकास में शुरू के तीन साल बड़े महत्वपूर्ण होते हैं। उसे आपके लाड़ प्यार की जरूरत होती है। यह आप तभी कर सकती हैं जब आप पर उससे छोटे बच्चे की जिम्मेदारी न हो। इसलिए कम से कम तीन साल का अंतर अवश्य रखिए।

उपाय ये रहे: निरोध, खाने की गोलियां या लूप

अधिक जानकारी के लिए समीप के स्वास्थ्य केन्द्र से सम्पर्क करें।

पहले बच्चे का अधिकार तीन साल तक पूरा प्यार

davp 80/245

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतव्याकरणप्रवेशिका

हलन्त (व्यञ्जनान्त) शब्द

लेखकः श्रीविश्वनाथमिश्रः, बीकानेरः

पूर्वाऽनुवृत्तम्—

हलन्त शब्दों में इस प्रकार के शब्द आते हैं जिनके अन्त में ङ् और ञ् को छोड़ कर कोई भी हल् (व्यञ्जन) वर्ण रहता है। इस प्रकार के शब्दों के आगे अजादि विभक्तियों के आने पर मूल शब्द में विभक्तियां मिला दी जाती हैं। शब्द में जो कुछ विकृति होती है वह हलादि विभक्तियों में ही होती है। उदाहरण के लिये लिह् धातु से क्विप् प्रत्यय और उसका सर्वापहारी लोप करने के बाद "लिह्" इस स्वरूप की "कृत्तद्धित-समासाश्च" सूत्र से प्रातिपदिक संज्ञा करने के बाद जब सु आदि विभक्तियां इसके आगे आती हैं तब पदान्त में या झल् वर्ण पर में रहने पर हकार को ढकार हो जाता[1] है। इस ढकार को जश्त्व के द्वारा डकार और प्रथमा के एकवचन का जहां लोप होकर वर्णों का अवसान हो जाता है, वहां "वावसाने" सूत्र से डकार को पाक्षिक टकार हो जाता है। हकार को ढकार और उसे डकार करने की परम्परा केवल आठ हलादि विभक्तियों में ही होती है सप्तमी के बहुवचन ने ढकार को डकार करने के बाद डकार से पर में रहने वाले सकार को धुट् का आगम हो जाता है। धुट् के धकार को तकार और डकार को टकार कर दिया जाता है यह तकार और टकार "खरि च" सूत्र से किया जाता है इस प्रकार लिह् शब्द जिसका अर्थ आस्वादयिता है उसका रूप इस प्रकार होता है—

लिट् ड्	लिहौ	लिहः
लिहम्	,,	,,
लिहा	लिड्भ्याम्	लिड्भिः
लिहे	,,	लिड्भ्यः
लिहः	,,	,,
लिहः	लिहोः	लिहाम्
लिहि	,,	लिटत्सु लिट्सु
हे लिट्	हे लिहौ	हे लिहः

१—हो ढः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कमल या कमला शब्द से आचष्ट अर्थ में णिच् प्रत्यय और उसके वाद क्विप् प्रत्यय करने पर 'कमल्' ऐसा हलन्त शब्द बनता है। इसका अर्थ होता है कमल या लक्ष्मी का कथन करना। इसके आगे सु आदि प्रत्यय आते हैं तब यहां किसी प्रकार का विकार मूल शब्द में न होकर अजादि विभक्तियों में शब्द को विभक्तियों में मिला दिया जाता है। इस प्रकार इसके रूप इस प्रकार के होते हैं—

कमल्	कमलौ	कमलः
हे कमल्	हे कमलौ	हे कमलः
कमलम्	कमलौ	कमलः
कमला	कमल्भ्याम्	कमल्भिः
कमले	"	कमल्भ्यः
कमलः	"	"
कमलः	कमलोः	कमलाम्
कमलि	"	कमल्सु

इसी प्रकार सुगण् (गिनने में चतुर) शब्द के भी रूप जानने चाहिये।

हलन्त शब्दों में कुछ शब्द ऐसे होते हैं जिनके अन्त में अत् लगा होता है। उदाहरण के लिये, भवत्, धीमत्. बुद्धिमत् आदि शब्दों को लिया जा सकता है। शब्दों के अन्त में जो अत् आता है, यह अनेक प्रकार से आता है। कहीं शतृ प्रत्यय करने पर अत् अवशिष्ट रहता है तो कहीं पर मतुप् प्रत्यय करने पर अत् रहता है और कहीं डवतु प्रत्यय करने पर भी अन्त में अत् श्रूयमाण होता है ऐसे शब्दों से जब विभक्तियां आती हैं तब निम्नलिखित कार्य होते हैं—

१—मह् धातु से औणादिक अति प्रत्यय से निष्पन्न महत् शब्द की उपधा में रहने वाले अकार को सर्वनामस्थान विभक्ति (सु औ जस्, अम्-औट्) पर में रहने पर दीर्घ हो जाता है[1]।

२—धीमत् बुद्धिमत्, भवत् आदि शब्दों के उपधास्थ अकार को केवल प्रथमा के एकवचन में ही दीर्घ होता है[2]।

१—सान्तमहतः संयोगः २—अत्वसन्तस्य चाधातोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३—अत् अन्तवाले सभी प्रकार के शब्दों में अकार और तकार के बीच नकार का आगमन होता है। यह नकारागम सर्वनामस्थानसंज्ञक पांच विभक्तियों में होता है[3]।

४—सम्बोधन विभक्ति पर में रहने पर उपधा को दीर्घ नहीं होता है।

५—भू धातु से शतृप्रत्यय करके बनाये गये भवत् शब्द के उपधास्थ अकार को सु विभक्ति (प्रथमा के एकवचन) में भी दीर्घ नहीं होता है। इन विवेचनों के आधार पर महत् शब्द का रूप निम्नलिखित प्रकार का होता है—

महान्	महान्तौ	महान्तः
महान्तम्	,,	महतः
महता	महद्भ्याम्	महद्भिः
महते	,,	महद्भ्यः
महतः	,,	,,
महतः	महतोः	महताम्
महति	,,	महत्सु
हे महन्	हे महान्तौ	हे महान्तः

धीमत् बुद्धिमत् आदि शब्दों में केवल प्रथमा के एकवचन में दीर्घ करके "धीमान्, बुद्धिमान्, श्रीमान्, भगवान्, मघवान् आदि रूप बनाये जाते हैं। प्रथमा के द्विवचन से लेकर द्वितीया के द्विवचन तक

धीमन्तौ	धीमन्तः	बुद्धिमन्तौ	बुद्धिमन्तः
धीमन्तम् धीमन्तौ	(धीमतः)	बुद्धिमन्तम्	बुद्धिमन्तौ

ये रूप बनते हैं। शस् (द्वितीया के बहुवचन) से लेकर सुप् (सप्तमी के बहुवचन तक के रूप ऊपर लिखे गये महत् शब्द के रूप के समान ही होते हैं। इसी प्रकार गोमत् विद्यावत्, यावत्, तावत्, कियत् आदि शब्दों के रूप जानने चाहिये।

उपर्युक्त शब्दों को जब स्त्रीलिंग बनाना होता है तो इन शब्दों के आगे 'उगितश्च' सूत्र से ङीप् प्रत्यय हो जाता है। फलस्वरूप भवत् का स्त्रीलिंग भवती और महत् का स्त्रीलिंग महती तथा बुद्धिमत् का स्त्रीलिंग बुद्धिमती होता है। इस प्रकार के ङीप् (ई) प्रत्ययान्त शब्दों का रूप नदी शब्द के रूप की भांति होता है नदी शब्द के रूपों का विवरण अजन्त स्त्रीलिंग प्रकरण में किया जा चुका है। (क्रमशः)

३—उगिदचां सर्वनामस्थानेऽधातोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगिनी लघुकथा

३१-शत्रुतायाः रहस्यम् [पोलैंडदेशस्य श्रेष्ठकथा]

श्री "पद्म" शास्त्री
१२८ मुक्तानन्दनगर, गोपालपुरारोड, जयपुरम्-४

इयं कथा तस्य समयस्यासीत्, यदा सर्वे पशवो मैत्रीपूर्वकं न्यवसन्। एकदा चैकस्मिन्नगरे कुक्कुराश्चान्यनगरस्थान्कुक्कुरान् न्यमन्त्रयन्। जातिगतसम्बन्धेन कुक्कुराणां तत्र गमनमावश्यकं सञ्जातम् किन्तु तेषां पार्श्वे महत्त्वपूर्णानि कर्गजान्यासन्। सुरक्षिते स्थाने कर्गजानि निक्षिप्य ते गन्तुमैच्छन् परं कुत्रास्ति तत् सुरक्षितं स्थानम्? सर्वे विचारमग्नाः सञ्जाताः।

यह कथा उस समय की थी जब सभी पशु मित्रतापूर्वक रहते थे। एक बार किसी नगर में कुत्तों ने अन्य नगर के कुत्तों को निमन्त्रण दिया। जातिगत-सम्बन्ध होने के कारण कुत्तों का वहां जाना आवश्यक हो गया किन्तु उनके पास महत्त्वपूर्ण दस्तावेज थे। उन दस्तावेजों को किसी सुरक्षित स्थान पर रखकर वे जाना चाहते थे परन्तु वह सुरक्षित स्थान कहां है? सभी इस विचार में डूब गये।

कश्चित् कुक्कुरः प्राह—वयमस्मिन्जीर्णे मन्दिरे कर्गजानि निक्षिप्य गच्छामः। अन्ये प्रोचुः—नैतत्कर्तुं शक्यते यत्कोऽपि रहस्यमेतद् विजानीयात्? द्वितीयः प्राह—श्रेष्ठिनः पार्श्वे निक्षिप्य गच्छामः। सर्वे प्रोचुः—नैतद् युक्तं चौरश्चायं श्रेष्ठी। अपरः प्राह—रक्षापुरुषस्थाने निक्षिप्य गच्छामः। सर्वे प्रोचुः—हन्त! अस्मिन् युगे रक्षा-

किसी कुत्ते ने कहा—हमें इस पुराने मन्दिर में दस्तावेज रखकर जाना चाहिये। दूसरों ने कहा—ऐसा नहीं किया जा सकता क्योंकि इस रहस्य को कोई जान लेगा। दूसरे कुत्ते ने कहा—दस्तावेजों को सेठ के पास रख कर हम चलें। सभी कुत्तों ने कहा—यह सेठ चोर है, ऐसा करना ठीक नहीं। अन्य कुत्ते ने कहा—इन दस्तावेजों को थाने में रखकर चलें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषाणां को विश्वासः ?। अन्यः प्राह--कथन्न वयं कर्गजानि सहैव नीत्वा प्रचलामः ? द्वितीयः प्राह—नहि, नहि, मार्गे जलप्रवर्षणेन कर्गजानि विनष्टानि भविष्यन्ति ।

सभी कुत्तों ने कहा—इस युग में सिपाहियों का क्या विश्वास ?। एक कुत्ते ने कहा—क्यों न हम इन दस्तावेजों को साथ लेकर ही चलें। दूसरे ने कहा—नहीं, रास्ते में वर्षा से वे दस्तावेज नष्ट हो जायेंगे।

तस्यां संसदि वृद्धश्चैकः कुक्कुरो जोषमस्थात् । सः किञ्चिद्वक्तुमियेष—सर्वे तस्यां दिशि नयनानि चिक्षिपुः। वृद्धः कुक्कुरः प्राह—कस्मिश्चिद् विश्वसितु तु वयं विवशाः । विश्वासबलेनैव जगतः कार्याणि प्रचलन्ति । सर्वेप्राहुः—तर्हि भवतां मते को विश्वासयोग्यः ? वृद्ध उवाच—विडालेषु विश्वासः करणीयः । तीव्रेण स्वरेण सर्वे विरोधं प्राचकटन् परमन्ते पक्षविपक्षे मतगणना सञ्जाताः । प्रबलबहुमतेन विडालानाहूय कर्गजानि प्रदत्तानि ।

उस सभा में एक बुड्ढा कुत्ता चुपचाप बैठा था । उसने कुछ कहना चाहा—सभी ने उस ओर अपनी दृष्टि डाली । वृद्ध कुत्ते ने कहा—हमें किसी पर तो विश्वास करना ही पड़ेगा । विश्वास बल पर ही संसार के कार्य चलते हैं। सभी ने पूछा—तो आपके मत से कौन विश्वास के योग्य है ? वृद्ध कुत्ते ने कहा—बिल्लियों पर विश्वास करना चाहिये । सभी ने तीव्र-स्वर से इसका विरोध किया परन्तु अन्त में इस मत के पक्ष विपक्ष में मतगणना हुई : प्रबल-बहुमत होने से बिल्लियों को दस्तावेज सोंपे गये।

विडालैः कर्गजानि तु ग्रहीतानि परं तेषां समक्षेऽपि तेषां सुरक्षायाः प्रश्न आसीत् । ते सभामाकारयामासुः । एको विडालः स्वमतं प्रकटीकृतवान् हर्म्यपृष्ठे कर्गजानि निक्षिपन्तु भवन्तः । अन्यः प्रोवाच—यदि वर्षतौं कर्गजानि चार्द्राणि भविष्यन्ति तर्हि कुक्कुराश्चास्मान् विभेदयिष्यन्ति । अपरः प्राह—भूमिगर्ते निक्षिपन्तु भवन्तः कर्गजानि ।

बिल्लियों ने दस्तावेज तो ले लिये किन्तु उनके सामने भी उन दस्तावेजों की सुरक्षा का प्रश्न उपस्थित हो गया था । उन्होंने सभा बुलायी । एक बिल्ली ने अपना मत प्रकट किया कि आप छत पर दस्तावेज रख दें। अन्य बिल्ली ने कहा—यदि वर्षा-ऋतु में वे कागज भीग गये तो कुत्ते हमें फाड़ खायेंगे। दूसरे विडाल ने कहा—आप दस्तावेजों को

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वे प्रोचुः—नहि, नहि, कर्गजानि विनष्टानि भविष्यन्ति। एको वृद्धो विडालः प्राह – सर्वश्रेष्ठ उपायश्चास्ति यत्काष्ठमञ्जूषायां कर्गजानि पातनीयानि क्रमेणास्माभिस्तेषां रक्षा च करणीया। सर्वे चैकस्वरेण प्राहुः—साधु, साधु, एवमेव करणीयम्।

सर्वे मिलित्वा तथैव चक्रुः। क्रमेण ते कर्गजानि रक्षयन्तश्चासन्। बहूनि दिनानि व्यपगतानि। अन्ततः शीतकालः समागतः। नाद्यावधि कुक्कुरा निवृत्ताः। दारुणे शीते रात्रौ जागर्तुं ते काठिन्यमन्वभवन्। पुनरेका संसदायोजिता। एको विडालः प्राह—कथन्न कर्गजान्येतानि गुप्तस्थाने निक्षिप्तव्यानि स्युः? वृद्धो विडाल प्राह—मन्मते तु मूषकाणां विलेषु कर्गजानि निक्षिप्येरन्। वृद्धेनानेन साधूक्तं, सर्वतो ध्वनि वितस्तार।

मूषकैः स्वीकृतस्तेषां प्रस्तावः। विवरस्य चैकस्मिन्कोणे न्यक्षिपन् ते कर्गजानि निश्चिन्ताश्च जाताः। क्रमशः शीतस्य प्रभावो वृद्धिङ्गतः। भूमिविवरेष्वपि मूषकाः कम्पमानाश्चासन्। यदा शीतत्राणार्थं ते कमप्युपायं नाविन्दन् तदैव धूर्तस्यैकस्य मूषकस्य दृष्टिः

जमीन में गाड दें। सभी ने कहा—नहीं दस्तावेज नष्ट हो जायेंगे। एक वृद्ध विडाल ने कहा—लकड़ी के सन्दूक में दस्तावेज डालकर हमें बारी बारी उनकी रक्षा करनी चाहिये। सभी ने एक स्वर से कहा—ठीक है, ठीक है, ऐसा ही करना चाहिये।

सब ने मिलकर वैसा ही किया। बारी बारी से वे दस्तावेजों की रक्षा करने लगे। बहुत दिन बीत गये। अन्त में सर्दी आगई। कुत्ते अभी तक भी नहीं लौटे। भयंकर सर्दी में, रात में जागने में, उन्हें कठिनाई का अनुभव हुआ। फिर एक सभा बुलाई गई। एक बिल्ली ने कहा—इन दस्तावेजों को गुप्त स्थान पर क्यों न रख दिया जाय? वृद्ध-विडाल ने कहा—मेरी राय में तो इन दस्तावेजों को चूहों के बिल में रख दिया जाय। सभी ओर से आवाज आई कि यह वृद्ध विडाल, ठीक कह रहा है।

चूहों ने भी उनका प्रस्ताव मान लिया। उन्होंने दस्तावेज बिल के एक कोने में डाल दिये और वे निश्चिन्त हो गये। क्रमशः सर्दी का प्रकोप बढ़ता ही गया। जमीन के अन्दर बिल में चूहे काँप रहे थे। जब सर्दी से बचने का उन्हें कोई उपाय नहीं मिला तब एक धूर्त चूहे की

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

113528

कर्गजेष्वपतत् । स प्राह—कथन्न वयं कर्गजेषु गृहं निर्मापयिष्यामः इत्थं कृते सति निश्चप्रचं शीताद्रक्षा भविष्यति । निमज्जतः कृते तृणस्याधारः, अनया चोक्त्या ते सर्वे कर्गजेषु विविशुः ।

रिक्ते चित्ते दुर्बुद्धयो भवन्ति । किञ्चिद्दिनानन्तरं ते कर्गजानि कर्तितुमारभन्त यतो हि "स्वभावो मूर्ध्नि वर्तते" । शीतकालोऽपि व्यपगतः । बुभुक्षितास्ते कर्गजपत्राणि भोक्तुमारब्धवन्तः, शनैः शनैः पत्राण्यपि समाप्तानि ।

वसन्तर्तौ समुपागते कुक्कुराः प्रतिनिवृताः । सर्वप्रथमं ते स्वकर्गजान्यानेतुं विडालवसतौ तदनन्तरं मूषकविवरमनुप्राप्ताः । तत्र खण्डशः कृतानि स्वकर्गजान्यवलोक्य ते भृशं क्रुद्धाः सञ्जाताः । ते मूषकेष्वाक्रमणं चक्रुः । विडालेष्वपि ते क्रोधान्विता निपेतुः । यथाकथञ्चित्तेषां तात्कालिकं युद्धं तु समाप्तं किन्तु तेषां शाश्वतिको विरोधश्चाद्यावधि प्रचलति ।

दृष्टि उन दस्तावेजों पर पड़ी । वह कहने लगा—क्यों न हम इन कागजों से घर बना लें ? ऐसा करने पर निश्चित ही हमारी, सर्दी से रक्षा हो सकेगी । "डूबते हुए को तिनके का सहारा" इस उक्ति के अनुसार वे चूहे उन कागजों में घुस गये ।

"खाली मन शैतान का घर होता है" कुछ दिनों बाद वे उन कागजों को काटने लग गये क्योंकि उनका यह स्वभाव ही है । सर्दी भी बीत गई । जब उन्हें भूख लगी तब वे उन दस्तावेजों को खाने लग गये । धीरे धीरे वे दस्तावेज समाप्त हो गये ।

वसन्त ऋतु के आने पर कुत्ते लौटे । सर्वप्रथम वे अपने दस्तावेज लाने बिल्लियों की बस्ती में गये, उसके बाद चूहों के बिल पर पहुँचे । वहाँ अपने दस्तावेजों के टुकड़े देख कर उन्हें बहुत अधिक क्रोध आया । उन्होंने चूहों पर आक्रमण कर दिया । क्रोध में आकर वे बिल्लियों पर भी आक्रमण करने लगे । जिस किसी तरह उनका उस समय का युद्ध तो समाप्त हो गया किन्तु उनका निरन्तर चलने वाला विरोध आज तक विद्यमान है ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



गणतन्त्र दिवस की हार्दिक बधाइयां

26 जनवरी, 1950 को भारत की जनता ने सार्वभौम समाजवादी धर्म निरपेक्ष लोकतांत्रिक गणराज्य की नींव रखी। पिछले 31 वर्षों में हमने बहुत कुछ पाया है।

हमने :

- ☐ लोकतन्त्र का आधार सुदृढ़ किया
- ☐ अरसे से जारी खाद्यान्न की कमी को दूर किया
- ☐ विकसित औद्योगिक देशों की श्रेणी में आए
- ☐ विज्ञान और टेक्नालोजी के क्षेत्र में ऊंचा स्थान प्राप्त किया और
- ☐ लगातार तीन विदेशी आक्रमणों का सफलता से मुकाबला किया
- ☐ और हमारी आवाज का अन्तर्राष्ट्रीय मंचों पर महत्व है

फिर भी सबको पूरा सामाजिक न्याय दिलाने और लोगों का जीवन स्तर उठाने के लिए बहुत कुछ करना बाकी है।

यह सुदृढ़ राष्ट्रीय एकता के द्वारा ही संभव है



राष्ट्रीय एकता को बढ़ावा दें और प्रगति तथा सुरक्षा के लिए धर्मनिरपेक्ष तत्वों को सुदृढ़ करें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

द्रव्येण सर्वे वशाः

डॉक्टर श्रीगङ्गाधरभट्टः
रीडर, संस्कृत विभाग, राजस्थानविश्वविद्यालयः, जयपुरम्

पद्मे मूढजने ददासि द्रविणं विद्वत्सु किं मत्सरो:
नाहं मत्सरिणी न चापि चपला नैवास्ति मूर्खे रतिः ।
मूर्खेभ्यो द्रविणं ददामि नितरां तत्कारणं श्रूयतां,
विद्वान्सर्वगुणेषु पूजिततनु मूर्खस्य नान्या गतिः ।

यतमानो दिने दिने

वैद्यः—श्रीरामस्वरूपशास्त्री,
सम्पादकः 'बालसंस्कृतम्" बम्बई–८६

पान्थः पदात् पदं गच्छन् शनै याति निरन्तरम्
योऽद्य खिद्यति मार्गेषु लक्ष्यं स्थानं स विन्दति ॥ १ ॥
समादाय शिलामेकां शिल्पी प्रारभते गृहम्
तस्यां च दृढमूलायां क्रियन्ते सप्तभूमिकाः ॥ २ ॥
श्लोकस्यैकाक्षरं पूर्वं बालशिष्येण धार्यते
ततः पदं च वाक्यं च पद्यं च पुस्तकं तथा ॥ ३ ॥
जलदो बिन्दुशः पूर्वं मन्दवेगेन वर्षति
धारासारं ततो वर्षन् रंहसा भरते नदीः ॥ ४ ॥
जनः स्वल्पसमारम्भो यतमानो दिने दिने
कार्येषु लभते सिद्धिं ततो याति परं सुखम् ॥ ५ ॥

❖ ❖ ❖

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd. No. 1379/51
R. J. No. 2617
Licence No. PP. 9.
Licence to Post
Without
Prepayment

भारती

कश्चन विद्वत्तल्लजः लक्ष्मीं पृच्छति—त्वं मूर्खेभ्यः धनानि ददासि विद्वत्सु किं तव मत्सरः। मात्सर्येणैव त्वं तेभ्य धनानि न प्रयच्छसि। लक्ष्मीः प्रत्युत्तरति नाहं विद्वद्भ्योऽसूयामि ईर्ष्यामि वा नाप्यहं चञ्चला न चापि मम मूर्खान् प्रति स्नेहव्यक्तिरस्ति। तथाप्यहं मूर्खेभ्यः द्रविणं प्रयच्छामि। कारणमस्येदमेव यत् विद्वान्सः सर्वविधगुणगणमण्डिताः विनापि द्रविणं सर्वविधकार्यजातानि कर्तुं पारयन्ति किन्तु मूर्खस्य तु अन्या गतिरेव नास्ति। धनमेव तस्य कार्यसाधकम्। अतः धनानि मूर्खेभ्योऽहं वितरामि।

कोई विद्वान् लक्ष्मी से प्रश्न करता है—तुम मूर्खों को धन देती हो विद्वानों को धन नहीं देती क्या तुम्हें विद्वज्जनों से डाह है? लक्ष्मी ने उत्तर दिया—न मुझे विद्वानों से डाह है, न मैं चञ्चल हूं और न मुझे मूर्खों से प्रेम है। तथापि मैं मूर्खों को धन देती हूँ इसका कारण यह है कि विद्वान् तो सब प्रकार के गुणों से विभूषित हैं। अपनी गुणगण महिमा से समस्त कार्यों को सम्पन्न कर सकते हैं परन्तु मूर्ख बेचार की तो धन के अलावा कोई अन्य गति नहीं।

लज्जन्ते बान्धवास्तेन सम्बन्धं गोपयन्ति च।
मित्राण्यमित्रतां यान्ति यस्य न स्युः कपर्दिकाः।

यस्य सविधे द्रविणं न विद्यते तेन बान्धवाः लज्जामनुभवन्ति स्वसम्बन्ध गोपायन्ति च। मित्राण्यपि शत्रुवद् व्यवहरन्ति। धनविहीनस्य सर्वमपि विपरीतञ्जायते।

जिसके पास द्रव्य नहीं होता उसके बन्धु-बान्धव उससे लज्जा का अनुभव करते हैं अपने सम्बन्ध को भी प्रकट नहीं करते। मित्र भी शत्रु बन जाते हैं। धन विहीन की अन्य कोई गति नहीं है।

प्रकाशकः—संस्कृत प्रचार परिषद् राजस्थान,
पता—भारती भवन, बी. १५ न्यू कालोनी, जयपुर—३०२०१। दूरभाष—७५४९६
राधेश्याम द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित। दूरभाष—६१७६७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृत-मासपत्रिकायाः

पुस्तकालय
गुरुकुल काँगड़ी

र्षम् ३१
ाघः
ङ्कः ४

फरवरी ,
१९८१

तामरसत्वं च
विदारयति या द्रुतम् ।
न्यतां गिरां देवी
सा मरालमधिष्ठिता
—श्रीरामगोपालशास्त्री, जयपुरम्

वार्षिकमूल्यम् पञ्चदशमुद्राः १५.००
एकप्रतेः—सार्धक रूप्यकम् १.००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आन्ध्र-उत्तरप्रदेश-
बिहार-पञ्चनद-सर्वकारैः स्वीकृता

विषय-सूची

क्र.सं	विषयाः	निबन्धारः	पृष्ठ-संख्या
१.	मङ्गलम्	श्रीरामगोपालशास्त्री, जयपुरम्	१२७
२.	मासावतरणम्	" " "	१२७
३	वसन्त-गीतम्	आचार्य श्रीमधुकरशास्त्री, कोटा	१२८
४.	शोक-समाचाराः	श्रीगङ्गाधरभट्टः, जयपुरम्	१३०
५.	आयुर्वेद-स्तम्भः—	वी० बी० नटराज शास्त्री, त्रिचिरापल्ली	१३४
६.	सम्पादकीयम्	प्रधानसम्पादक।	१३७
७.	मान्धाता-अविनाशयो र्यज्ञोपवीतसंस्कारः		१३९
८.	संस्कृतसमाचाराः	श्रीकालीचरणभट्टाचार्य	१४१
९.	सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी	श्रीमहाप्रभुलाल गोस्वामी, वाराणसी	१४२
१०.	पुस्तक-समीक्षाः	प्रधानसम्पादकः	१४३
११.	नारी-स्तम्भः	श्रीमती राजेश्वरीभट्ट, जयपुरम्	१४६
१२.	आधुनिकभारतीयभाषासु संस्कृत-शब्दावली गवेषणा	श्रीगयाचरणत्रिपाठी, इलाहाबाद	१४८
१३.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, जयपुरम्	१५३
१४.	सूक्ति-सुधा	डा० श्रीगङ्गाधरभट्टः, जयपुरम्	१२३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानसंरक्षका:–
जगद्गुरुशङ्कराचार्य-
स्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः
कांचीकामकोटिपीठाधिपतयः

संस्थापकः
स्व. श्री उमाकान्तकेशव आप्टे
(बाबा साहब आप्टे)

प्रधान सम्पादकः
जगदीशशर्मा
साहित्याचार्यः

सम्पादकः
दीनानाथत्रिवेदी 'मधुपः'

सहसम्पादकः
रामगोपालशास्त्री जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

संरक्षकः
श्रीदेवीशङ्करतिवाड़ी
जयपुरम्

प्रबन्ध-सम्पादकः
श्रीगिरिराजशर्मा
भारती-भवनम्
बी १५, न्यू कालोनी
जयपुरम्–१
(राजस्थानम्)

वर्षम् ३१ | माघः, विक्रमाब्दः, २०३७ [फरवरी, १९८१] | अङ्कः ४

मङ्गलम्

ऋतुपतिरपि यस्यानुग्रहं प्राप्य लोके
युवति-जन-समर्च्योऽजायतानङ्गमित्रम् ।
सरस-मुरलिकास्यं पूरयन्तं हसन्तं
रसनिधिमनिशं तं भावयेऽन्तर्वसन्तम् ॥

मासावतरणम्

तिग्मांशुरप्येष यदैति नक्रं
शीतांशुवज्जाड्यमिहातनोति ।
अपाकृतिं तस्य विधातुकामो
हरिं स्मरन् **माघ** उपैति लोके ॥

—श्रीरामगोपालशास्त्री, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसन्त-गीतम्

आचार्य श्रीमधुकर शास्त्री, कोटा

आगतो नव-भारते नूतन-वसन्तो जन-मनो नवयौवनोल्लसितं सखे !

भारतोद्यानस्य सुषमाऽद्याऽस्ति नव्या
जाति-पंक्ति-कुरीतिपत्र-झरेण भव्या
विविधरूपसुपुष्पफलसुविकास – नम्या
सकलसम-सौरभतया विशदा सुरम्या

ध्वनति मानस-मुरलिका मधुगानमधुना हे सखे !
जन-मनो नवयौवनोल्लसितं सखे !

श्रूयते परितस्तरुणकोकिल-निनादः
प्रगति-तरुणी-प्रणवतो विगतो विषादः
प्रमदयति मन आम्र-मञ्जरिका-सुगन्धः
मञ्जु गुञ्जति मधुकरः सरसानुबन्धः

शीत-भीतिर्व्यपगता मधुमास-समयेऽस्मिन् सखे !
जन-मनो नवयौवनोल्लसितं सखे !

कृष्ण-वंशी मुखरिताऽऽस्ते व्रज-धरायां
राधिका-नूपुर-निनाद-मनोहरायां
"ढोल" "अलगोझा"-ध्वनिर्मुखरोऽस्ति दिशि-दिशि
चपल-चपला चन्द्रिका च चकास्ति निशि-निशि

कुमुद-कलिका शशिकरस्पर्शात् पुलकिता हे सखे !
जन-मनो नवयौवनोल्लसितं सखे !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चणक-यव-गोधूम-धान्यैर्हरित-हरितं
पीत-सर्षप-शोभया परितोऽपि भरितं
स्वर्ग-समधिक-भारतीय-धराञ्चलं रे !
"सत्य-शिव-सुन्दर"-मयं चिर-निर्मलं रे !

विश्व-वैभवतोऽपि महिमाऽस्यास्ति विपुलो हे सखे !
जन-मनो नव-यौवनोल्लसितं सखे !

विजय-मलयानिल-समान्दोलित-हृदयत:
अभयसविनय-विजयमयसदय-प्रणयत:
युवगणा: शुभलक्ष्यचषक-निपान-निरता:
सर्वसमुदयमयपथे चलिता अविरता:

प्रकृति-कण-कण-धरणि–तृण–तृण–माधुरी सुखदा सखे !
जन–मनो नवयौवनोल्लसितं सखे !

अद्य नवलोल्लास–हास–विकास–वेला
प्रकृतिबालायाश्च राजति ललित–खेला
नवलमुत्साहं भरतु नवलो वसन्त:

प्रोद्भरतु नव–चेतनां ऋतुराज–सुषमेयं सखे !
जन–मनो–नव–यौवनोल्लसितं सखे !

आगतो नव–भारते नूतन–वसन्तो जन–मनो नवयौवनोल्लसितं सखे !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोक-समाचाराः

पंडितकोविदाः श्रीरघुवीरस्वरूपभट्ट-महाभागा दिवङ्गताः

श्रीगङ्गाधरभट्टः
सह-आचार्यः संस्कृतविभागे राजस्थानविश्वविद्यालयः, जयपुरम्

सखेदमिदमावेद्यते यत् प्राचीनभारतीय विविधविद्यापारङ्गता साहित्यधुरन्धराः भारतीयसंस्कृतिनिष्णाता भट्टरघुवीरस्वरूपमहोदयाः अमुष्मिन्नेव फर्वरीमासे ८ तारिकायां द्विषष्टिवर्षात्मकेऽल्पीयसि वयसि वर्तमानाः सहसा स्वर्लोकपथिकाः संवृत्ता इति। समादरणीयानां पण्डितवरेण्यानां तेषां जन्म भारद्वाजगोत्रलब्धजन्मनः प्रश्नवर ब्राह्मणकुलावतंसस्य श्रीगंगाधरभट्टमहाभागस्य गृहे १९१९ ख्रिस्ताब्देऽरावली पर्वतशृङ्खलानां क्रोडे वर्तमाने अलवरराज्ये जातम्। अलवरसंस्कृतमहाविद्यालये प्राध्यापकपदमलङ्कुर्वाणानां पण्डितरामचन्द्रभट्टमहाभागानां शिष्यत्वमधिगत्य व्याकरणस्य साहित्यस्य च एभिः अध्ययनं कृतम्। तथा च जयपुरस्थमहाराजसंस्कृतकालेजे संस्कृतविभागाध्यक्षपण्डितवरेण्य—श्रीमथुरानाथभट्टमहाभागस्य सान्निध्ये साहित्यशास्त्रस्यसम्यगध्ययनं विधाय साहित्याचार्यपरीक्षामुत्तीर्णवन्तः श्रीभट्टमहोदयाः। कवित्वशक्तिश्च श्रीभट्टवर्येषु बाल्यादेव प्रस्फुटिता अजायत।

एकादशवर्षात्मकेऽल्पीयसि वयसि दैवदुर्विपाकात् पितुः संरक्षणं परमेश्वरेणापहृतम् अत एतेषां जीवनमभावग्रस्तं बाधाकुलञ्च अवर्तत। बाल्यादेव संघर्षं कुर्वन् अनवरतेन परिश्रमेण दृढेन संकल्पेन च स्वजीवनयात्रायां नैरन्तर्येण प्रगतिपथपथिकोऽवर्तत भट्टमहाभागः। शैशवकालादेव कर्तव्यनिष्ठता, सम्यगाचरणशीलता चैषां जीवनस्य प्रमुखं वैशिष्ट्यमासीत्। हिन्दीसाहित्यस्य क्षेत्रेऽपि श्रीमतामगाधा रुचिरासीत् तस्य इदमेव प्रमाणं यदेभिः पञ्जाबविश्वविद्यालयस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभाकरपरीक्षा, प्रयागहिन्दीसाहित्यसम्मेलनस्य साहित्यरत्नपरीक्षा च समुत्तीर्णे। अलवरनगरे हिन्दीविद्यापीठनाम्नि विद्याविहारे हिन्दीविषयस्य निशुल्कमध्यापनमपि कृतम्। हिन्दीभाषायां लिखितं 'काव्यप्रभा, अलवरराज्येतिहासश्चेति मौलिकं ग्रन्थद्वयमेषां हिन्दीसाहित्यप्रेमाणं प्रथयति।

संस्कृतभाषायां रचितं 'रामवनगमनम्' नामकं रामकाव्यं हिन्दीभाषानुवादेन सह क्रमशः भारतीपत्रिकायां प्राकाश्यमनीयत। नैकासां पत्रिकाणां (विद्यालयीय) सम्पादनकार्यमपि श्रीभट्टेन सविवेकं सफलतापूर्वकञ्च विहितम्।

श्रीभट्टमहाभागैः त्रिंशद् वर्षाणि यावत् राजकीय प्रतापमाध्यमिकविद्यालये सहायकाध्यापकपदेऽध्यापनकार्यं कृतम्। सफलतापूर्वकं राज्यसर्वकारस्य सेवायाः कारणात् १९७२ तमे वर्षे अलवरशिक्षाक्षेत्रस्य राज्यस्तरीयः प्रथमः पुरस्कारः राज्यपालस्य करकमलाभ्यामुररीकृत इति महद् गौरवास्पदम्। एतेषां कर्तव्यभावना प्रशंसनीयसेवायाश्च भूरिशः प्रशंसामयं पुरस्कारः प्रख्यापयति।

सेवानिवृत्तेः पूर्वमेव राजकीय-उच्चमाध्यमिकविद्यालये बारां (कोटा) नगरे संस्कृतस्य वरिष्ठाध्यापकपदे भट्टमहाभागानां पदोन्नतिर्जाता। छात्रान् प्रति एतेषामगाधं प्रेमानेनैव स्पष्टीभवति यत् राजकीयप्रतापमाध्यमिकविद्यालये यः कश्चन छात्रः वैकल्पिक संस्कृतविषये सर्वोत्तमानङ्कान् लभते सः पञ्चाशद्रूप्यकपरिमितं पुरस्कारं प्राप्नोति। श्रीभट्टमहाभागेन प्रतिवर्षं पुरस्कारस्यास्य व्यवस्था गत १९७४ ख्रिष्ताब्दात् विधीयते। संस्कृतभाषायाः विकासो विस्तारश्च भवेदित्यासीदेतेषां लक्ष्यम्।

यस्मिन् देशे जनि र्लब्धा तस्यापि ध्यानमवश्यं भवेदिति भट्टमहोदयानामासीत् मन्तव्यम्। देशस्य हितायात्मापि प्रदेयः। देशस्य गतिविधीन् प्रति जागरूका इमे स्वतन्त्रता संग्रामे जनजागरणात्मके आन्दोलने कृष्णभवनातिथयः संजाताः।

श्रीभट्टमहाशयः परमईश्वरभक्त आसीत्। १९७९ ख्रिष्टाब्दस्य नवम्बरमासे श्रीभट्टः कैंसररोगेण नितरामग्रस्यत तथापि निरन्तरं विनोदप्रियतया स्मितपूर्वाभिभाषितयाचासाध्यरोगग्रहिलोऽपि कदाचिदपि खेदन्नाभजत। सर्वमपि सांसारिकं कार्यजातं प्रसन्नमुखमुद्रया समाप्ति नीतम् फर्वरीमासस्य ८ तारिकायां असारमिदं शरीरञ्च परित्यक्तम् परलोकगामी बभूव च। मरणसमये श्रीमतां पत्नी श्रीमती विद्यादेवी आनन्द-गोविन्द-माधव-राघवाश्चत्वारस्तनयाः स्तेषां सविधेऽवर्तन्त। चत्वारोऽपि पुत्राः द्वे पुत्र्यौ च नितरां सुयोग्याः। पुत्रैः मृत्युपर्यन्तं तेषामनवरतं सेवा परिचर्या विहिता इति तेऽपि धन्याः। श्रीभट्टः स्वस्य सात्त्विकेन जीवनेन सौम्येन व्यवहारेण च सर्वानपि स्वात्मानं प्रत्याचकर्ष।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवाञ्चाप्रतिमप्रतिभाभासुराणां कविवराणां श्रीरघुवीरभट्टमहाभागानां सहसा स्वर्लोकप्रयाणेन नूनमपूरणीयां क्षतिं मन्वानो महद्दुःखञ्चानुभवन् सोऽयं संस्कृतपरिवारः दिवंगतस्यात्मनो हृदयेन श्रद्धाञ्जलिमर्पयन् परमकारुणिकं जगदीश्वरं प्रार्थयते यत्सः तेभ्यः शाश्वतिकं सुखं प्रयच्छेत् तत्परिवाराय च असह्यं दुःखमिदं सोढुं शक्तिञ्च प्रदद्यात् ।

हा-हन्त ! कविराज-हरिवक्ष-जोशी........।

प्राणाचार्य-कविराज-काव्यसांख्यस्मृतितोर्थानां पंडितप्रवराणां श्रीहरिवक्षजोषीर्महाभागानां राजस्थानप्रांतस्यालवरनगरे ४-१-८१ तमे दिनांके स्वर्गवासोऽभवत् ।

एते महानुभावाः आयुर्वेदस्य मर्मज्ञाः सफलाः सुचिकित्सकाः आसन् । संस्कृतस्य प्रकाण्डपंडिताः कवयः शास्त्राध्ययनरताश्चावर्तन्त ।

एतेषां श्रीमद्भगवद्गीतायाः "हरिभाष्यम्"- नाम्नी टीका तथा च रासपंचाध्यायी भक्तिरसायनोपेताः "हरिप्रिया" नाम्नी टोकापि विद्वत्समाजे सुप्रसिद्धिगता । एतयोः रचनयोः धर्माचार्यैः विद्वद्भिः अनेकैः समाचारपत्रैश्च भूरि भूरि प्रशंसा कृता ।

कलिकातामहानगर्यां वसंतः श्री जोषीमहाभागाः श्रीमद्भागवतस्यानेकानि प्रवचनानि कृतवन्तः

स्वर्गवासात् पंचवर्षेभ्यः पूर्वमलवरे वसंति विर्दाधरे ! एतेषामायुषः ८२ तमोऽब्दः पूर्णतामगात् । अन्तिमे काले हरिभक्ति पुरस्कृत्यैव जीवनं समापयामासुः ।

एते महानुभावाः संस्कृतायुर्वेद-जगतः रक्षकाः आसन् । एतेषां क्षतिः अपूरणीया वर्तते । श्रीजोषीमहोदयानां आत्मशान्त्यै ईश्वरं प्रार्थयामः । शोकसंतप्तपरिवाराय चेश्वरः सहनशक्ति प्रदेयात् ।

एषां महाभागानां त्रयो विद्वांसः सूनवः सन्ति । आद्यन्ततोः कलिकातायामेव निवासः ! मध्यमपुत्रमहोदयाः डॉ० श्रीलक्ष्मीकान्तजोशीमहाभागाः अलवरे निवसंति ! अलवरस्थराजकीयसामान्यास्पताले वरिष्ठनेत्रचिकित्सकाः वर्तन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❖ राजस्थान प्रगति के पथ पर ❖

1 बीस सूत्री एवं पांच सूत्री कार्यक्रम के क्रियान्वयन से राज्य के चहुँमुखी विकास का कार्य प्रशस्त करना ।

2 राजस्थान नहर, चम्बल एवं माही आदि सिंचाई योजनाओं से हरित क्रान्ति का सूत्रपात।

3 सूखा संभाव्य एवं मरुक्षेत्रों का नियोजित विकास ।

4 अन्तर्राज्यीय परियोजनाओं में राजस्थान के हिस्से का पानी व बिजली प्राप्त करने के विशेष प्रयास। थीन बांध परियोजना से पानी एवं बिजली पाने की आशा ।

5 पेयजल समस्या को सर्वोच्च प्राथमिकता। छठी योजना के अन्त तक 24 हजार समस्या ग्रस्त गांवों में पेयजल पहुँचाने का दृढ संकल्प। हर वर्ष 5 हजार गांवों में पेयजल की व्यवस्था हेतु वृहद कार्यक्रम। चालू वर्ष में इसके अन्तर्गत 29 करोड़ रुपये का प्रावधान। इस वर्ष जब तक 1503 ग्रामों में यह सुविधा पहुँचा दी गई है व 1660 पम्प लगाये जा चुके हैं ।

6 ग्रामीण विकास योजनाओं के माध्यम से ग्रामीण क्षेत्रों का द्रुतगति से आर्थिक विकास। इस वर्ष 21 करोड़ रुपये का प्रावधान।

7 अनुसूचित जातियों, जन जातियों एवं पिछड़े वर्गों के लोगों के आर्थिक उत्थान व जीवन स्तर को सुधारने के भरपूर प्रयास। इन लोगों को विभिन्न सुविधाएं देने हेतु पहली बार 43.76 करोड़ रुपये का विशेष "कैम्पोनेंट प्लान"।

(राजस्थान सरकार द्वारा प्रसारित)

भारती के कतिपय प्रकाशन

१.	अम्बिकासूक्तम् संस्कृत हिन्दी टीका सहित	मूल्य २.५०
२.	गल्पकल्पलतिका (बालोपयोगिनी)	,, १.५०
३.	गोलनवाङ्कुरः (खगोलवर्णनम्)	,, २.००
४.	आयुर्वेदविशेषांकः	,, ५.००
५.	आरोग्याङ्कः	,, ५.००
६.	बालोपदेशमणिमाला (हिन्दी अनुवाद सहित)	,, ३.००
७.	सूक्तिसुधा (हिन्दी अनुवाद सहित)	,, २.००
८.	मातृस्तवनं (हिन्दीपद्यानुवाद सहित)	,, २.००
९.	आध्यात्मिकशिवायनम् (हिन्दीगद्यानुवादसहित)	,, ५.००
१०.	श्रीगुरुजीस्मृत्यङ्कः	५.००
११.	दुर्गासप्तशतीसर्वस्वम् (हिन्दीपद्यानुवाद सहित)	,, ५.००
१२.	भारतभक्तिस्तोत्रम् (हिन्दीगद्यानुवाद सहित)	,, १०.००
१३.	लघुकथासंग्रह (हिन्दीगद्यानुवाद सहित)	,, ५.००
१४.	शिवराज्योदयम् प्रथमखण्डः (सारसंक्षेपसहितः)	,, २०.००

व्यवस्थापक

भारती-संस्कृत-मासिक, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद-स्तम्भः—

आयुर्वेदीयं आत्मस्वरूपम्

वी० बी० नटराज शास्त्री, त्रिचिरापल्ली

पूर्वाऽनुवृत्तम्—

भावास्तेषां समुदयो
निरीशसत्वसंज्ञकः ।
कर्त्ता भोक्ता च न पुमान्,
इति केचिद् व्यवस्थिताः ।।

क्षणभङ्गवादिमतानुवादस्य अयमर्थः—य इमे शरीरे वर्त्तमानाः भावाः—धातवः सन्ति, ते प्रतिक्षणं प्रणश्यन्ति, अन्ये उत्पद्यन्ते च नबा नवाः पूर्वोत्पन्नधातुसमाः, ये उत्पन्ना धातवः त एव विद्यन्ते इति मननं असमोचीनम् । अथ यद् भाति उत्पन्ना धातव एव विद्यन्ते इति मननं असमीचीनम् । अथ यद् भाति उत्पन्ना धातव एव विद्यन्ते इति तत् । भग्नानां प्रजायमानानां च धातूनां तत्वतो भिन्नत्वेऽपि केवलं सारूप्यादेव निर्दिश्यन्ते त एवेति । इत्थं धातूनां क्षणिकत्वेन एकत्व—प्रतिसन्धानात् ज्ञानसन्ततिः अविच्छिन्ना भवति । अतो ज्ञानसमुदय एवायं देहः निरीशः—अन्यस्याप्यात्मरहितः, सत्वसंज्ञकः प्राणिवाच्यो भवति । (अत्र सत्वशब्दो न मनः पर्यायः, बौद्धभाषायां सत्वशब्दः प्राणि सामान्ये प्रयुज्यते) देहस्य कर्त्ता इति, फलस्य भोक्ता इति शरीरादन्यः कश्चित् आत्मा नास्ति, अनपेक्षितत्वात्, विनैव ज्ञानसन्तत्यैव निर्वाहात् । इति निरात्मवादिनः चारुवाकाः प्रत्यवतिष्ठन्ते ।

तान् खण्डयत्याचार्यः हेतुभिः—

तेषां अन्यैः कृतस्य अन्ये भावाः भावैः
नवाः फलं भुञ्जते ।
भुञ्जते सदृशाः प्राप्तं,
यैरात्मा नोपदिश्यते ।।

यैरात्मा नाङ्गीक्रियते, तेषां क्षणभङ्गुरवादिनां मते शरीरधातुभिः कृतस्य कर्मणः फलं तत्कर्तृभिः भोक्तुं न युज्यते न शक्यते, अकर्तृभिः अन्यैरेव उपभोक्तव्यं इत्यापद्येत । एतच्च असङ्गतम् । लोके अस्य फलमहं भोक्ष्यामीति मत्वा भाविफलभोगप्रत्याशया मनुष्यस्य कर्मसु प्रवृत्तिर्दृश्यते । न त्वन्यस्य फलभोग्यतां पश्यन् कश्चित् प्रवर्त्तते ।।

हे प्रत्यक्षप्रमाणमात्रशरणाः, प्रत्यक्षप्रमाणेनापि युष्मन्मतं असाधु इति प्रदर्शयति—

"करणान्यता दृष्टा कर्तुः,
कर्त्ता स एव तु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्त्ता हि करणैर्युक्तः
कारणं सर्वकर्मणाम् ॥"

कर्त्ता स्वचिकीर्षितकर्मणः अनुसारेण अन्यान्यकरणानि साधनानि गृहीत्वा कर्म करोति यथा शल्यवैद्यः व्रणशोथं छेत्तुं वृद्धियत्रं, शल्यं उद्धर्त्तुं बडिशं, सीवनार्थं सूचीं च गृह्णन् अन्यान्यानि कर्माणि करोति। अत्रायुधानामन्यान्यत्वेऽपि, कर्त्ता भिषग् एव भवति, इत्येतत् प्रत्यक्षम्। शरीरस्य करणस्य प्रतिक्षणं परिणामेन अन्यत्वात् अपरिणामिनं स्थायिनं विना कर्मनिष्पत्तिः अशक्यसंभवैव हि। अतः प्रत्यक्षेण करणात् अन्य कर्त्ता भोक्ता च आत्मा।

किञ्च, 'निमेषकालाद्भावानांकालः
शीघ्रतरोऽत्ययो।
भग्नानां न पुनर्भावः,
कृतं नान्यमुपैति च॥
मतं तत्त्वविदामेतद् यस्मात्,
तस्मात् स कारणम्।
क्रियोपभोगे भूतानां नित्यः
पुरुषसंज्ञकः॥

इतश्च अनात्मवादिनां मतं अशुद्धम्—शरीरधातूनां स्वाग्निना निरन्तरं परिपचनेन भग्नानां नैव भवति पुनर्भवः मृतानामिवेति, अयं अत्ययकालः अत्यन्तं अल्पः नेत्रनिमीलनोन्मीलनादपि शीघ्रतरः। यस्मादेवं तस्मात् पूर्वधातुकृतकर्मफलं उत्तरधातुं अन्यं नैव उपेयात् सर्वथा असम्भवात्। अतः भूतानां मनुष्याणां क्रियासु तत्फलभोगेषु च हेतुः सः नित्यः स्थिरः पुरुषः एवेति शरीरशरीरिविदां सिद्धान्तः अप्रकम्प्यः॥

युक्त्यन्तरेणापि आत्मास्तित्वं साधयति—

"अहंकारः फलं कर्म
देशान्तरगतिः स्मृतिः।
विद्यते सति भूतानां
कारणे देहमन्तरा॥"

अहंकारादयो मनोगुणाः, अतीतकर्मणः अनुस्मरणं, कर्म, तत्फलं च, इह पर्यंके स्वपतः पुंसः स्वप्नावस्थायां देहान्तरगमनं, 'देहान्तरगतिः' इति पाठे मृतस्थूलशरीरात् सूक्ष्मशरीरेण सह शरीरान्तरगमनं इत्येते सर्वे भावाः गुणकर्मात्मकत्वेन द्रव्याश्रिता एव उक्ताः एते भावाश्च चेतनेषु मनुष्येषु प्रतिदेहं प्रदृश्यन्ते। देहस्य जडत्वात् तेषां देहाश्रितानां अहंकारादिभावानां कारणं अर्थात् अधिष्ठानं देहमन्तरा अन्येन, तच्च चेतनेनैव भवितव्यम्, स आत्मा कर्त्ता भोक्ता चेति विद्धि।

इत्थं सति वस्तुतत्त्वे, प्रयोक्तार कारणं विना जडैः करणैः कर्माणि क्रियन्ते, तत्फलानि तु जडानि अन्यकरणानि उपभुञ्जते इत्येतत् निरात्मवादिनां मतं,

"मृगतृष्णाम्भसि स्नातः
खपुष्पकृतशेखरः।
एष वन्ध्यासुतो याति
मृगशृङ्ग-धनुर्धरः॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति वदतां वचनमिव तुच्छम् इति भावः ।

आत्मसत्ताविषये छिन्नसंशयः शिष्यते भूयः पृच्छति—

"प्रभवः पुरुषस्य कः ?" इति ।

अयं प्रश्नस्य आशयः—पुरुषस्य त्रैविध्यं श्रुतवतः शिष्यस्य कीदृशः पुंसः को जनक इति जिज्ञासा ।

समादधाति गुरुः कर्मजपरमपुरुषयोः तत्त्वस्वरूपवर्णनेन—

"प्रभवो न हि अनादित्वात्
विद्यते परमात्मनः ।
पुरुषो राशिसंज्ञस्तु
मोहेच्छा द्वेषकर्मजः ।।"

ये निर्दिष्टाः पूर्वं त्रिविधाः केवलः, षड्धातुकः राशिपुरुषः इति, तेषु यः केवलश्चेत नाधातुपुरुषः सः निर्गुणः परमात्मा इति स्मर्यते । तस्य परमात्मनः प्रभवः कस्माच्चिदपि उत्पत्तिर्नास्ति, यतः सः अनादिः, आदिः—उत्पत्तिः, आदिः न विद्यते यस्य अनादि सः । अनन्तश्च, देशकालवस्तुपरिच्छेदःशून्यः इति प्रमाणैः प्रसिद्धम् । यस्तु षड्धातुकः स एव धातूनां विस्तारेणैव राशिपुरुषसंज्ञां लभते । सगुणोऽसौ राशिपुरुषः अस्य जनकः कर्म । कर्म राशिपुरुषं कथं जनयति इत्याह मोहेति—मोहात् तमोगुणप्रभवात् रजः—प्रभवाभ्यां इच्छा द्वेषाभ्यां च पुंसः मोहेच्छा द्वेषाः जायन्ते, ततस्तदनुरूपा कर्मप्रवृत्तिः, प्रवृत्याः उत्पन्नौ धर्माधर्मौ पुरुषस्य शरीरं-जनयतः, धर्माधर्मोत्पन्नशुभाशुभकर्मफलं उपभोक्तुम् । इत्थं अयं राशिपुरुष एव स्वकृत-कर्मणो जायते "बुद्धिः कर्मानुसारिणी" इति अभियुक्तानां वाक् इह अनुस्मर्त्तव्या ।।

(क्रमशः)

अरुणा उद्योग

माइन आनर्स, रेंजिग कोन्ट्रेक्टर्स ट्रांसपोर्ट्स
बैंकर्स एण्ड कमीशन एजेन्ट्स

दूरभाष : ७३९२६
ग्राम अरुण उद्योग

हैड आफिस :
श्री राम भवन
किशनपोल बाजार, जयपुर–१

ब्रांच आफिस :
गांधी मार्ग, भद्रक (उडीसा)
स्टेशन मार्ग के सामने, जे० के० रोड़
(उडीसा)

वर्किग एट :

बाउला क्रोमाइट माइन्स एट : धानपुर जैपुर, जिला के उनझर (उडीसा)
केथपाल क्रोमाइट लाइन्स एटः बिरसल जिला धेनकानाल (उडीसा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

विश्वहिन्दूपरिषदः प्रान्तीयसंघटनमन्त्रिणा श्रीमोहनजोशीमहोदयेन जयपुरपत्तनस्थ-विशालामरापुराख्यस्थानप्रांगणे त्रिदिवसीयं प्रान्तीयकार्यकर्तृ सम्मेलनं (15 दिसम्बरतः 21 दिसम्बरपर्यन्तम्) धार्मिकसमारोहेण सहायोजितम्। उद्घाटनकर्त्तारः न्यायमूर्तयः श्रीमद्भगवतीप्रसादबेरीमहोदया दीपज्योतिषा लोकानामन्तर्निहितं धर्मं प्रकाशयन्तो विधितोऽपि तं विशिष्टमवोचन्। विश्वहिन्दूपरिषदो महामन्त्रिणा श्रीमाधवपाण्डुरंगदेग्वेकरमहाभागेन संघटनस्यावश्यकतां प्रदर्शयता मानवसमाजस्य श्रेयोविधानं व्यक्तिगतोपासनञ्च वास्तविको धर्मो निगदितः। अतएव धर्मोऽयं देशकालजात्यनवच्छिन्नोऽस्ति। एतदर्थञ्चानया परिषदा युगधर्ममवलम्ब्य कष्टग्रस्तानां पीडितानाञ्च जनानां सर्वथोद्धारार्थं यत्नो विधीयते। राजनीतिमुपेक्ष्य लोककल्याणाय ग्रामीणक्षेत्रेषु च चिकित्सालया विद्यालयाश्छात्रावासाश्च शतशः परिषदा संस्थापिताः। "धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः। तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत्। इत्यनुसारेण यद्यस्माभिर्देशस्य समाजस्य रक्षा विधेया र्तहि धर्मस्य रक्षा नितान्तमावश्यकी। प्राचीने काले भारतमिदं कियद्गौरवपदमालम्बते स्म—इति नातिरोहितं सर्वेषां देशवासिनाम्। अद्यतने काले च धर्ममुन्मुच्यास्माभिः स्वार्थसिद्धये कियानाडम्बरो नानुष्ठीयते येनाखिलमस्तव्यस्ततामुपगतम्। धर्मशब्दो हि न कदापि संकीर्णताबोधकः। स एव धर्मो यो विश्वस्यापि विश्वस्य हितसाधकः, अतो 'धर्मो विश्वस्य जगतः प्रतिष्ठा' इत्यपि संगच्छते।

त्रिदिवसीयेऽस्मिन् सम्मेलने द्वितीयस्मिन् दिने महिलासम्मेलनस्यायोजनं कृतम्। तत्र महिलासंघटनमन्त्रिमन्दाकिन्या कुमार्या यदुक्तम् बालकेषूत्तमसंस्कारा यथोत्पद्येरन् तथास्माभिः सर्वाभिरेव प्रयतितव्यमिति तदवस्तुत आवश्यकमेव। उपेक्षितस्य महिलावर्गस्याभ्युत्थानायापि विशेषतः प्रयतेतासौ परिषत् तदैवास्माकं देशस्य भाविनो बालाः सुसंस्कृता वस्तुतोऽन्वर्थनामानं कर्त्तुं सुशकाः भवेयुः। देशम्।

एतदन्तर्गतं तृतीये दिवसे विश्वसंस्कृतप्रतिष्ठानस्य राजस्थानप्रान्तीयसम्मेलनमभूत्। एतन्महामन्त्रिणा समुदीरितं यदस्माभिः संस्कृतज्ञैः सर्वैः सम्भूय तथा प्रयतनीयं यथेयं गैर्वाणी व्यावहारिकतामाश्रयेत् संस्कृ[illegible] चिरंजीवितुं शक्या स्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रान्तीयविश्वसंस्कृतप्रतिष्ठानस्याध्यक्षपदमलं कुर्वन्तो भूतपूर्वप्राच्यविद्याप्रतिष्ठाननिदेशकाः डॉ० ब्रह्मानन्दमहाभागाः संस्कृतस्य काठिन्यसारल्ये विषयाधीने लेखकाधीने वक्तृपरतन्त्रे च, निसर्गतो न तत्र काठिन्यं न सारल्यमित्यब्रुवन् किञ्च संस्कृतस्य गभीराध्ययनेनैतदीयनिधिरक्षणतत्परैः सुधीभिर्भवितव्यमित्यपि। महाराजसंस्कृत-महाविद्यालयस्य भूतपूर्वप्राचार्यैः श्रीगोविन्दनारायणशर्मभिः प्रतिपादितं यदस्माकं ग्रन्थेषु सर्वेऽपि विषया ज्ञानविज्ञानादयो विनिहिताः सन्ति तेषां ज्ञानमन्तरा सामाजिकाः स्वकीयान् बालान् संस्कृताध्ययनाय न प्रेरयन्तीति तद्विषया लघुपुस्तिकाकारेण हिन्दीभाषया निबद्धव्याः। तज्ज्ञानान्तरं तेऽवश्यमेव स्वबालान् संस्कृताध्ययनाय प्रेरयिष्यन्ति। विश्वसंस्कृतप्रतिष्ठानं प्रतिग्रामं प्रतिनगरं व्यापकं स्यादित्येतदर्थं सर्वैर्बद्धपरिकरैर्भूयेतेति प्रस्तावोऽपि तत्र पारितः।

परमहंसस्वामिशान्तिप्रकाशमहाराजैर्जगद्गुरुमाधवगौडेश्वराचार्यपुरुषोत्तममहाराजैश्च प्रवचनेन सह परिषच्चालितसेवाप्रकल्पानां कृते जनता प्रेरिताधिकाधिकदानाय। प्रवचनप्रभावादाप्तधनराशिना ज्ञायते यत्साम्प्रतिके कालेऽपि जनता धर्मरुच्या न व्युदास्ते। अतएव धर्मोऽस्माभिर्नितरां सेव्य एव। स च धर्मः संस्कृतज्ञानं विना न कथमपि प्रतिपत्तुं शक्यते। धर्मशब्दो हि रूढ्यात्मको न ग्राह्योऽपितु यत्र भारतीया संस्कृतिर्भारतीयमनुशासनं भारतीया नीतिश्चैतत्सर्वमेवौतप्रोतं तन्निष्ठसंस्कृतस्यावहेलनादेव भारतीयशासनसूत्रसञ्चालिका कापि परिषद् भारतीया जनता चानुशासनहीना यत्किञ्चिद्वादिनी यथाकथंचिद्वर्तिनी निर्मर्यादा सती सर्वा अपि स्थितीः संकिरति। इयानेव न सर्वोऽपि छात्रवृन्दोऽध्ययनशीलतां परित्यज्य विशृङ्खलो भूत्वा राष्ट्रमुद्वेजयति। ये च संस्कृतज्ञाः प्राक्कुलपतिसन्निधौ वसन्तो विद्याध्ययनोत्सुका बालास्ते स्वकीयमध्ययनं समाप्य गुरुणानुशास्यन्ते स्म। तेन हि ते स्वाध्ययनकाले गृहस्थाश्रमेऽपि चानुशासनेनैव सर्वथा वर्तमाना यावज्जीवं विनयावनता देशमिमं तस्यैव फलमासीत् पित्रोः गौरवास्पदतामानिन्यिरे। सेवानिरताः पत्नीञ्च लक्ष्मीरूपां मन्वानाः परिवारं पालयन्त उदारभावसंभृताः सर्वानपि सम्यक् शुश्रूषन्ते स्म रागद्वेषविहीनाः। अतः साम्प्रतमपि यदि संस्कृतभाषा समादृता स्यात् तर्हीयं विषमा परिस्थितिर्नापद्येत। एवं संस्कृतस्य प्रचारः प्रसारश्च करणीयः। सति च संस्कृतप्रचारे धर्मस्यापि निर्बाधतयाधिगतिः स्यादेव तत्प्रतिपादितत्वात् तत्र। एतद्द्वयसाहचर्येण निष्पन्ना संस्कृतिर्देशममुमुन्निनीषूः सम्पत्स्यते। अतः समाजसेविनीभिः संस्थाभिर्विद्यमानैः संघटनैश्चैतदर्थमवश्यं मनसा वाचा कर्मणा संस्कृतसंस्कृतिधर्मादिप्रोन्नतये सन्नद्धैः सर्वथा भूयेततराम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मान्धाता-अविनाशयो र्यज्ञोपवीतसंस्कारः

फरवरीमासस्य ९ तारिकायां वसन्तपञ्चम्यां, "भारती" संस्कृतमासपत्रिकाया॰ प्रबन्धसम्पादकमहोदयानां गृहे तत्पौत्रयो र्यज्ञोपवीतसंस्कार॰ सुसम्पन्नः। तदवसरे नगरस्य गण्यमान्या विद्वांसः, सम्भ्रान्ताः सामाजिकाः क्षेत्रीयप्रचारकाः मा० ब्रह्मदेवमहोदयाः समुपस्थिता आसन्। देशस्य विभिन्नप्रान्तेभ्य ये शुभकामनासन्देशाः सस्कृते हिन्द्याञ्च प्राप्ताः तेषु–पूजनीयाः बालासाहबदेवरसमहोदयाः, भाऊरावजी देवरसमहोदयाः मा० रज्जूभैय्या, मा० लक्ष्मणराव, इनामदार, मा० ठाकुररामसिंहजी, बाबू दिलीपचन्द जी गुप्त, बैरिस्टर नरेन्द्रजीतसिंह, मा० अमलकुमारवसु, मा० प्रकाशदत्त शर्मा, मा० जितेन्द्रवीर, मा० विमलकुमार चोरडिया, मा० उत्तमचन्द्र, मा० लक्ष्मणरावखरे, मा० ओमप्रकाश, मा० अशोक सिंहल, श्री अटलविहारी वाजपेयी, श्रीसुन्दरसिंहभण्डारी, श्री सतीशचन्द्र अग्रवाल, श्री सूर्यनारायण आसोपा, मा० प्रकाशदत्त भार्गव, बैरिस्टर नरेन्द्रसिंह, श्री ठाकुरदासटंडनप्रभृतयो विद्यन्ते।

१—पूर्वनियोजित कार्यक्रमानुसारं सरसंघचालकमहोदयाः भांबत्के मांगलिके कार्ये स्वयं समपस्थातुं सम्प्रति नार्हन्ति तेषां शुभकामनासन्देशो मया सादरं, सविनयं सम्प्रेष्यते।

—कृते–मु. कृ. चौथाईवाला

२—भवतां पौत्रयोः यज्ञोपवीतसंस्कारस्य निमन्त्रणं प्राप्य मोमुद्यते मे चेतः। शुभावसरेऽस्मिन्मम हार्दिकमभिनन्दनं स्वीकरिष्यन्ति....।

—अटलबिहारी वाजपेयी

३—सादरं प्रणतयः....अस्मिन् शुभावसरेऽपि समुपस्थातुं न शक्नोमि अतः शतशः क्षमां याचे। स्वीकुर्वन्तु भवन्तो मदीयाः शुभकामनाः।

—सुन्दरसिंहो भण्डारी

४—यज्ञोपवीतसंस्कारकार्यक्रमस्य निमन्त्रणमद्यैव प्राप्तम्। शुभावसरेऽस्मिन् कार्यवशान्नाहं समुपस्थितो भवामीति शतशः क्षमाप्रार्थी भवतामेव स्वकीयः।

सतीशः (सतीशचन्द्रअग्रवाल)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५—आयुष्मतोः....... श्रीमेधादक्षिणामूर्तिप्रसादेन सर्वविद्यापारंगमनिपुणो मेधाविलास सुखदीर्घायुष्ट्वं भूयादिति आशासे ।

—नटराज शास्त्री

६—प्राप्तः पौत्रयोः यज्ञोपवीतसंस्कारसंवादः । गृह्यतां मम अभिनन्दनानि । बटुकयोः शुभं भवतु । शान्तिरस्तु । तुष्टिरस्तु । ज्ञानमस्तु । विज्ञानमस्तु । सर्वत्र विजयमेवास्तु ।

—अमलकुमारशर्मा, कालिकातास्थः ।

७—बटुकौ सम्प्रति ब्रह्मचर्याश्रमे पदार्पणं करिष्यत स्तत् सम्बन्धिनियमाँश्च पालयिष्यतः.......। भगवत्कृपया मान्धाता-अविनाशौ यथा नाम तथा गुणौ भविष्यत इत्यहं कामये ।

—सूर्यनारायणः आसोपा ।

जगद्गुरु भारत की मान्यता

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मति र्मम ।।

योगिराज श्रीकृष्ण

शुभकामनाओं सहित

श्री बजरंग दाल एवं तेल मिल

गोवर्धनपुरा, कोटा (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसमाचाराः

श्रीकालीचरणभट्टाचार्यः
मन्त्री विश्वसंस्कृतप्रतिष्ठानम्
राजस्थानम्

विश्वसंस्कृतप्रतिष्ठानम्

दि० २१-१२-८०

दिसम्बरमासस्य एकविंशतितमे दिनाङ्के जयपुरनगरस्य अमरापुराश्रमे विश्वहिन्दूपरिषदः प्रान्तियाधिवेशनावसरे राजस्थानसंस्कृत-प्रतिष्ठानस्य प्रान्तीयसम्मेलनमभूत् । प्रान्तीय सम्मेलनस्य अध्यक्षतां आबूपर्वतस्य रामकृष्णसेवाश्रमस्य अध्यक्षाः श्रीमन्तः सन्तः भक्तानन्दस्वामिनः अकुर्वन् अधिवेशनेऽस्मिन् प्रान्तस्य विभिन्नेभ्यः मण्डलेभ्यः निमंत्रिता विद्वांसः भारती सम्पादका राजकीयमहाराज-संस्कृतमहाविद्यालय भूतपूर्वाः संस्कृतविभागाध्यक्षाः श्रीमन्तो जगदीशशर्माणः समुपस्थिताः आसन् ।

अस्मिन्नवसरे विश्वसंस्कृतप्रतिष्ठानस्य महामन्त्रिणः प्रांध्यापकपदवाच्या श्रीमाधव-पाण्डुरङ्गडेरवेकरमहोदयाः विद्वद्भ्यश्च विन्यवेदयन् यत् भवद्भिस्तथा प्रयतितव्यं यथा इयं भाषा व्यवहारिकी भवेत् । यतो हि अनया एव सस्कृतभाषया वयं भारतीयां संस्कृतिं चिरञ्जीवयितुं शक्नुमः ।

अस्मिन्नवसरे राजस्थान-विश्वसंस्कृत प्रतिष्ठानस्य अध्यक्षाः प्राच्यविद्याप्रतिष्ठानस्य भूतपूर्वाध्यक्षाः श्रीमन्तः डाक्टरपदवाच्या ब्रह्मानन्दमहोदया विदुषः सम्बोधयन्तः अघोषयत् यद् संस्कृतस्य गहनाध्ययनं कृत्वा अत्र-स्थितं निधिं सर्वे साक्षात् कुर्युः । अतः सर्वे संस्कृतविद्वांस अस्यां दिशि प्रयतेरन् । तदनु राजकीयमहाराजसंस्कृतमहाविद्यालयस्य भूत-पूर्वप्राचार्याः श्रीमन्तः गोविन्दनारायण-शर्माणः प्रस्तावरूपेण सभायां संस्कृतस्य विभिन्नविषयाणां लघुपुस्तिकानां प्रकाशनाय सर्वान् सतर्कं प्राबोधयन् । सभायां विश्व-संस्कृतप्रतिष्ठानस्य प्रान्तीयमन्त्रिणः डाक्टर-पदवाच्याः श्रीमन्तः शिवकुमारमिश्रमहोदयाः स्वरचितकाव्यं श्रावयन्त संस्कृतस्य अधुनापि नवीनरचना सामर्थ्यं प्रादर्शयत् अस्मिन्नवसरे दौसासंस्कृतमहाविद्यालयस्य भूत-पूर्वप्राचार्य श्रीकन्हैय्यालालमहोदयः डा० श्री-सुभाषतनेजामहोदयः अन्ये च विद्वांसः सभां समबोधयन् । प्रोफेसरपदवाच्या मन्दाकिनी-दाणी, तथा डाक्टरपदवाच्या श्रीमती रमा-दाधीचमहोदया अपि स्वकाव्यपाठमकुरुताम् । तदनु सभाध्यक्षाः श्रीमन्तः भक्तानन्दस्वामिनः प्रत्यपादयन् यत् कथं संस्कृतं राष्ट्रजीवनस्य कृते आवश्यकं कथं चेयं भाषा भारतीयां संस्कृतिं विश्वव्यापिनीम् अकरोत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

मान्याः महोदयाः

प्रतिदिनं संस्कृतशिक्षायाः परम्परायाश्चः ह्रासमुपलक्ष्य विश्वविद्यालयानुदानायोगस्य आंशिकसाहाय्येन एकमखिलभारतीयसंस्कृतसम्मेलनं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन आयोजयिष्यते। सम्मेलनेऽस्मिन् संस्कृतशिक्षायाः भविष्यम्, शास्त्राणां प्रौढ़पाण्डित्यस्य संरक्षणोपायाः, पारम्परिकशिक्षायाः संस्कृतेश्च गौरववर्धनाय कीदृशी संस्कृतशिक्षापद्धतिरवलम्बनीयेति विषयमवलम्व्य विविधाः विचाराः संप्रवर्तिष्यन्ते। एतेषु वादेषु भागग्रहणाय सर्वे संस्कृतानुरागिणः प्रार्थ्यन्ते, आहूयन्ते यत्त उपर्युक्तेषु विषयेष्वेकं विषयमवलम्व्य यथाशीघ्रं स्वनिवन्धं प्रेषयन्त्विति।

१९८१ वर्षीयफरवरीमासस्य २६, २७, २८ दिनाङ्केषु संपत्स्यमानेऽस्मिन् सम्मेलने भवन्तः स्वीयागमनेन सहयोगं विधाय अनुगृह्णन्त्विति। भवतां गमनागमनाय यात्राव्ययो न प्रदास्यते।

(श्रीमहाप्रभुलाल गोस्वामी)
आचार्याध्यक्षश्च
तुलनात्मकधर्मदर्शनम्
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तक-समीक्षा:—

प्रधानसम्पादक:

वामनविजयनामकमेकाङ्किनाटकं लोचनपथमुपयातम् रचयिता च विद्वद्धौरेयो विविधोपाधिसमलंकृतो विश्वनाथमिश्रः पूर्वोत्तरप्रदेशवास्तव्यो बीकानेरस्थ शार्दूलविद्यापीठ प्राचार्यः। कथानकङ्चात्र पुराणेतिहासादिनिबद्धमपि प्रसिद्धमाबालवृद्धं लोके। दशदृश्यात्मकमिदं सरलया प्रवाहमय्या भाषया निबद्धतया दर्शकानां पाठकानाञ्च मनोरञ्जकम्। रचयित्रा लोकोद्वेजकाः शान्तिविघातका वा ये केऽपि भवेयुस्ते छलेन बलेन नीत्या वा कथमपि जेतव्या एवेति प्रदर्शितम्। स्वकार्यसिद्धये च जनेन लघुनापि भवितव्यान्न तत्र कोऽपि उच्चावचावमर्शो विधातव्यः। दुःखितानां दुःखनिस्तारो यथा कथमपि कर्त्तव्यमेवेत्येतस्य मुख्यं लक्ष्यं वर्तते।

प्रारम्भे मंगलाचरणेन नाटकोपयोगिनो नटराजस्य स्तुतिर्विहिता।

द्वितीये दृश्ये च प्रेक्षावत्प्रवृत्तये प्रयोजनं प्रतिपादितम्।

तृतीय-दृश्येन च सङ्कटापन्नायां स्थितौ मन्त्रणायाः आवश्यकता निर्दिष्टा। सत्याञ्चावश्यकतायां कस्यापि विशिष्टस्य जनस्य आशीरेवापेक्षिता तन्निर्दिष्टपथेन क्रियमाणं कार्यमवश्यमेव फलवद्भवतीति।

चतुर्थे दृश्ये शुक्राचार्यनिर्दिष्टविश्वजिद्यज्ञानुष्ठाने प्रवृत्तो बलि प्रतिजानीते यत् कोपि प्राणी याचकत्वेन समुपैति मत्सम्मुखं नाऽहं तं निराशं निवर्तयिष्ये।

पञ्चमे च बलिनोपद्रुता देवा उपायान्तरमनवलोकयन्तः सुरगुरोराज्ञया नारायणम् उपजग्मुः।

षष्ठे च मन्त्रिगणसमवेतो बलिर्यदा मन्त्रणानिरतस्तदैव भृगुरागत्याश्रमनिर्माणाय स्वल्पां भूमिं याचते। स च तस्मै तदर्थं शतङ्ग्रामान् ददाति।

सप्तमे दृश्ये च बलित्रस्ता देवा नारायणमुपगम्य स्वकीयां विषमां स्थितिं वर्णयन्ति। स च तान् आश्वासयति कश्यपगृहजन्मनात्मनः।

अष्टमे चाष्टवर्षदेशीयो बालो भूत्वा कश्यपाश्रमे समायाति। सर्वे देवा मुनयश्च ब्राह्मणानुरूपं वेषमादधति तस्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतदनन्तरदृश्ये वामनो बलिसभां प्रवेष्टुकामः शुक्रेण विदितो बलये बोधितः। छलिनं विज्ञाय दानाय बलिं निषेधति। परं बलिराजः कथमपि स्वप्रतिज्ञायाः न प्रच्यवते।

अन्तिमे दृश्ये वामनस्त्रिपदां भूमिं याचते। प्रतिज्ञायामपूर्णायां बलिं बद्धुम् आज्ञप्तो वैनतेयः। परिहसति तस्मिन् स्वप्रतिज्ञां पूरयितुं दैत्यराजः स्वशिरसि पदन्यास-प्रार्थनया प्रतिश्रुतं पूरयति।

अतिवर्जनं सर्वत्र शुभाशुभकार्येषु कार्यमन्यथा भवति विपरीतं फलम्। एवञ्च आत्मशक्तेर्दुरुपयोगो गर्वश्च तस्याः कदापि न विधेयाविति। प्रतिज्ञायाः विलोपश्च सङ्कटापन्नायां स्थितावपि न करणीयः शिक्षयतीदं सर्वान्।

एतेनाद्यतनाः सांसदा विधायकास्तदितरे नेतारोऽपि सम्यक् प्रबोधिताः।

दृश्यञ्चैतत्सर्वैरपि संस्कृताभिज्ञैरन्यैश्चाभिनीयमवश्यं द्रष्टव्यं दृष्ट्वाचैतदनुकूलमाचरणीयम्।

एतदवसानानन्तरं कथात्रयं भारतीप्रबन्धसम्पादकेन श्रीगिरिराजशास्त्रिणालिखितमेतदीयार्थसमर्थनायालम्।

सावधानतया पठितमेतत्त्रयमनुत्साहिषूत्साहसन्धुक्षणाय प्राणवर्जितेषु प्राणसञ्चाराय कल्पेत नूनम्। उभयोलेखकयोरुद्देश्यमेकमेव दुष्टाः निग्राह्याः सर्वथा न त उपेक्षणीया वर्धमानागदा इवोत्तिष्ठन्तो हिताकाङ्क्षिभिर्लोकानामिति।

मुफ्त ! मुफ्त !! मुफ्त !!!

सफेद दाग

अगर आप सफेद दाग या किसी प्रकार के चर्म रोगों से परेशान हैं तो चिन्ता न करें। आप हमारे यहां से दो पाकेट लगाने की विजय बूटी मुफ्त मंगाकर केवल ५ दिनों में लाभ प्राप्त करें। रोग विवरण लिखें।

सफेद बाल

मैं अधिक प्रशंसा करना नहीं चाहता, हमारे आयुर्वेदिक "केश कान्ति" तेल से बालों का पकना रुक कर सफेद बाल काले हो जाते हैं। मूल्य १०) तीनशीशी २७) रु०।

हिन्द आयुर्वेद भवन, (B. H. 579) पो० कतरी सराय (गया)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मादक द्रव्यों का व्यवहार जीवन को दुःखद बना देता है। यहां तक कि त्योहारों की सरलता को बीभत्सता में बदल देता है। इस दुर्व्यसन का अन्त ही कल्याणकारी है। इस दिशा में जो भी प्रयत्न होगा वह सदैव प्रशंसनीय है।

—स्व० डा० सम्पूर्णानन्द, भूतपूर्व मुख्यमंत्री (उत्तर प्रदेश)

कांग्रेस और देश के सभी विचारों के लोग नशाबन्दी के पक्ष में एक मत हैं। हमारे धर्म आचार विचार और सामाजिक व्यवस्था सभी नशाबंदी के पक्ष में है। हमारा कर्तव्य है कि सामाजिक उन्नति के इस पवित्र आंदोलन में संलग्न हो जायें और सारे सूबों में नशाबन्दी योजना को चालू करने का मार्ग तैयार करें।

—स्व० पंडित गोविन्द वल्लभ पन्त स्वराष्ट्र मंत्री भारत

यह तो हद दरजे की बेवकूफी और नालायकी है कि अपना रुपया खर्च करें और बदले में सिर्फ बेहोशी और बदहवासी हाथ लगे। —तिरूवल्लुवर

अन्तर्गतमलोदुष्टः तीर्थस्थानशतैरपि ।
न शुद्ध्यति यथाभाण्डं सुराया दाहितं च यत् ।।

—चाणक्यनीति दर्पण अ० ११ श्लोक ७ ।।

जिसके हृदय में पाप घर कर चुका है वह सैंकड़ों बार तीर्थ स्नान करके भी शुद्ध नहीं हो सकता। जैसे कि मदिरा का पात्र अग्नि भुलसने पर भी पवित्र नहीं होता।

आगारदाही मित्रं यः शाकुनिर्ग्राममयाजकः ।
रुधिरान्धे पतन्येते सोमं विक्रीणते चः ये ।।

—श्री विष्णुपुराण अध्याय ६ श्लोक २२

घर में आग लगाने वाले, मित्र की हत्या करने वाले, शकुन आदि बताने वाले, ग्राम पुरोहित तथा मदिरा बेचने वाले ये सब रुधिरान्ध नरक में गिरते हैं!

पंजाबी चन्दू हलवाई करांचीवाला

कार्यालयः—१८५, बालकेश्वर रोड, तीनबत्ती, बम्बई—४००००६

स्थापना—१८९६ शाखायें :— तारका पताः—'चन्दूसेवा'

(१) जवेरी बाजार (२) ग्रान्टरोड (३) कोलावा (४) दादरा (५) वरली नका (६) सायन सर्कल (७) ठाकुरद्वार (८) सूर्योदयस्टोर्स, चर्चगेट (९) घाटकोपर (पश्चिम) (१०) लिंकिंग रोड, (११) रेलवे स्टेशन के सामने, सांताक्रुज (पश्चिम)

कारखाना :—चन्दू भवन, ग्रान्टरोड, बम्बई—४०००७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारी-स्तम्भः

भारतीयानार्यों विश्वस्य नेतृत्वं कर्तुं समर्थाः

डॉक्टर श्रीमती श्रीराजेश्वरीभट्टः
लालबहादुर शास्त्री कालेज, जयपुर

महिलाजागरणाय भारतीया नार्यः पूर्णतः सक्रियाः विद्यन्ते। कार्यजातं प्रति समर्पणस्य भावनापि भारतीयमहिलासु पूर्णतः प्रतिष्ठिता। एताः किमपि कर्तुं वाञ्छन्ति। ग्रामेषु नारीणां स्थितिरपि निरन्तरं विकासोन्मुखा वर्तते। ताः सर्वाणि कार्याणि समस्यानिदानात्मकप्रणाल्या कुर्वन्ति। उदाहरणार्थं—यदा कस्या अपि गावो महिष्यो वा रोगग्रस्ता भवन्ति तदा ताः अन्याभिर्नारीभिः सह वार्तालापं कृत्वा निश्चिन्वन्ति केनौषधेन पशूनां रोगनिवारणं भविष्यति। भारतीयमहिला भारतस्यार्थिकविकासे स्वकीयं योगदानं कुर्वन्ति। ताः प्रातःकालादारभ्य किमपि कार्यं कुर्वन्ती तिष्ठति। समयस्य पूर्णोपयोगं कुर्वन्ति ताः। तासु क्षमता वर्तते। सम्प्रति सर्वेषु कार्यक्षेत्रेषु, सर्वेषु व्यवसायेषु ताः परमकौशलेन कार्यं सम्पादयन्ति। गृहेऽपि ताः गृहलक्ष्मीपदे प्रतिष्ठिता गृहस्य सञ्चालने महत्त्वपूर्णं योगदानं कुर्वन्ति। विश्वस्मिन् विश्वे भारतीया नार्यो परमां प्रतिष्ठां समुत्कृष्टं गौरवञ्च समधिगच्छन्ति।

महिला जागरण के लिए भारतीय नारियां पूरी तरह सक्रिय हैं। प्रत्येक कार्य के प्रति उनमें समर्पण की भावना पूर्णतः विद्यमान है। ये कुछ करना चाहती हैं। गांवों में भी भारतीय नारियों की स्थिति उत्तरोत्तर विकासोन्मुख दृष्टिगोचर होती है। वे सभी कार्यों को समस्या निदानात्मक पद्धति से करती हैं यदि किसी की गाय या भैंस बीमार हुई तो वह अन्य महिलाओं से पूछ कर यह निश्चय कर लेंगी कि अमुक औषधि से रोग का निवारण हो सकता है।

भारत की नारियां भारत के आर्थिक विकास में अपना पूरा योगदान करती हैं। वे कभी खाली नहीं बैठती। कुछ न कुछ करती रहती हैं। वे समय का पूरा सदुपयोग करती हैं। उनमें क्षमता है। आजकल वे सभी कार्यक्षेत्रों में, सभी व्यवसायों में परम कौशल से अपना काम सम्पन्न कर रही हैं। घर में गृहलक्ष्मी के रूप में वे सभी कार्य सम्पन्न कर परिवार के कुशल का ध्यान रखतीं हैं। भारतीय महिलाओं में नेतृत्व की क्षमता है। वे विश्व का मार्गदर्शन कर सकती हैं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आइए 1980 की नींव पर 1981 का निर्माण करें

तेजी से बढ़ती हुई मुद्रा स्फीति को 1980 में रोका गया और कोयले, पॉवर, औद्योगिक उत्पादन और खाद्यान्न में भी महत्वपूर्ण वृद्धि हुई। इससे पहले कि समाज का कोई भी अंग देश की सम्पदा में से ज्यादा हिस्से की मांग करे।

अब समय है,
अपनी उपलब्धियों को
संजोये रखने का
और
उत्पादन बढ़ाने का



कठिन परिश्रम और आत्मसंयम ही हमारा नारा है।

अधिक जानकारी के लिए 'नए निश्चयों का वर्ष' एक प्रति मुफ्त मंगाएं
इसके लिए लिखें : वि० दृ० प्र० नि० संसद मार्ग, नई दिल्ली-110001

davp 80/453

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधुनिकभारतीयभाषासु संस्कृतशब्दावली गवेषणा

आधुनिकभारतीयभाषाणां तत्समतद्भवशब्दसंचयेन तत्क्षेत्रविशेषाय संस्कृतपाठ्यक्रमविकासपरियोजना

श्रीगयाचरणत्रिपाठी, इलाहाबाद

आधुनिके संदर्भे संस्कृतशिक्षणस्य नूतनसरलसरणेर्विकासो भृशमपेक्षत इति बहुतिथेन कालेन सर्वैः शिक्षाविद्भिर्वारंवारमुच्यते । परमस्य विकासस्य कः खलुः आधारो भवेत् का च दिशा स्यात्, अर्थात् सरलीकरणं कथं सम्भवीति विषयोऽद्यापि अस्पृश्यतामेव भजते । न हि निषेधमात्रेण विधेयसिद्धिः शक्या कर्तुम्, न वा कतिपयेषां वाक्यानां शुकरटनेन लक्ष्यपूर्तिः सम्भवति । तद्यथा कतिपये विद्वांसः संस्कृतसंस्थाश्च शिविरयोजनेन तथा कुर्वंते । परंच अकरणान्मन्दकरणं श्रेयः इति, न्यायेन तेषां विदुषां तासां संस्थानां च, संस्कृतस्य प्रचार-प्रसारहेतवे कृतः क्रियमाणः करिष्यमाणो वा सर्वविधः प्रयासः सर्वथा स्तवनीय एव ।

इतो देशस्वातन्त्र्योपलब्धेरनन्तरं विद्यालयेषु, विश्वविद्यालयेषु संस्कृतसंस्थासु च यत्र खलु संस्कृतशिक्षार्थिनां संख्या सततं समेधमाना वरीवर्त्ति तत्रैव जनसमाजेऽपि नैकस्तरीयाः संस्कृतजिज्ञासवः संस्कृतस्येव माध्यमेन धार्मिकाध्यात्मिकसाहित्यिकाकाङ्क्षी परिपूरयितुमाकाङ्क्षन्ति । अतः परम् आधुनिकभारतीयभाषाणां समृद्धौ अभिनवपारिभाषिकशब्दावलीनिर्माणे चैतस्य यद् योगदानम्, तदप्यतिरोहितं समेषां सुधीमतां भाषातत्वविवेचनैकव्रतिनाम् ?

नूनमेतानि बहुद्देशीयलक्ष्याणि निभाल्येव केन्द्रीयशिक्षा-संस्कृति-मंत्रालयेन 'राष्ट्रियसंस्कृतसंस्थानद्वारा संचालिते गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठ, प्रयागे भाषानुभागः संस्थापितः । अस्यानुभागस्य मुख्यमुद्देश्यं संस्कृतस्य सार्वदेशिकप्रचारप्रसाराथ तस्य सरलीकरणमेव ।

सम्प्रति एतस्मिन् भाषानुभागे प्राचार्य डॉ० गयाचरणत्रिपाठिनोऽध्यक्षतायां सरलीकरणमभिलक्ष्य योजनाद्वयं प्रचलति । तत्राद्या तावत् आधुनिकभारतीयभाषाणां तत्समतद्भवशब्दावलीनां संचयनम्, अपरा चानया शब्दावल्या तत्तत्क्षेत्रविशेषस्य कृते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतस्याभिनवः सरलपाठ्यक्रमनिर्माणम् । तत्र प्रथमयोजनायामिदानीं पंजाबीभाषायाः तथोक्ताः शब्दाः संचीयन्ते । एतेषु चतुः सहस्रपरिमिताः शब्दा गताब्दे एव संचिता येषां प्रमाण्यं परीक्षितुं गतमार्चमासस्य दशमदिनांकादारभ्याषोडशदिनांकं दिल्लीविश्वविद्यालयस्य परिसरे डॉ० हरभजनसिंहस्याध्यक्ष्ये एका विचारसंगोष्ठी समायोजितासीत् ।

ऐषम उक्तशब्दसंचयनयोजनायां पंजाबीभाषायाः संस्कृतमूलकानामितरेषां त्रिसहस्रसंख्याकानामभिनवानां शब्दानां शब्दपत्रेषु समालेखनं समजनि । तत्र प्रत्येकस्मिन् शब्दपत्रे-गुरुमुखीलिप्यां पंजाबीशब्दः, तस्य व्याकरणव्यवस्था, वारवारता, रोमनदेवनागरीलिप्योर्द्वर्न्यङ्कनम्, मूलसंस्कृतशब्दः, तस्य लिंगादि-व्यवस्था, हिन्दीभाषायामर्थश्चोल्लिखिताः सन्ति । इदमत्रावधेयम् अस्यां शब्दावल्यां त एव शब्दाः स्थानं लब्धवन्तः ये खलु संस्कृतमूलकाः सन्त इदानीमपि संस्कृतेनार्थसाम्यं दधते । संस्कृतात् विकसितानां येषां हि पंजाबीशब्दानां संप्रति संस्कृताद् भिन्नोऽर्थः, न खलु ते संगृहीताः । एवमेव तेषामर्थप्रदर्शने हिन्दीभाषायास्त एव शब्दाः प्रत्ताः, ये नूनं तेभ्यो मूलशब्देभ्यो विकसिताः । सन्ति । एवं च शब्दपत्रेषु शब्दानां संचयनं सर्वथा भाषावैज्ञानिकं समस्ति ।

अपरस्यां पाठ्यक्रमविकासयोजनामैषमः पंजाबीभाषाभाषिणां छात्राणां संस्कृतजिज्ञासूनां चोपयोगार्थं विनिर्मितं पाठ्यक्रमस्य प्रथमं प्रारूपमेकः संस्कृतस्य । अस्याधारेण पाठमालां विकासयितुं संस्कृतस्य अतिप्रचलितानाम् उक्तशब्दावलीसंगृहीतानां कतिपयेषां शब्दानां धातूनां च संकलनमपि विहितम् । एतएव शब्दा धातवश्च पाठमालाया आधारभूता भविष्यन्ति । शब्दान् धातूंश्च पंजाबीभाषाभाषिणः सारल्येन ग्रहीष्यन्ति, यतोहि यत्किंचित् परिवर्त्यैतानन्नुदिनं व्यवहरन्ति ते । एवंच शब्दज्ञानेऽनायाससाध्ये सति ते व्याकरणज्ञानेऽधिकं कालं दातुं प्रभविष्यन्ति । फलतः भाषाज्ञाने समयाल्पता सरलता च समायास्यति ।

भाषानुभागो नवीनशब्दान् संकलय्य पाठ्यक्रम एव प्रथमप्रारूपं च निर्माय एतयोः प्रमाण्यमाधातुमना पंजाबीसंस्कृतोभवभाषावगाहिणी विदुषां वैचारिककार्यगोष्ठी-समायोजनमावश्यकममंस्त । ततः प्राचार्यस्य रुचिपूर्णसंस्तुत्या उत्साहपूर्णसंयोजनेन च अस्यैव विद्यापीठस्य परिसरे गताशीतिवर्षीय दिसम्बरमासस्य पंचदशदिनांकादारभ्य आविंशं षड्दिवसीया वैचारिकी कार्यगोष्ठी समपादि ।

तत्र संगोष्ठीप्रथमेऽह्नि पूर्वाह्णे दशवादने समुपस्थितानां समेषां विदुषां परिचयानन्तरम् अमृतसरनगरीयगुरुनानकदेवविश्वविद्यालयस्य भूतपूर्वपंजाबीविभागाध्यक्षेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्य डॉ० प्रीतमसिंहेन संगोष्ठी वैधानिकमुद्घाटिता । समारोहस्यैतस्यानुमंगलाचरणं विभागीयेन प्रवाचकेन श्रीशिवकुमारमित्रेण स्वकीये संयोजकीयवक्तव्ये समुपस्थिता भागग्रहीतारो विद्वांसः स्वागतेनाभिनन्दिताः । ततः विद्यापीठस्य प्राचार्यो विभागीययोजनाद्वयमनुभागिनः विदुषः परिचाययितुं व्याख्यानविस्तरं प्रास्तौत् । स्वकीये विषयबहुले व्याख्याने तेनोक्तम्, आधुनिकभारतीयभाषासु संस्कृतस्य प्रायोऽशीतिप्रतिशतमिताः शब्दा अस्माभिर्नित्यं लेखने पठने व्यवहारे च प्रयुज्यन्ते । नैतावदेव, अद्यत्वे भारतस्य प्रायः सर्वेष्वपि राज्येषु आधुनिकविज्ञाने राजनीतौ च प्रयोगार्थं निर्मायमाणायाः पारिभाषिकशब्दावल्याः प्रमुख आधारः संस्कृतमेव । अस्मिन्नेव तद्विज्ञानं निहितम् येनानन्ता नवाः शब्दा निर्मातुं शक्याः । इदं विज्ञानं कुत्राप्यन्यत्र भाषायां सुदुर्लभम् । इदमेव तथ्यं फ्रेंचभाषोदाहरणेन परिपोषयता तेनोक्तम् यत् टंकणयन्त्रस्य कृते फ्रेंचभाषायां न हि कोऽपि एकः शब्दो भवितुमर्हति । ते हि एनं 'मशीन लिखने की' इत्यनेन वाक्यभूतेन शब्देनाभिदधति । अंग्रेजीभाषाया मूलस्रोतसि लैटिने यद्यपि सन्ति नाम कतिपये धातवः, उपसर्गाः, तथापि पाणिनीयं प्रकृतिप्रत्ययविज्ञानं किमप्यपूर्वं सर्वथा तुलनां नार्हतीति दृष्टचरं भाषानयनिपुणानाम् । सहस्रद्वयाधिकैर्धातुभिरेकसहस्रमितैः प्रत्ययैश्च भरभरिता भाषेयं जागतिकमर्थजातमभिव्यङ्क्तुं सर्वतोभावेन समर्था किल । ईदृक्षान् विचारान् प्रस्तूय प्राचार्योऽस्यां संगोष्ठ्यां विचारणीयं विषयं प्रति प्रतिभागिनां ध्यानमाकृष्टवान् । ततः विभागीयः प्राध्यापकः श्री आजादमित्रो गतगोष्ठीप्रतिवेदनं प्रतिभागिविदुषां पुरस्तात् प्रस्तुवन् शब्दपत्रीयविन्दूनां संशोधने विगतगोष्ठीस्वानुभवमप्युपातिष्ठपत् ।

एतत्संगोष्ठीमानार्हनिदेशकः समारोहाध्यक्षश्च आचार्यडा०प्रीतमसिंहः स्वानुभवपूर्णोदाहारैः पंजाबीभाषायाः संस्कृतेन निकटतरः सम्बन्धः स्थापितवान् । तेनोक्तम्, पंजाबी भाषाद्यत्वे पुनः संस्कृतोन्मुखी जाता । अपभ्रंशरूपाणि संस्कृत्य व्यवहाराचारः प्रचलितः । इदमेव कारणं यथा संस्कृतस्य पदादिः 'व' ध्वनिः 'ब' रूपं परिहाय पुनरद्यत्वे 'व' रूपे परिवर्तितः । अध्यक्षीयभाषणे तेन शब्दावलीसंकलनं पाठ्यक्रमविकासश्चेति योजनाद्वयमपि राष्ट्रियैकतासंसाधने सबलं सहायकं संसाधितम् ।

वैचारिककार्यगोष्ठ्यामस्यां विभिन्नविश्वविद्यालयानां महाविद्यालयानां गुरुकुलमहाविद्यालयानां शिक्षासंस्थानां च विद्वांसो विशेषज्ञा भागमग्रहीषुः । तेषु सर्वे श्रीडा०प्रीतमसिंहः, भूतपूर्वोऽध्यक्षः, गुरुनानकदेवविश्वविद्यालय, अमृतसरस्य, डा० ओमप्रकाशवशिष्ठः प्रवाचकः इंगलिश-पंजाबीकोशपरियोजनायाः, पंजाबीविश्वविद्यालयः चण्डीगढ़स्य डा० अजमेरसिंह व्याख्याता पर्वोक्तविश्वविद्यालयस्यैव डा० वेदप्रकाशशास्त्री भूतपूर्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचार्यः, डा० भक्तवत्सलमोहले व्याख्याता, सामाजिकविज्ञान एवं मानविकी विभाग, ए० सी० ई० ग्रार० टी०, नवदेहलीस्थः ग्राचार्य श्री विद्यानिधिपाण्डेयः, नवदेहलीस्थः, ग्रस्यविद्यापीठस्य डा० ब्रह्ममित्र ग्रवस्थी, प्रवाचकः डा० किशोरनाथझा, प्रवाचकः, डा० राघवप्रसादचौधरी, व्याख्याता, डा० जगन्नाथपाठकः, व्याख्याता, इत्येते विद्वांसः प्रमुखा ग्रासन् ।

उद्घाटनसमारोहस्य पश्चात् संगोष्ठीशुभारम्भात् पूर्वमेव विद्वांसो दलद्वये विभाजिताः । तत्र प्रथमं दलं शब्दपत्रेषूल्लिखितसमस्तविवरणानि विचारविमर्शद्वारक-परिवर्तनपरिवर्धनाभ्यां प्रमाणितानि संशोधितानि वा । ग्रस्य दलस्याध्यक्ष्यं मानार्हनिदे-शको डा० प्रीतमसिंहोऽबिभः द्वितीयदलस्य च डा० राघवप्रसादचौधरीति । ग्रनेन द्वितीय-दलेन प्रभूत सुविचार्य विमृश्य च पंजाबक्षेत्रस्य कृते प्रारम्भिकस्तरीयसस्कृतपाठ्यक्रमनि-र्माणहेतवे व्यापका निर्देशाः प्रास्ताविषत ।

एवं च षड्दिवसीयेयं संगोष्ठी स्वोद्देश्ये सर्वथा सफलाभूत् । योजनाद्वयेऽपि निर्धारितं कार्यलक्ष्यं संसाधितम् । ग्रत्र पंजाबीभाषायाः प्रायः त्रिसहस्रसंख्याकानां शब्दानां लिपिः वारंवारता, ग्रन्ये च विन्दवो निर्धारिताः । शब्दपत्रेषु रोमनदेवनागरीलिप्योर्गुरु-मुखीलिपेर्न लिप्यन्तरणम्, प्रत्युत पंजाबीशब्दोच्चारणध्वनेः खलु ध्वन्यंकनमस्ति । एतेषां संकलितानां शब्दानामुपजीव्यग्रन्थाः यथा–श्री ग्रार एल० टर्नरप्रणीतः 'कम्परेटिव डिक्श-नरी ग्राफ दि इण्डोग्रार्यन लैंग्वेजेज', 'भारतीव्यवहारकोश', 'सबकी बोली' शिक्षामन्त्रालय-भारतसर्वकारेण प्रकाशितः 'हिन्दी वर्ड्स कॉमन टू ग्रदर इण्डियन लेंग्वेजेज' इत्येते सन्ति । मैयासिंहलिखितः 'दि पंजाबी डिक्शनरी', 'संस्कृतधातुपाठ', सिद्धान्तकौमुदी', 'संस्कृत-शब्दार्थकौस्तुभ', बृहत् ग्रंग्रेजी हिन्दीकोश' इत्येते ग्रन्थाः प्रामुख्येन सहायकाः सन्ति ।

एवंविधया वैचारिककार्यगोष्ठ्या यत्र ग्रधिकृते कार्ये गुणात्मकताभिवर्धते, तत्रैव संस्कृतस्य महत्त्वं तद्योजनायाः निर्माणाधीनग्रन्थस्य व कीर्तिरनायासेन पर्याप्तं प्रचरति, प्रसरति, विशुष्यति च । नियतमेवानेन संयोजनेन कार्ये सम्भावितदोषापमार्जनं संजायते । पर्यवसाने चाशास्महे, राष्ट्रियसंस्कृतसंस्थानं प्रयागस्थविद्यापीठस्य प्राचार्यमहोदयश्च कार्यगौरवमभिलक्ष्यैवंविधकार्यगोष्ठीसमायोजनेन प्रारूपितपरियोजनायां गुणवत्तामभि-वर्धिष्येते ।

ग्रस्यायोजनस्य संयोजनं संचालनं च विभागीयः प्रवाचकः श्रीशिवकुमारमिश्रः, प्राध्यापकः श्रीग्राजादमिश्रश्च सम्पादितवन्तौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाधिक प्रचलित ग्रंथ-रत्न



यह दवाओं के नुस्खों की एक किताब मात्र नहीं है. बल्कि विशुद्ध भारतीय जीवन-दर्शन है. जिसे आयुर्वेदशास्त्र के मर्मज्ञ और जीवन-जगत के अनुभवी वैद्यराज पं० रामनारायण शर्मा ने सर्वसाधारण के हितार्थ सीधी-सरल भाषा और सुबोध शैली में लिखा है। १४ संस्करणों में अबतक इसकी डेढ़ लाख से अधिक प्रतियाँ बिक चुकी हैं. जो इसकी उपयोगिता एवं लोकप्रियता का प्रत्यक्ष प्रमाण है। इस ग्रंथ में आहार-विहार संयम-नियम और ऋतु-अनुकूल रहन-सहन के विवेचन के साथ-साथ निदान, चिकित्सा तथा पथ्यापथ्य आदि विषय खूब समझाकर लिखे गये हैं, जिससे आयुर्वेदशास्त्र के गूढ़ विषयों को साधारण-से-साधारण लोग भी खूब आसानी से समझ लेते हैं। सभी लोग इस ग्रंथ से लाभ उठा सकें, इसलिए लगभग पौने पाँच सौ पेज की सजिल्द पुस्तक का मूल्य भी बहुत कम यानी ६) मात्र रखा गया है।

आरोग्य प्रकाश

श्री वैद्यनाथ
आयुर्वेद भवन लि०

कलकत्ता · पटना · झाँसी
नागपुर · नैनी (इलाहाबाद)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



३३–निरक्षरः कार्तान्तिकः [अरबदेशस्य श्रेष्ठकथा]

श्री "पद्म" शास्त्री
१२८ मुक्तानन्दनगर, गोपालपुरारोड, जयपुरम्-४

पुरा अरबदेशे कासिमनामकः कोऽपि नरो न्यवसत् । सोऽतीव दीर्घसूत्री, तस्य गृहिणी जारदा नाम्नी चासीत् । जारदाशब्दस्यार्थो हिन्द्यां "टिड्डा" भवति । सुगृहिणी सा सर्वदा विचारयति स्म यन्मम पतिः किमपि कार्यं कुर्यात् परं सः सर्वदा कथयति स्म–इयत् महत्कार्यं नाहं कर्तुं शक्नोमि । पितृणां धनं रिक्तमभूत्, कथं गृहस्यकार्यं प्रचलेदिति सा चिन्तिताऽऽसीत् । परं कासिमः प्रहसन्प्रोवाच नाहं किमपि वेद्मि, किं कार्यं करवाणि ? । जारदा प्राह–भवत्तस्तु मायाविनः श्रेष्ठतरा ये राजमार्गेषु जनानाकारयन्ति ।

बहुत पहले अरब में कासिम नाम का एक मनुष्य रहता था । वह बहुत आलसी था, उसकी पत्नी का नाम जारदा था । हिन्दी भाषा में जारदा शब्द का अर्थ टिड्डा होता है । जारदा विचार किया करती थी कि मेरा पति कुछ कार्य करे लेकिन वह सर्वदा कहा करता था—इतना बड़ा कार्य मैं नहीं कर सकता । पूर्वजों का धन अब समाप्त हो चुका था । अब घर का काम कैसे चले, जारदा यह सोच कर चिन्तित हुई । लेकिन कासिम ने हँसते हुए कहा—मैं नहीं समझ पा रहा हूं कि मैं क्या कार्य करूं । जारदा ने कहा—आपसे जादूगर अच्छे हैं जो सड़कों पर लोगों को इकट्ठे कर लेते हैं ।

जारदाकृतां भर्त्सनां श्रुत्वा कासिमेन विचारितं यदहं ज्योतिर्विदो भूत्वा स्वदिनानि सारल्येन यापयिष्यामि । जारदा प्राह–अनेन मिथ्यापूर्णेन व्यवसायेन कदाचिद् विपत्तिरापतिष्यति ।

जारदा द्वारा फटकारने पर कासिम ने विचार किया मैं ज्योतिषी बन कर अपने दिन आसानी से बिता सकता हूं । जारदा ने कहा–इस झूठे व्यवहार से तुम पर कभी विपत्ति आ सकती है । प्रातः-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभाते कासिमं परितो जनसम्मर्दः सञ्जातः । एकः प्राह—भ्रातः ! अद्य किं क्रियते भवताऽत्र । गभीरेण स्वरेण कासिमः प्राह—ह्य रात्रौ मदुपरि चेश्वरेण कृपा कृता अहमद्य ज्योतिर्विदामग्रणी सञ्जातः । जनान् वञ्चयितुं शोभनश्चोपायस्त्वया प्रकल्पित इत्युक्त्वा जना निर्गताः ।

एकदा जनश्चैकः कासिमं किमपि पप्रच्छ । तत्प्रदर्शितपथा स विपद्भि र्विमुक्तः सञ्जातः । स सर्वत्र कासिमस्य प्रशंसामकरोत् । "रक्ष रक्ष मज्जीवनं" इति चीत्कुर्वन्ती तस्य पादयोः पपात । कासिमः प्राह—समस्तं वृत्तान्तं कथय माम् । सा प्राह—सर्वं वृत्तं निवेद्याहं मृत्युमुखे पतिष्यामि । कासिमः प्राहः—रहस्यमज्ञात्वा यद्यहं किमपि घोषयामि तर्हि को मयि विश्वासं करिष्यति ? । सा रहस्यं कथयितुं लग्ना । अहं नृपस्य राजभवने दासीरूपेण कार्यं करोमि । एकदा स्नानगृहात् परिभ्रष्टा राज्ञः स्वर्णमुद्रिका मया लब्धा । लोभाविष्टेन मया मुद्रिका चोरिता । राज्ञः कृते सा मुद्रिका चातीव प्रियाऽऽसीत् तेनोद्घोषितं यस्य पार्श्वे मन्मुद्रिका मिलिष्यति स मृत्युमुखे पतिष्यति ।

काल कासिम ने एक मुख्य सड़क पर अपनी चादर बिछा दी । कासिम के चारों ओर जनता की भीड़ लग गई । एकने कहा—भाई ! आज आप क्या कर रहे हैं ? कासिम गम्भीर होकर बोला । कल रात मुझ पर ईश्वर की कृपा हुई—मैं प्रसिद्ध ज्योतिषी हो गया हूं । लोग यह कह कर चलते बने कि लोगों को ठगने का तुमने अच्छा उपाय सोच लिया है ।

एकबार एक व्यक्ति ने कासिम से कुछ पूछा । उसके द्वारा बताये गये उपाय से उसे विपत्ति से छुटकारा मिल गया । उसने कासिम की सब जगह प्रशंसा की । इतने में मुझे बचाओ, मुझे बचाओ, इस प्रकार चिल्लाती हुई एक स्त्री कासिम के पैरों में गिर गई । कासिम ने कहा—सारा वृत्तान्त मुझे सुनाओ । स्त्री बोली—यदि मैं सारा वृत्तान्त सुना दूं तो मुझे फाँसी लग जायेगी । कासिम ने कहा—रहस्य को विना जाने यदि मैं कोई घोषणा कर दूं तो कौन मुझ पर विश्वास करेगा । वह स्त्री रहस्य बताने लगी कि मैं राजभवन में दासी के रूप में कार्य करती हूं । एक बार स्नानगृह से गिरी हुई राजा की अंगूठी मुझे मिली । लोभ में आकर मैंने वह अंगूठी चुरा ली । राजा को वह अंगूठी बहुत प्रिय थी उसने घोषणा करवा दी कि जिसके पास अंगूठी मिलेगी उसे फाँसी देदी जायेगी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कासिमः कर्गजे मिथ्यारेखां प्रकुर्वन् प्राह यदि त्वं स्नानगृहस्थे घटे मुद्रिकां निक्षेप्तुं शक्नोषि तर्हि तव विपत्तिः समाप्तिमेष्यति । सुष्ठु, सुष्ठु, इति कथयित्वा महिलेयं तस्मान्निर्गता ।

कासिम कागज पर झूठी रेखाएँ खींचने लगा और बोला यदि तू स्नानघर के घड़े में अंगूठी डाल सकती है तो तेरी विपत्ति समाप्त हो जायेगी। ठीक है, ठीक है, यह कह कर वह स्त्री वहां से चली गई।

मुद्रिकापगमसमाचारः सर्वत्र प्रसृतः । जारदा स्वसखीमाह—मत्पतिः प्रसिद्धो ज्योतिर्विद् वर्तते एका सखी द्वितीयां प्राह । किञ्चित्कालानन्तरं नृपतिः कासिमं राजद्वारे समाकारयामास ।

अंगूठी खोने का वृत्तान्त सब जगह फैल गया । जारदा ने अपनी सखी से कहा कि मेरा पति प्रसिद्ध ज्योतिषी है । उस सखी ने दूसरी सखी को कहा । कुछ समय बाद राजा को पता लगा, राजा ने कासिम को राजभवन में बुलाया ।

कासिमो गगने दृष्टिं बद्ध्वा कर्गजे रेखां कुर्वन् प्राह—ग्रहगणाः कथयन्ति यत्तव मुद्रिका स्नानगृहस्थे विशाले घटे निपतिताऽस्ति । सत्यं मुद्रिका घटान्निर्गता । नृपतिः प्रहर्षितः सन् पुरस्कृतवान् कासिमम् । एकदा रात्रौ राजभवनस्य कोषागाराच्चौराः स्वर्णमुद्रिका अचोरयन् । नृपतिः सत्वरं कासिममाकारयामास । समाचारमिमं श्रुत्वा कासिमः प्रहर्षितोऽपि नितरां चिन्तामापेदे प्राह च । नैतत्प्रकथनं सरलं वर्तते । दीर्घं कालं यावद् ग्रहगणैः सह मया वार्ता करणीया भविष्यति नृपः प्राह ४० दिनस्यावसरो मया प्रदीयते चौराणामन्वेषणाय नो चेद् भवान् मृत्युमुखे निपतिष्यति ।

कासिम ने आकाश की ओर देखते हुए, कागज पर रेखा बनाते हुए कहा—सितारों का कहना है कि तुम्हारी अंगूठी स्नानघर के विशाल घड़े में गिर गई है। घड़े से अंगूठी निकल गई। प्रसन्न होकर राजा ने कासिम को पुरस्कार दिया। एक बार रात्री में चौरों ने राजा के खजाने से स्वर्णमुद्राएं चुरा लीं। राजा ने शीघ्र कासिम को बुलाया। यह समाचार सुन कर प्रसन्न कासिम चिन्तित हो उठा और कहने लगा। इस सम्बन्ध में कुछ कहना सरल नहीं है। लम्बे समय तक मुझे सितारों से बात करनी पड़ेगी। राजा ने कहा—मैं तुम्हें ४० दिन का समय देता हूं तुम चोरों का पता लगाओ, नहीं तो तुम्हें फाँसी दे दी जायेगी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स सत्वरमेव स्वगृहं प्रायात् जारदामघटितघटनां प्रोवाच। सौभाग्यात् चौराणां संख्याऽपि ४० आसीत्। चौराणां प्रधानश्चान्यान् प्रोवाच—नृपतिः चौरानन्वेषणाय प्रसिद्धज्योतिर्विदं कासिमं नियुक्तवान्। यावदस्मद् वृत्तान्तं स नृपं कथयेत्तत्पूर्वमेव कोऽपि तद्गृहपार्श्वे गत्वा तयो वार्तालापं शृणुयात्। ४० चौरेष्वेकः तद्गृहपार्श्वमापेदे। गवाक्षसन्निधौ गच्छन् चौरेण श्रुता तयोः वार्ता। कासिमो जारदां कथयन्नास्ते—रात्रिः सञ्जाता, चत्वारिंशत्तमेषु एको निर्गच्छन्नस्ति। प्रधावन्स चौराधिपतिं गत्वा प्राह—महाराज! कासिमः सर्वं वृत्तं नो जानाति।

चौराधिपति विषण्णवदनः सञ्जातः। अन्यस्मिन् दिने चापरश्चौरो गवाक्षसन्निधौ गच्छन् श्रुतवान् चत्वारिंशत्तमेषु द्वितीयो निर्गच्छन्नस्ति। तूष्णीमेव सर्वे चौरा एकदा कासिमसकाशं प्रापुः भगवन्! पाहि नः, सर्वाः स्वर्णमुद्रा वयं प्रत्यावर्तयिष्यामः भवान्नः मृत्युदण्डान्निर्मोचयतु। कासिमः प्राह भवन्तः सर्वं धनं यत्र निपातयिष्यन्ति तत्स्थानं मह्यं निवेदयन्तु,। इत्थं भवतां रक्षा भविष्यति। चौरैस्तत्स्वीकृतम्। दिनानि व्यतीतानि,

कासिम शीघ्र घर गया। उसने जारदा को यह घटना सुनायी। सौभाग्य से चोरों की संख्या भी ४० हा थी। चोरों के सरदार ने अन्य चोरों को कहा कि राजा ने चोरों का पता लगाने के लिए प्रसिद्ध ज्योतिषी कासिम को नियुक्त किया है। जब तक वह हमारे बारे में राजा को कुछ कहे उससे पहले ही उसके घर के पास जाकर उनकी बातचीत हमें सुननी चाहिये। ४० चोरों में से एक चोर कासिम के घर के पास पहुँचा चोर ने खिड़की के पास जाकर उनकी बातचीत सुनी। कासिम अपनी पत्नी जारदा को कह रहा था। रात्री हो गई है। ४० में से एक गुजर रहा है। वह चोर दौड़ता हुआ सरदार के पास पहुंचा और कहने लगा—कासिम हम सब के बारे में सारी बात जानता है।

यह सुनकर चोरों का सरदार दुखी होगया। दूसरे दिन दूसरे चोरों ने खिड़की के पास से जाते हुए सुना कि ४० में से दूसरा गुजर रहा है। एक दिन सभी चोर चुपचाप कासिम के पास पहुंचे, भगवन्! हमें बचाओ, हम सभी स्वर्णमुद्राएं लौटा देंगे। कासिम ने कहा—आप सारा धन जहां डालेंगे वह स्थान मुझे बतादो, इस प्रकार आपकी रक्षा हो सकती है। चोरों ने यह बात स्वीकार करली। दिन बीतते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्ञः समस्तं धनं राजकोषे सम्प्राप्तम् । प्रहर्षितो नृपतिः कासिमं राजज्योतिर्विद् पदे नियुक्तवान् राजा तन्निवासाय भवनमपि प्रददौ । कासिमस्य दैन्यं विनष्टम्, परं जारदा सम्यक्तया जानाति-अजाया माता कियत्कालं यावत्सुखेन स्थास्यतीति ।

एकदा नृपतिः स्वातिथिभिः सहोपविष्ट आस्ते । कासिमोऽपि तत्रोपस्थितः । सहसा राज्ञा स्वमुष्टिं बद्ध्वा प्रोक्तं किं वर्तते मम मुष्ठिकायाम् ? उद्विग्नो भूत्वा चीत्कुर्वन् स प्रोवाच—जारदे ! जारदे ! मृतोऽस्मि प्रवञ्चकोऽहम् । तच्छ्रुत्वा नृपतिः स्वमुष्टिमुद्घाटितवान् सत्यं तत्र जारदा (ड्डिडा) आसीत् । कासिमः प्रसन्नो भूत्वा नर्नितुमारेभे । एकदा जारदा कासिमं प्राह—केवलमेकेनोपायेन तव रक्षा भविष्यति । स प्राह कथम् ? ।

जारदा ब्रूते—भवान् नृपतिमाकार्य कथयतु—यदीश्वरेण मदीया ज्ञानशक्तिरपहृता । कासिमस्य सन्देशं श्रुत्वा नृपतिरश्वारूढ़स्तत्सद्मनि समागतः । जारदा प्रोवाच—सत्यमीश्वरेणापहृता कासिमस्य शक्तिः तयोः सत्यवचनेन नृपतिः प्रहर्षितः सञ्जातः । नृपेण कथितम् यः सत्यं ब्रूते स मह्यं रोचते । भवन्तौ यथासुखं स्वजीवनं यापयतां मदीये राजभवने । □

गये राजा का सारा धन खजाने में पहुंच गया । प्रसन्न होकर राजा ने कासिम को राज-ज्योतिषी बना दिया । राजा ने उसके रहने के लिए महल दे दिया । कासिम की निर्धनता समाप्त हो गई परन्तु जारदा अच्छी तरह जानती थी कि बकरी की मां कब तक खैर मनायेगी ।

एकबार राजा अपने मेहमानों के साथ बैठा था । कासिम भी वहीं था । अचानक राजा ने अपनी मुट्ठी बन्द करके कहा—मेरी मुट्ठी में क्या है ? । दुःखी होकर कासिम चिल्लाते हुए कहने लगा—हे जारदे ! हे जारदे ! मैं ठग आज मारा गया । सुनकर राजा ने मुट्ठी खोली, सचमुच उसमें जारदा (टिड्डा) ही था । कासिम प्रसन्न होकर नाचने लग गया । एक दिन जारदा ने कासिम को कहा—केवल एक उपाय से तुम्हारी रक्षा हो सकती है । कासिम ने कहा—कैसे ?

जारदा बोली—आप राजा को बुलाकर कहें कि ईश्वर ने मेरी ज्ञान शक्ति मुझसे छीन ली है । कासिम का सन्देश सुनकर राजा, घोड़े पर बैठ कर, उसके घर आया । जारदा ने कहा—सचमुच ईश्वर ने कासिम की शक्ति छीन ली है । उनके सत्य वचनों से राजा प्रसन्न हो गया । राजा ने कहा—जो सत्य बोलता है वह मुझे बहुत प्रिय है । आप दोनों मेरे राजभवन में सुखपूर्वक रहें । □

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्ण जयंती वर्ष
आयुर्वेद सेवाश्रम लि.
जनसेवा के
५० वर्ष
हम
आभारी हैं

ऋषि मुनियों की
युगों युगों की शोध

सेवाश्रम का
गाय छाप



ब्राह्मी आँवला केश-तैल
और काला दन्त मन्जन

ब्राह्मी आँवला केश-तैल आधुनिक पद्धतिसे निर्मित केवल तैल ही नहीं एक आयुर्वेदिक सौंदर्य प्रसाधन है। तथा काला दन्त-मंजन केवल मंजन ही नहीं एक आयुर्वेदिक औषधि है।

आयुर्वेद सेवाश्रम लिमिटेड उदयपुर, वाराणसी, हैदराबाद

heros' AS-147

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

अनुक्तमप्यूहति पण्डितो जनः

डॉक्टर श्रीगङ्गाधरभट्टः
रीडर, संस्कृत विभाग, राजस्थानविश्वविद्यालयः, जयपुरम्

शिशुरपि निपुणो गुरोर्गरीयान्,
न तु वपुषैव महान्महत्प्रतिष्ठः ।
मणिरणुरपि भूषणाय पुंसां,
न तु पृथुलैव शिला विलासहेतुः ।

विद्याज्ञानसम्पन्नो निपुणः शिशुरपि गुरोः श्रेयान् भवति । वपुषा विशालतामावहन् जनोऽपि महतीं प्रतिष्ठां न लभते । गुणगणगरिष्ठो बालोऽपि गुरुणा समं महत्त्वं प्रतिष्ठां वा लभते । पृथुलकायो न तथा गौरवं भजते । अल्पीयानपि मणिः पुरुषाणामलङ्करणायालन्नतथा पृथुला शिला सहृदयेषु समाद्रियते ।

शुभाशंसनम्

प्रधानसम्पादकः

अपनोदाय दुःखानां स्मर्यते यः सदा जनैः ।
प्रसीदतु प्रभुः स नो नित्यं मदनमोहनः ॥ १ ॥
मञ्जूमवाप्य जातोऽसौ मञ्जुर्मदनमोहनः ।
गुणवद्वस्तुसंसर्गाद्गुणवान्को न जायते ॥ २ ॥
कीटो भ्रमरसम्पर्कान्मधुपत्वमुपागतः ।
करोति मधुरं गुञ्जन्नखिलान्वशर्वातनः ॥ ३ ॥
अनया सार्थतापन्नः श्रीमान्मदनमोहनः ।
लक्ष्यते निर्निमेषं हि नवोत्थश्चन्द्रमा इव ॥ ४ ॥
मञ्जुलतामरन्दस्या-स्वादरतोऽपि सन्ततम् ।
मधुप इव मत्तः किमेतच्चित्रन्न जायते ॥ ५ ॥
गुरूणामाशिषो गृह्णन्तदादेशञ्च पालयत् ।
सुमनःफलसम्पन्नं जीव्याद् द्वन्द्वमिदं चिरम् ॥ ६ ॥
भवनावं प्रमोदेन चालयतो निरन्तरम् ।
[illegible] मायुः क्रियाद्भृशम् ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd. No. 1379/51
R. J. No. 2617
Licence No. PP. 9.
Licence to Post
Without
Prepayment

भारती

विद्या, विनय, ज्ञान आदि से सम्पन्न निपुण बालक भी गुरु के समान आदर को पाता है उसकी गुरु से भी अधिक प्रतिष्ठा होती है। विशालकाय पुरुष भी उसके समान गौरव को प्राप्त नहीं कर सकता। अल्पकाय मणि भी पुरुषों को अलंकृत करनें में समर्थ होता है उतना विशाल शिलातल भी गौरवास्पद नहीं हो सकता। गौरव एवं प्रतिष्ठा गुणों में समाहित है न कि विशाल कलेवर में।

उदीरितोऽर्थः पशुनापि गृह्यते।
हयाश्च नागाश्च वहन्ति चोदिताः।
अनुक्तमप्यूहति पण्डितो जनः,
परेङ्गितज्ञानफला हि बुद्धयः।

पशवोऽपि स्वस्वामिनोक्तानां वचनानामर्थं गृह्णन्ति यद् यद् स्वामी कथयति तत्तदेव पशवोऽङ्गीकुर्वन्ति। अश्वाः गजाः प्रेरिताः सन्तः स्वस्वामिन आदेशं पालयन्ति। विद्वान् अनुक्तमपि परकीयम्मनोभावं, परिचिनोति। बुद्धयः परेषामिङ्गितानां स्वत एव ज्ञानं कुर्वन्ति। बुद्धिमत इदं वैशिष्ट्यं यत् सः उक्तं विना अपि परेषामभिमतमभिजानाति।

पशु भी अपनें पालन-पोषण करने वाले स्वामी की वाणी के अर्थ को पहचान लेते हैं। कहने पर तो वे भी समझ जाते हैं। हाथी, घोड़े आदि आदेश का पालन करते ही हैं। अपने स्वामी के आदेश को पाकर उसके अनुसार आचरण करते हैं।

किन्तु पण्डित व्यक्ति विना कहे भी समझ लेता है बुद्धि का फल यही है कि दूसरे के मनोभाव को वह स्पष्ट रूप से समझ सके। अर्थात् बुद्धिमान् विना कहे भी समझ लेता है।

प्रकाशकः-संस्कृत प्रचार परिषद् राजस्थान,
पता—भारती भवन, बी. १५ न्यू कालोनी, जयपुर-३०२०१। दूरभाष-७५४९६
राधेश्याम द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित। दूरभाष-६१७६७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृत-मासपत्रिकाय



वर्षम् ३१
फाल्गुनः
अङ्कः ५

मार्च
१९८१

उमा-कान्तः शिवो नित्यं
मातुलानी-रस-प्रियः ।
गौर-श्याम-महो-ध्यान
मग्नो भर्गः प्रणम्यताम्
—श्रीरामगोपालशा...

वार्षिकमूल्यम् पञ्चदशमुद्राः १५.०
एकप्रतेः—सार्धकं रूप्यकम् १.०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आन्ध्र-उत्तरप्रदेश-
बिहार-पञ्चनद-सर्वकारैः स्वीकृता

विषय-सूची

क्र.सं	विषयाः	निबन्धारः	पृष्ठ-संख्या
१.	मङ्गलम्	श्रीरामगोपालशास्त्री, जयपुरम्	१६३
२.	मासावतरणम्	,, ,, ,,	१६३
३	अद्यतनी शिक्षापद्धतिः	डॉ० चन्द्रकिशोरः गोस्वामी	१६४
४.	सम्पादकीयम्	प्रधानसम्पादकः	१६७
५.	विश्व-वार्ताः	श्रीविश्वदर्शी	१७१
६.	नारी-स्तम्भः	श्रीमती राजेश्वरीभट्ट, जयपुरम्	१७३
७.	सुधर्मा-सुदेहा-चरितम्		१७५
८.	संस्कृतव्याकरणप्रवेशिका	श्रीविश्वनाथमिश्रः, बीकानेरः	१८५
९.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, जयपुरम्	१८९
१०.	सूक्ति-सुधा	डा० श्रीगङ्गाधरभट्टः, जयपुरम्	१९५



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानसंरक्षकाः–
जगद्गुरुशङ्कराचार्य-
स्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः
कांचीकामकोटिपीठाधिपतयः

संस्थापकः
स्व. श्री उमाकान्तकेशव आप्टे
(बाबा साहब आप्टे)

प्रधान सम्पादकः
जगदीशशर्मा
साहित्याचार्यः
सम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
सहसम्पादकः
रामगोपालशास्त्री जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

संरक्षकः
श्रीदेवीशङ्करतिवाड़ी
जयपुरम्
प्रबन्ध-सम्पादकः
श्रीगिरिराजशर्मा
भारती-भवनम्
बी १५, न्यू कालो[illegible]
जयपुरम्–१
(राजस्थानम्)

वर्षम् ३१ | फाल्गुनः, विक्रमाब्दः, २०३७ [मार्चः, १९८१] | अङ्कः ५

मङ्गलम्

राधा-मुखे शशि-सहस्र-विलोभनीये
पिष्टातकं हरितवर्णमयं विलेप्य ।
पीत्वाऽधरं लघु य एति सुखं तदीयौ
श्रीमन्मुकुन्द-चरणौ शरणं प्रपद्ये ॥

मासावतरणम्

[1]पिष्टातकै विविध-वर्णमयै विहायः[2] कुर्वन् विचित्रमतिरम्यमसौ वसन्ते ।
होला-महोत्सव-समुल्लसितो जनानामानन्ददोऽत्र भुवि **फाल्गुनमास** एति ॥

—श्रीरामगोपालशास्त्री, जयपुरम्

१—पिष्टमततीति पिष्टातः । पिष्टात एव पिष्टातकः । अयं शब्दोऽत्र 'गुलाल' इत्यर्थे प्रयुक्तः ।
२—विहायः = आकाशम् । 'वियद् विष्णुपदं वा तु पुंस्याकाशविहायसी' इत्यमरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्यतनी शिक्षापद्धतिः

(श्रीसत्यसाईबाबाप्रवचनम्)

अनुवादकः—डाँ० चन्द्रकिशोरः गोस्वामी, संस्कृतविभागाध्यक्षः
ज्ञानविज्ञानमहाविद्यालये, वनस्थलीविद्यापीठम् (राज०)

साम्प्रतं प्रतिक्षेत्रं प्रतिदिशं देशविदेशान् भयावहदशापन्नान् कुर्वाणा नाना समस्याः समुद्भवन्ति। एताः समाधातुं प्रतिकर्त्तुञ्चापेक्षितप्रयत्ना विधेयाः। विशेषतः शिक्षाक्षेत्रमिदानीं पतनोन्मुखं विद्यते यस्मिन्नस्माकं प्राचीना संस्कृतिर्लुप्तेवाभाति। तच्छंशोध्य जीवने समरसतां समन्वयं समत्वञ्चाभिवर्द्ध्य शिक्षाक्रमः सुदृढाऽनुष्ठेयः। शिक्षायाः परमार्थ-प्रबोधनमावश्यकम्। अन्तःकरणपरिशोधनमेव विद्या। नैतिकधार्मिकाध्यात्मिकशीलसम्पदभिवर्द्धनी च भवति विद्या। तमोज्योतिषो भेदविवेककारिण्येव विद्या। कतिपयग्रन्थानामध्ययनं लेखनञ्चैव नास्ति विद्यायाः याथार्थ्यम्। केवलं पुस्तकीयं ज्ञानं सा नैवास्ति। प्रत्यक्षज्ञानमन्तरेण निःसारं परोक्षज्ञानम्। परोक्षज्ञानं प्रत्यक्षज्ञानेन संयोज्य लोकश्रेयोऽद्य साध्यम्। हन्त, आधुनिकी विद्या तु यान्त्रिकी जाता। अस्यां तु क्वचिदपि न दृश्यते काचिच्चेतनता। नैपुण्यस्य सर्वथाभावोऽत्रवर्तते। मानवान्तर्वर्तिनीं दिव्यतां बोधयितुं नास्त्यस्यां स्वल्पापि क्षमता। धूलिधूसरितान् करानकृत्वा परिधानानि मलिनतामनीत्वा च यथाकथञ्चिदधिकाधिक लाभार्जनस्य दुराशैवाद्यास्ति शिक्षोद्देश्यम्। आहारनिद्रादिकार्याण्येव सर्वस्वमिति विद्योपार्जकानां प्रवृत्तिः परिवर्तनीया। विद्या श्रममूलिका विधातव्या। साम्प्रतिकी शिक्षा प्रत्येकमिन्द्रियानुचरं करोति। त्यागस्थाने स्वार्थं शिक्षयति। ईर्ष्यासूयाद्यवगुणग्रस्तान् सर्वान् विदधाति। सेवाकर्मैव शिक्षाया उद्देश्यं लक्ष्यं वा जास्ति नैतिकताविहीनामिमां शिक्षां विनयसंयमास्तिकता सेवाभावपापभयादिगुणैः सम्पन्नां कर्त्तुं प्रयतितव्यम्।

अद्यत्वे शिक्षाजगदप्यनेकानेकाभिः समस्याभिर्व्याप्तमस्ति। तासामेकमेव समाधानं वर्तते यन्मानवजीवनेऽनुदिनं प्रकाशमानानि, नित्यनूतनतया प्रतिभासितानि प्राचीनपरम्परया प्राप्तानि भारतीयसंस्कृतेस्तत्त्वानि वर्तमानशिक्षाप्रणाल्यां समावेष्टव्यानि।

पाश्श्चात्यदेशानामन्धानुकरणमेव भारतस्य सकलसमस्यानां मूलकारणम्। विज्ञानक्षेत्रेऽपि भारतवर्षमिदं वैदिककालेऽन्येभ्य उत्कृष्टतरमासीत्। पाश्चात्यास्तु नैकान्यनुसन्धानान्यधुनाथर्ववेदाश्रयेण कुर्वाणाः सन्ति। यन्त्रशक्तेरणुशक्तेस्तन्त्रशक्तेर्मन्त्रशक्तेस्तथैव चानेकासां शक्तीनां विवरणमथर्ववेदे सम्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्तयोपलभ्यते । विमानस्याविष्कारेऽपि वैज्ञानिकैरथर्ववेदात् साहाय्यमत्तम् । वैदेशिकानामनुकरणवृत्तिरशेऽस्मिन् इयतीं वृद्धिं यत्तेषां सस्कृतिर्जीवनपद्धतिश्चेदानीं भारतीयानां रुचिकरी सुप्रिया च ।

१६०२ ख्रिष्टाब्दे दिसम्बरमासस्य सप्तदशदिनांकेऽमरीकादेशीयाभ्यां राइटबन्धुभ्यां विमानाविष्करणं कृतम् । किन्तु ताभ्यां प्राक् १८६६ ख्रिष्टाब्दे सितम्बरमासस्य त्रयोदशदिनांके जर्मनदेशीया वैज्ञानिकास्तत् कृतवन्तः । ततोऽपि पूर्वं १८६५ ख्रिष्टाब्देऽगस्तमासस्य चतुर्दशदिनांक एको भारतीयः श्रीवामनवापूजी वायुयानं निर्माय तेनैव बम्बईनगरं गतवान् परन्तु विमानाविष्कर्तॄणां नामसु तस्योल्लेखोऽपि न विद्यते तत्र सन्ति तत्कारणानि—अस्माकमीर्ष्यावृत्तिर्दुर्बुद्धिर्मानसिकी दासता च ।

सम्प्रति सवषु क्षेत्रेषु विचारैक्यस्यावश्यकता वरीवर्ति । मानवतासमेधकानां गुणानामपेक्षा विद्यते । केवलमुपाधीनामावश्यकता नास्ति । उपाधिप्राप्तिरेव शिक्षायाः-प्रयोजनमित्येष उन्मादः परिहरणीयः । सेवाप्राप्तेः प्रलोभनं परित्यज्य स्वदेशस्य भाग्यनिर्माणोद्देश्येन विद्योपार्जनीया । अपारशक्तिसम्पन्ना अपि तरुणा बलविहीना इव जीवनयापनं कुर्वाणाः कालं नयन्ति । एकतयानन्दः आनन्देन च पवित्रता समुपलभ्या । तरुणेषु तितिक्षापेक्षिता । क्षमैव सत्यं, सत्यमेवधर्मः । क्षमैव योगः सैव सन्तोषः । अहिंसाप्यसावेव । अतः क्षमैव परमो गुणः क्षमा प्रेम चैकस्यैव गुणस्य रूपद्वयी ।

अद्यतनी शिक्षा विनयमदत्त्वा केवलमहंभावमसूयाञ्च वर्धयते । विद्या प्रकाशः कान्तिस्तेजो वास्ति । तत्प्राप्तः केवलं ग्रन्थपरिचय एव सा नास्ति । तयानुभववृद्धिर्ज्ञानसंवृद्धिर्वा भवेत् । मानवस्य समाजस्य च परस्परसम्बन्धज्ञापकमेव ज्ञानं सत्यं भवति । प्राचीनार्वाचीनानामनुभवानां समन्वयकरणमेव सत्य-ज्ञानम् । अपेक्षिताधिकं धनं धीनाशनम् भवति । लौकिकविद्याः केवलमहंकाररस्याडम्बराणां च बीजानि सन्ति । लौकिकविद्याभिः सममाध्यात्मिकं ज्ञानमभ्यर्जनीयम् । व्यक्तिगतस्वार्थे विनिमज्य जले तैलबिन्दुरिवासंपृक्तजीवनं नोचितम् । सहकारितया सेवाभावेन च समाजस्यासम्भवं किञ्चनापि कार्यं सम्पादयितुं शक्यते । सूत्रमेकं पिपीलिकामपि बद्धुं न क्षमं किन्तु तादृंशि सूत्रसहस्राणि गजबन्धनमपि विधातुमर्हन्ति । वयं सहकारितामुच्चैः प्रलपामः परन्तु व्यवहारे शल्यक्रियामेव कुर्मः । संघनिर्माणेनैवैकतास्थापन न भवति । कर्णदेष्वद्यत्वे सहकारिताया एकतायाश्च चर्चा बोभूयते परमाचारे सर्वथा तदभावः परिलक्ष्यते ।

सम्मेलनानां परिषदाञ्चाद्य कोपयोगिता ? कोटिशः रूप्यकाणां व्ययः सदस्यानां समयनाशश्चैव तत्परिणामः । निर्णयास्तु केवलं कर्णदानलंकुर्वन्ति । आचरणे तेषां क्वचिदपि स्थितिर्न दृश्यते । ग्रामं ग्रामं परि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रम्य नव्यान् विचारान् नवीना योजनाश्च ग्रामीरोभ्यः प्रदर्शयितुं तरुणाः कृतपरिकरा भवेयुः।

मेघाच्छन्ने गगनमण्डले स्फुरन्ती सौदामनीव शिक्षापद्धत्यां ज्ञानस्य यथार्थरूपमुल्लसेत्। शिक्षितस्य जीवनमेव परेभ्यः सन्देश इव शोभेत। अतएव सर्वे भारतीयाः स्वकीयां शक्ति, सामर्थ्यं, गुणं, पावित्र्यं, रक्तमपि लोकमगलायोत्स्रष्टुं सन्नद्धाः स्युः। औषधस्य नामग्रहणमात्रेणैव किं रोगस्योपशमः स्यात्? समृद्धेः संकीर्तनादेव किं दरिद्रतोपनोत्स्यते? अपि नाम षट्पञ्चाशतकोणगणनयैव मित्थात्वमपनीतं स्यात्? वस्तुतस्तु तदनुभवेनैव फलं लप्स्यते। शिक्षाक्षेत्रे समुत्पन्नानां समस्यानां मूलकारणमन्विष्य तन्निराकरणेनैवेदानीं समाजस्योद्धारः साधीयान्। विद्यापूर्णशिक्षकाणां तुलना जलभरितकुण्डिकया विद्यार्थिनाञ्चोपमा तस्याः प्रणालिन्या कर्त्तुं शक्यते। जलकुण्डिकाया जलं शुद्धञ्चेत्, तर्हि प्रणालिन्या अपि जलं शुद्धमेव निस्सरेत्। अतः स्वकीयान् दोषानपहाय विद्यार्थिनामुचितं मार्गदर्शनं शिक्षकाणां कर्त्तव्यमस्ति। अयमेव विद्याया गूढार्थः। संकीर्णायाः क्षुद्रायाश्च मनोवृत्त्याः पृथक्भूयोदात्तां परार्थप्रतिपादिनीं श्रमभावनां ते पुष्येयुः।

सर्वेऽप्येक एवेति समत्वमेकत्वञ्चेति प्रतिष्ठापयितव्ये। 'ईशावास्यमिदं सर्वं' 'वासुदेवमिदं' 'ईश्वरः सर्वभूतानां' एतत्प्रभृतीन्युपनिषद्वाक्यानि भावमेतमेवोद्बोधयन्ति। निजापत्यानीव विद्यार्थिनः प्रति शिक्षका व्यवहरेयुः। रसायनशास्त्रेण सहाध्यात्मिकोरसोऽपि शिक्षार्थिनां कृते पाययितव्यः। भौतिकशास्त्रेण समं दर्शनज्ञानमपि तेभ्य आवश्यकम्। अर्थशास्त्रेण साकं धर्मशास्त्रस्याप्यध्यापनं कार्यम्। जीवनमिदमस्त्येको वृक्षः। सम्वर्द्धिताः सम्बन्धा एवास्य स्कन्धाः। विचाराः सन्ति पुष्पाणि। आनन्द एवैतस्य वृक्षस्य फलम्। चारित्र्यमेव फलस्यास्य मधुरो रसः। आत्मविश्वासो वृक्षस्य मूलम्। वर्तमानशिक्षायामात्मविश्वासस्याभावो विद्यते। सदाचाररसस्तत्र नास्ति। न केवलमेतावदेव, तत्र तु न दृश्यतेऽनुशासनमपि। 'मनस्यन्यत्, वचस्यन्यत्, कर्मण्यन्यत्' सर्वत्र वर्तते। मानवतायाः पोषयित्री न तु शरीरस्य मानवं माधवं विधात्री, सत्यधर्मप्रेमशान्त्यादितत्त्वानः वर्द्धयित्री शिक्षा साम्प्रतमावश्यकी। अनेनैव शिक्षासंस्थानां चरमेण लक्ष्येण भवितव्यम्। विद्याभ्यासस्य तदैव सार्थकतोपपद्यते।

(रविवासरीययुगधर्मस्य (३०, ११,८०) सौजन्यात्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समस्त—संसार — सभ्यताप्रथमप्रस्रवणे धर्मैकप्राणभूते भारते वर्षे एक एव धर्मः सम्प्रदायभेदाद् बहुधा संकीर्त्यते । एष धर्मो 'वेदोऽखिलो धर्ममूलमित्यादिनाखिलवेद-प्रतिपाद्य एव सर्वैरुररीक्रियते । वेदस्य ज्ञान-कर्मोपासनाकाण्डमयतया त्रयस्यापि धर्मत्व-मेव समुदीरितम् । अन्तिमे काण्डे "सत्यंज्ञान-मनन्तं ब्रह्म" "शिवमद्वैतमानन्दं तुरीयम्" आनन्दं वै "ब्रह्मणो रूपं" आनन्दो ब्रह्म इति व्यजानात्, आनन्दाद् ह्येव इमानि-भूतानि जायन्ते" इत्यादि श्रुतिवचनैः आनन्दस्यैव ब्रह्मरूपत्वं सूक्तं भवति । स च+आनन्दः शिव एव तथा च श्वेताश्वतरोपनिषदि—

यदा तमस्तत्र दिवा न रात्रि
न सन्न चासच्छिव एव केवलः
तदक्षरं तत्सवितुर्वरेण्यं
प्रज्ञा च तस्मात् प्रसृता पुराणी ॥
(४/१८)

सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवांस्तस्मात् सर्वगतः शिवः ॥
(२/११)

सर्वव्यापकत्वादेवास्य देवस्याष्टमूर्तित्व-मपि इदमेव द्योतयति । अयं हि शिवः "शेतेऽस्मिन् सर्वं जगदिति शिवः" अथवा 'शिवमस्यास्तीति शिवः' आहोस्वित् शिवयति+इति शिवः एतद्व्युत्पत्तिबलादपि+आनन्द रूपत्वमेव यतः यः कल्याणरूपः स आनन्द एव भवति । उपासनाकाण्डानुसारेणायमेव शिवो ध्येयस्तथा चाथर्वशिखोपनिषदि "ध्यायीतेशानं प्रध्यायितव्यम् । सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते । ....कारणं तु ध्येयः सर्वैश्वर्यसम्पन्नः । सर्वेश्वरः शम्भुराकाशमध्ये-"इति । केवलमुपनिषद्येव न, माध्यंदिनीसंहितायामपि षोडशाध्याये "नमः शम्भवाय च मयोभुवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च" अनयापि कण्डिकया शिवो ध्यातव्य इत्येव गम्यते । तस्य सर्वदाध्येयत्वेऽपि शिव शक्तिविशेषतया चतुः प्रहरपूजादिभिः (जागरणादिभिः) ध्यानार्हा । शिवप्रिया रात्रिः शिवरात्रिः शिवस्य रात्रिर्वा शिवरात्रिः उत शिवा चासौ रात्रिः शिवरात्रिः अनेन शिव-रात्रिशब्देनावच्छेदकावच्छेदेन सर्वासां रात्रीणां ग्रहणमथवा यत्किंचिदवच्छेदेन कस्याश्चनैकस्या एवाद्यपक्षे कालरात्रिर्महा-रात्रिर्मोहरात्रिश्चेत्येतासां रात्रीणां सत्वाद-व्याप्तिप्रसंगः । द्वितीयपक्षे च केयं रात्रिः कथञ्चास्याः शिवप्रियत्वं+इति जिज्ञासायां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मदर्शनज्योतिषायुर्वेदानामन्योन्यसम्बन्धसत्वादीशानसंहितावाक्यमंत्रोपन्यस्यते—

माघकृष्णचतुर्दश्यामादिदेवो महानिशि।
शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः।
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः॥

उपरितमवाक्ये माघकृष्णपक्षस्योल्लेखे सत्यपि संवत्सरमासानां सौरचान्द्र द्वैविध्य प्रतिपादनात् सौरपक्षे अमान्तो मासः इति फाल्गुनत्वमेव तस्याः। पूर्णिमान्तमासे तु फाल्गुनकृष्णत्वं तु स्वत एव सिद्धम्। रात्रि शब्दनिष्पत्तिः दानार्थकाद् राधातो। राति ददाति आनन्दं इति रात्रिः रात्रिरेव सर्वेषामानन्ददायिनी। भोगी वा स्यात् योगी वा स्यात् यः कोऽपि भवेत्, सर्वैरेवात्रानन्दोऽनुभूयते। अतएवेयं शिवा रात्रिः। इयमेव रात्रिरुभयोरानन्दात्मकेनाभिन्नत्वात् शिवप्रिया। अतएव शक्ति-शक्तिमतोरभेद इत्यपि संगच्छते शुक्लपक्षचतुर्दश्या चतुर्दशीत्वेऽपि न शिवप्रियत्वं तस्याः। कृष्णपक्षचतुर्दशी एव प्रिया। अत्रेदं प्रतिपत्तव्यम्+अमावस्यासन्निहिता चतुर्दशी एव द्वयोरभेदप्रतिपत्तौ निदानम्। अमावस्या शब्दो हि अमा सह वसतोऽस्यां चन्द्रार्कौ इत्यर्थं प्रतिपादयति। चतुर्दश्यां चन्द्रस्य यत्किंचिदंशेव+अवस्थितिः, अमावस्यायां द्वयोरैक्यमुपजायते। एवमेव जीवात्मनोरभेदप्रतिपत्तिरस्यामेव भवितुं शक्या "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुति प्रतिपादितत्वात्। चन्द्रश्च जीवः यत्किंचिद् रूपेण चतुर्दश्यां जीवस्य स्थितिर्जायते। अमावस्यायां द्वयोरभेदः अतएवामायां पारणा प्रतिपादिता। अस्यामेव तिथौ ब्रह्मविष्णो रात्मनो श्रेष्ठाश्रेष्ठत्वविषयके विवादे जायमाने भगवतस्सदाशिवस्याग्निस्तम्भरुपेणाविर्भावः तमवलोक्य द्वयोर्विवादः पलायितः तौ तदाद्यन्तपारं प्राप्तुं पातालाकाशयोर्गतवन्तौ परं पारमनवाप्य शान्तौ पुनस्तत्रैव विश्रान्तौ। अस्माद्धेतोरियमेव चतुर्दशी शिवप्रियत्वात् शिवरात्रिः। इयं चतुर्दशी यस्मिन् दिने महानिशा व्याप्तिमती सैव ग्राह्याः भवति। महानिशायां तस्याविर्भूतत्वात्। महानिशा च द्वितीयप्रहरस्यान्तिमैका घटिका तृतीयप्रहरस्यादिमैकनाडिका। घटिकाद्वयमितोऽयं कालः महानिशा शब्देन व्यवह्रियते। फाल्गुनमासाविर्भूतत्वं इदमुपदिशति। फाल्गुने मासि+अचेतना अपि स्वकीय-परिवारमोहं परित्यजन्ति तथा चोक्तं त्रिविक्रमेण—

भवन्ति फाल्गुने मासि वृक्षशाखा विपल्लवाः इत्थं चेतनैर्बुद्धिमद्भिः परिवारमोहः सर्वथा त्याज्यो येन वृक्षा इवाग्रेऽपूर्वानन्दातिरेकप्राप्तिः स्यात्। सा चापूर्वानन्दप्राप्ति+तन्मयीभावः।

अयमेव सदाशिवः परात्परो देवः इति श्रुतिवाक्यैर्बहुशः प्रतिपादितम्। तानि च श्रुतिवाक्यानि—

एको हि रुद्रो न द्वितीयाय तस्थुः १२/३/२
विश्वाधियो रुद्रो महर्षिः १२पे. ३/४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अचिन्त्यमव्यक्तमनन्तरूपं
शिवं प्रशान्तममृतं ब्रह्मयोनिम् ।
तमादिमध्यान्तविहीनमेकं
विभुं चिदानन्दमरूपमद्भुतम् ।।
कै. उ., १/६-७

दार्शनिकैरयमेव सदाशिवो ब्रह्मेश्वरपुरुषादिसंज्ञया व्यवह्रियते । एतदेव वेदेऽपि "एकमेवाद्वितीयं ब्रह्म" "नेह नानास्ति किंचन" इत्येवं ब्रह्मरूपत्वं प्रतिपाद्य एकं सद्विप्राः बहुधा वदन्ति अनेन श्रुतिवाक्येन एकस्यैव तस्य बहुरूपत्वं समाख्यातम् । एतदेवाभिप्रेत्य संप्रदायाचार्यैर्विभिन्नानि नामानि प्रकल्प्यात्माभिमतस्य कस्य वैशिष्ट्यं दर्शयित्वा पर ब्रह्मणि एव स्वकीयः सिद्धान्तः विलयितः । एवमेव पौराणिकैरपि हरिहरयोरभेदं प्रतिपादयद्भिः ज्ञानभेदादेव भेदो निरूपितः यथा च भाणितिरुपोद्वलिकास्य—

हरिहरयोः प्रकृतिरेका
प्रत्ययभेदेन रूपभेदोऽयम् ।
एकस्यैव नटस्यानेकविधा
भूमिकाभेदात् ।।

वस्तुतस्तु सर्वेषामेव देवानाम् एकरूपतैव तत्तत्पुराणेषु सिद्धान्तिता । हरिहरयोस्तु गौरतेजो विना यस्तु श्यामतेजः समर्चयेत्.... स भवेत् पातकी शिवे इत्यादिना स्पष्टमेवाभेदो निर्दिष्टः ।

सर्वैरेवात्मकल्याणेप्सुभिर्मुमुक्षुभिर्योगिभिश्च स्वस्वाभीष्टसिद्धये उभयरूपस्यापि शिवस्योपासनादिभिस्तदात्मता प्रापणीया । शिवः शान्तिकरः शमकरः शंकरः सर्वथा सुखसमृद्धये शान्तये च समाजस्य कल्याणकारी भवेत् । समये चास्मिन् शान्ते कल्याणस्य च देशविदेशीयैः सर्वैरपि आवश्यकताऽनुभूयते अतएव वैदेशिकैः साम्प्रतं स एव पन्था बहुश आद्रियते ।

कल्याणरूपोऽय शिवः सर्वस्य जगतः श्रेयसे कल्पेत । कल्याणात्मभूत्वादादर्शभूतोऽयं शिवः सर्वैरेवोपास्यः, उपासितश्चायं सर्वानिष्टप्रशमनद्वारा शुभं दिश्यादेव ।

मुफ्त ! मुफ्त !! मुफ्त !!!

सफेद दाग

अगर आप सफेद दाग या किसी प्रकार के चर्म रोगों से परेशान हैं तो चिन्ता न करें। आप हमारे यहां से दो पाकेट लगाने की विजय बूटी मुफ्त मंगाकर केवल ५ दिनों में लाभ प्राप्त करें। रोग विवरण लिखें।

सफेद बाल

मैं अधिक प्रशंसा करना नहीं चाहता, हमारे आयुर्वेदिक "केश कान्ति" तेल से बालों का पकना रुक कर सफेद बाल काले हो जाते हैं। मूल्य १०) तीनशीशी २७) रु० ।

हिन्द आयुर्वेद भवन, (B. H. 579) पो० कतरी सराय (गया)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिक्लेशेन ये अर्थाः धर्मस्यातिक्रमेण वा ।
अरेर्वा प्रणिपातेन मा स्म तेषु मनः कृथाः ।।

—विदुर नीति

जो धन अत्यन्त क्लेश उठाने से, धर्म का उल्लंघन करने से अथवा शत्रु के सामने सिर झुकाने से प्राप्त होता हो, उसमें आप मन न लगाइए ।

संतन को कहाँ सीकरी* सो काम ।
आवत-जात पन्हैया टूटी, बिसर गयो हरिनाम ।।
जिनको मुंह देखे दुःख उपजत, तिनको करिबै परी सुलाम ।।

—संत कुम्भनदास

* सीकरी-आगरा के निकट तत्कालीन मुगल राजधानी

एकं शास्त्रं देवकीपुत्रगीतमेको देवो देवकीपुत्र एव ।
मन्त्रोऽप्येकस्तस्य नामानि यानि-कर्माप्येकं तस्य देवस्य सेवा ।

अर्थात् (१) भगवान देवकी नन्दन कृष्ण द्वारा गाई गीता ही मुख्य शास्त्र है । (२) वही देवकी नन्दन भगवान कृष्ण एकमात्र देव हैं (३) उनके जितने नाम हैं वे ही मुख्य मन्त्र हैं (४) उनकी सेवा ही एक मात्र कर्म है ।

—महाप्रभु वल्लभाचार्य

आसिन्धुः सिन्धुपर्यन्ता-यस्य भारतभूमिका ।
पुण्यभूः, पितृभूश्चैव-स वै हिन्दुरिति स्मृतः ।।

—वीर सावरकर

सिन्धु महानद से लेकर सागर पर्यन्त इस भारत की भूमि को जो व्यक्ति अपनी पुण्यभूमि और पितृभूमि स्वीकार करता है, वही "हिन्दू" है ।

"पर उपदेश कुशल बहुतेरे,
जे आचरहिं ते नर न घनेरे" —गोस्वामी तुलसीदासजी

वह मुसाफिर क्या जिसे कुछ शूल ही पथ से थका दें ?
हौसला वह क्या जिसे कुछ मुश्किलें पीछे हटा दें ? —अज्ञात

पंजाबी चन्दू हलवाई करांचीवाला

कार्यालयः—१८५, बालकेश्वर रोड, तीनबत्ती, बम्बई—४००००६

स्थापना—१८९६ शाखायें :— तारका पताः—'चन्दूमेवा'

(१) जवेरी बाजार (२) ग्रान्टरोड (३) कोलावा (४) दादरा (५) वरली नका (६) सायन सर्कल (७) ठाकुरद्वार (८) सूर्योदयस्टोर्स, चर्चगेट (९) घाटकोपर (पश्चिम) (१०) लिंकिंग रोड, (११) रेलवे स्टेशन के सामने, सांताक्रुज (पश्चिम)

कारखाना :—चन्दू भवन, ग्रान्टरोड, बम्बई-४०००७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्व-वार्ता:—

अमरीकीयानुदानेषु ह्रास-संभावना:

(श्री विश्वदर्शी)

अमेरिकायां नवनिर्वाचितेन राष्ट्रपतिना रेगनेन जनवरीमासे कार्यमारब्धमिति विदन्त्येव पाठका:। नवराष्ट्रपते: का नीतिर्भविष्यति विश्वस्य विभिन्नदेशेभ्य: साहाय्यप्रदाने इति त्वमरीकीयसंसदाऽन्तिमत: पारितेन आयव्ययकेन स्पष्टीभविष्यति किन्तु आयव्ययकप्रस्तावा यथा राष्ट्रपतिना प्रस्तुतान् विलोक्य स्पष्टीभवति यन्नवराष्ट्रपतिर्विभिन्नदेशेभ्य: प्रदेये अमरीकीयसाहाय्यानुदाने सुमहान्तं ह्रासं चिकीर्षति। विभिन्नदेशेभ्य: शिक्षा-संस्कृतिमानवसाहाय्यादीनां कृते अमेरिकादेश: सर्वाधिकं साहाय्यमनुदानरूपेण प्रयच्छति। गतराष्ट्रपतिना कार्टरेण सप्तशतार्बुदडालरमितो राशि: (7,43 बिलियनडालर) नववर्षेऽनुदानरूपेण प्रदेय इति मनोनीतमभूत् किन्तु रेगनो राशिमिमं सार्धपंचशतार्बुदडालरमात्रमेव स्थापयितुमीहते। विश्वबैंकअन्तरराष्ट्रीयविकासाभिकरणादि माध्यमेन यत्साहाय्यमृणरूपेण देशेभ्य: प्रदीयते, तस्यापि व्यवस्था अमरीकीयधनेनैव भवति। संयुक्तराष्ट्रसंघस्य विभिन्नाभिकरणानि (शिक्षाविज्ञानसंस्कृतिसंस्थाप्रभृतीनि) अमरीकीयधनेनैव देशेभ्यो मुक्तां सहायतां (बन्धरहितां), प्रददति।

एवं हि साहाय्यानुदानराशौ ह्रासं कृत्वा रेगन: पेट्रोल–रक्षासामग्र्यादिष्वधिकं व्ययं कुर्यादिति संभाव्यते। अनुदानमपि तेभ्यो देशेभ्य: प्राथमिकतया प्रदीयेत ये हि अमरीकादेशस्य प्रकटं मित्राणि, सहायका:, अधीना वा। बन्धरहिताया: सहायताया न कोऽपि लाभो भवत्यन्तत: इति हि रेगनस्य विचारधारा प्रतीयते। अनेन हि भारतस्य विकासकार्यक्रमोपरि विपरीत: प्रभावो भवेदित्यप्याशंक्यते। भारतं हि षष्ठपंचवर्षीययोजनाया: क्रियान्वयनाय 5589 कोटिरूप्यकाणां वैदेशिकसहायतामपेक्षते, किन्तु अमरीकीय–साहाय्यानुदानेषु ह्रासे सति तत्रापि कश्चन ह्रासो भविष्यत्येवेत्याशङ्काऽस्ति। तदानीं हि शिलातैलोत्पादकानां (पेट्रोल) नवधनाढ्यानां देशानां साहाय्यमेवापरं स्रोतो भविष्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरित क्रान्ति के बाद श्वेत क्रान्ति

30 वर्ष पहले खाद्यान्न की दृष्टि से कमी वाला राजस्थान अब "हरित क्रांति" द्वारा अपनी आवश्यकता का खाद्यान्न स्वयं उपजाता है।

पशुधन यहां की ग्रामीण अर्थ-व्यवस्था का एक बड़ा आधार है। भारत के कुल दूध उत्पादन का 12 प्रतिशत राजस्थान ही देता है। किसानों को 2200 सहकारी समितियां अब 26 में से 19 जिलों में "श्वेत क्रांति" का मार्ग आगे प्रशस्त कर रही है।

राज्य में 2376 दुग्ध संग्रहण केन्द्र, व दुग्ध परियोजनायें तथा 12 दुग्ध अवशीतन केन्द्र कार्यरत हैं तथा 12 अवशीतन केन्द्र का कार्य प्रगति पर है। इस वर्ष अलवर में डेंयरी और कोटपूतली, भीलवाड़ा व दौसा में अवशीतन केन्द्र चालू किये गये हैं। भरतपुर तथा अजमेर जिलों में संतुलित पशु-आहार के कारखाने चालू हो चुके हैं तथा जोधपुर और बीकानेर में भी ऐसे कारखाने बनने जा रहे हैं।

डेयरी विकास के इस कार्यक्रम से इस वर्ष सवा लाख किसान या पशु-पालक परिवार लाभान्वित हैं। अगले वर्ष यह संख्या डेढ़ लाख हो जाने की आशा है।

राजस्थान सरकार द्वारा प्रसारित

पत्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्

पत्रकम् ४ (नियमः ८)

१. प्रकाशनस्थानम्	जयपुरम्
२. प्रकाशने कालावधि	मासिकपत्रम्
३. मुद्रकस्य नाम	राधेश्यामशर्मा, श्रीशङ्कर आर्ट प्रिण्टर्स
नागरिकता	राजस्थानीयः
संकेतः	त्रिपोलिया बाजार, जयपुरम्
४. प्रकाशकस्य नाम	संस्कृतप्रचारपरिषद्, राजस्थान
नागरिकता	राजस्थानीयः
संकेतः	भारती भवन, बी० १५ न्यू कालोनी, जयपुरम्
५. प्रधान सम्पादकस्य नाम	श्री जगदीशशर्मा
नागरिकता	भारतीयः
संकेतः	खूंटेटों का रास्ता, जयपुरम्
६. पत्रस्य संपत्तेः अधिकारिणां आधिकारस्यांशभाजां वा जनानां संस्था वा नाम संकेतश्च	'संस्कृतप्रचारपरिषद्' राजस्थानम्

इयं संस्कृतप्रचारपरिषद् घोषयति यद् उपरि लिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति।

दिनाङ्कः १–३–८१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारी-स्तम्भः

भयः सन्त्रासो वा परिहार्यः

डॉक्टर श्रीमती श्रीराजेश्वरीभट्टः
लालबहादुर शास्त्री कालेज, जयपुरम्

प्रत्येकं मानवः जीवने यदा कदा भीतिग्रस्तो भवति। केचन स्वप्नदर्शनाद्बिभ्यति केचन च दुर्घटनाग्रस्ताः सन्तो बिभ्यन्ति। कोऽपि जनः अग्निं, अगाधं जलं वा दृष्ट्वा भूतप्रेतादिभ्यो वा बिभेति अन्ये च सर्पेभ्यो वानरेभ्योऽन्येभ्यश्च प्राणिभ्यो बिभ्यति। भयः सर्वेषां सामान्य धर्मः। किन्तु नार्यः प्रायशोऽधिकमेव भीतिभीता जायन्ते। अल्पकायं मूषकमपि दृष्ट्वा ताः प्रोच्छ्वलन्ति का कथा न्येषां जीवजन्तूनाम्। प्रायशः कुक्कुरादयः भयभीतं जनं दृष्ट्वा तस्मिन् प्रहरन्ति अधिकञ्च तं भीषयन्ति। मातुः भयभीततायाः शिशुषु प्रभावोऽपि न साधु जायते। तेषां हृत्सु भयस्य भावना समुदेति। अनेकान्युदाहरणानि समुपलभ्यन्ते यत् मानवः भयं विजित्य स्वकर्मणि साफल्यमलभत। आगतन्तु भयं वीक्ष्य नरः यथोचितमुपायं विदध्यात्। कदाचन भयो नानारोगाणां हेतुः कदाचन च मृत्युमपि समामन्त्रयति। अतः स्वचित्तात् भयस्य भावना सर्वथा परिहरणीया अनेनैव क्षेमकुशलम्भवति।

प्रत्येक व्यक्ति जीवन में भयभीत होता है। कुछ भयानक स्वप्न को देखकर अथवा किसी दुर्घटना ग्रस्त हो जाने के कारण भय सहसा आ घेरता है। कोई व्यक्ति अग्नि से, कोई गहरे पानी से कुछ लोग भूतप्रेत आदि से डर जाते हैं। सर्प, बन्दर अथवा छिपकली जैसे अन्य जीव भी कभी कभी भय का कारण बन जाते हैं। भय सभी को लगता है यह सामान्य धर्म है किन्तु स्त्रियां प्रायः अधिक डर जाती हैं। छोटे से चूहे को देखकर भी वे उछल पड़ती हैं। और जीवों का तो कहना ही क्या। प्रायः कुत्ता आदि जन्तु डरे हुए व्यक्ति को देखकर उसपर प्रहार करते हैं उसे अधिक डराते हैं। माता के डरने का बच्चों पर भी अच्छा प्रभाव नहीं पड़ता। उनके चित्त पर भय की अमिट भावना अंकित हो जाती है। अनेक ऐसे उदाहरण मिलते हैं कि मनुष्यों ने भय पर विजय पाकर अपने कार्यों में सफलता पायी। आये हुए भय को देखकर मनुष्य को समुचित प्रतीकार करना चाहिये। कभी कभी भय से अनेक रोग हो जाते हैं और कभी तो यह मृत्यु के लिए भी आमन्त्रण बन जाता है। अतः अपने चित्त से भय का सर्वथा परिहार करना चाहिए। इससे मानव मात्र का क्षेम कुशल होगा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद साहित्य की अमूल्य भेंट

वैद्य सहचर

लेखक—पं० विश्वनाथ द्विवेदी

वैद्य बन्धुओ,

चिकित्सा पद्धति को आगे बढ़ाने के लिए एक ही मार्ग है, और वह है—चिकित्सा शास्त्र के योगों पर पुनः नये सिरे से अन्वेषण कर उन्हें इस रूप में रख देना कि प्रत्येक साक्षर पुरुष उनको एक निश्चित रूप में प्रयोग कर समुचित लाभ उठा सके।

'**वैद्यसहचर**' ऐसे ही रहस्य का भण्डार है। इसमें श्री ललितहरि आयुर्वेदिक कालेज, पीलीभीत में प्रयुक्त होने वाले ५० वर्षों के सुपरीक्षित और अव्यर्थ योगों का भी संग्रह है।

प्रस्तुत पुस्तक का उद्देश्य साधारण वैद्य को चिकित्सा मार्ग में सफल चिकित्सक बनाना है। सन्तोष का विषय है कि वैद्य समाज ने इसे अपनाया। इसके ६ संस्करण हो चुके हैं, यह इसकी उपयोगिता का स्पष्ट प्रमाण है।

पं० विश्वनाथ जी द्विवेदी ने इसके नये संस्करण को अधिक उपयोगी बना कर श्री बैद्यनाथ आयुर्वेद भवन लिमिटेड के निर्देशक वैद्यराज पं० रामनारायणजी शर्मा को प्रकाशित करने को दिया। ३४५ पृष्ठ की वैज्ञानिक पुस्तक का मूल्य ६-५० रु० मात्र है। बैद्यनाथ दवाओं के विक्रेताओं के पास भी यह पुस्तक मिलती है।

प्रकाशक,

श्री बैद्यनाथ आयुर्वेद भवन लिमिटेड,

गेट नाग रोड, नागपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुधर्मा-सुदेहा-चरितम्

सूत उवाच

१

अतः परं च घुश्मेशं ज्योतिर्लिंगमुदाहृतम् ।
तस्यैव च सुमाहात्म्यं श्रूयतामृषिसत्तमाः ।।

२

दक्षिणस्यां दिशि श्रेष्ठो गिरिर्देवेति संज्ञकः ।
महाशोभान्वितो नित्यं राजतेऽद्भु ुदर्शनः ।।

३

तस्यैव निकटे एको भारद्वाजकुलोद्भवः ।
सुधर्मा नाम विप्रश्च न्यवसद् ब्रह्मवित्तमः ।

४

तस्य प्रिया सुदेहा च शिवधर्मपरायणा ।
पतिसेवापरा नित्यं गृहकर्म विचक्षणा ।।

५

सुधर्मा च द्विजश्रेष्ठो देवतातिथिपूजकः ।
वेदमार्गपरो नित्यमग्निसेवा–परायणः ।।

६

त्रिकालसंध्यायुक्तः सः सूर्यरूपसमद्यु तिः ।
शिष्याणां पाठकश्चैव वेदशास्त्रविचक्षणः ।।

७

धनवांश्च परो दाता सौजन्यगुणभाजनः ।
शिवकर्मरतो नित्यं शैवः शैवः जनप्रियः ।।

८

आयुर्बहुव्यतीयाय तस्यधर्मं प्रकुर्वतः ।
पुत्रश्च नामवत्तस्य ऋतुः स्यादफलस्त्रियाः ।।

९

तेन दुःखं कृतं नैव वस्तुज्ञानपरेणहि ।
आत्मनस्तारक श्चात्मा ह्यात्मनः पावनश्च सः ।

१०

इत्येवं मानसं धृत्वा दुःखं न कृतवांस्तदा ।
सुदेहा च तदा दुःखं चकारातुलसंभवम् ।

११

नित्यं च स्वामिनं सा वै प्रार्थयेद्यत्नसाधने ।
पुत्रोत्पादनहेतोश्च सर्वविद्याविशारदम् ।।

१२

सोऽपि स्त्रियं तदाप्राह किंपुत्रस्यकरिष्यति ।
का माता कः पिता पुत्रःकोबन्धुश्च प्रियश्च कः ।।

१३

सर्वं स्वार्थपरं देवि त्रैलोक्यां नात्र संशयः ।
जानीहि त्वं विशेषेण बुद्ध्या शोकं न वै कुरु ।।

१४

तस्माद्देवि त्वया दुःखं त्यजनीयं सुनिश्चितम् ।
नित्यं मह्यं त्वया नैव कथनीयं शुभव्रते ।।

१५

एवं तां सन्निवार्य्यैव भगवद्धर्मतत्परः ।
आसीत्परमसंतुष्टो द्वन्द्वदुःखं समत्यजत् ।

१६

कदाचिच्च सुदेहा वै गेहे च सहवासिनः ।
जगाम प्रियगोष्ठचर्थं विवादस्तत्रसंगतः ।।

१७

तत्पत्नी स्त्रीत्वभावाच्च भर्त्सिता सा तया तदा ।
उक्ता चेति दुरूक्त्या वै सुदेहा विप्रकामिनी ।।

पत्न्युवाच

१८

अपुत्रिणि कथं गर्वं कुरुषे पुत्रिणी ह्यहम् ।
मद्धनं भोक्ष्यते पुत्रो धनं ते कश्च भोक्ष्यते ।।

१९

नूनं हरिष्यते राजा त्वद्धनं नात्र संशयः ।
धिग्धिक्त्वां ते धनं धिक्च धिक्ते मानं हि वंध्यके ।

सूत उवाच

२०

भर्त्सिता ताभिरिति सा गृहमागत्य दुःखिता ।
स्वामिने कथयामास तदुक्तं सर्वमादरात् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२१

ब्राह्मणोऽपि तदा दुःखं न चकार सुबुद्धिमान् ।
कथितं कथ्यतामेव यद्भावि तद्भवेत्प्रिये ॥

२२

इत्येवं च तदानेन ह्याश्वस्तापि पुनः पुनः ।
न तदा सात्यजद् दुःखं ह्याग्रहं कृतवत्यसौ ॥

सुदेहाउवाच

२३

यथा यथा त्वया पुत्रः समुत्पाद्य प्रियोसि मे ।
त्यक्ष्यामि ह्यन्यथाऽहं च देहं देहभृतावर ॥

सूत उवाच

२४

एवमुक्तं तया श्रुत्वा सुधर्मा ब्राह्मणोत्तमः ।
शिवं सस्मार मनसा तदा ग्रहनिपीड़ितः ॥

२५

अग्नेरग्रेऽक्षिपत्पुष्पद्वयं विप्रो ह्यतंद्रितः ।
मनसा दक्षिणं पुष्पं तं मेने पुत्रकामदम् ॥

२६

एवं कृत्वा पणं पत्नीमुवाच ब्राह्मण, स च ।
अनयोर्ग्राह्यमेकं ते पुष्पं पुत्रफलाप्तये ॥

२७

तथा च मनसा धृत्वा पुत्रश्चैव भवेन्मम ।
तदा च स्वामिना यच्च धृतं पुष्पं समेतु माम् ॥

२८

इत्युक्त्वा च तया तत्र नमस्कृत्य शिवं तदा ।
नत्वा चाग्निं पुनः प्रार्थ्य गृहीतं पुष्पमेककम् ॥

२९

स्वामिना चिंतितं यच्च तद् गृहीतं तया नहि ।
सुदेहया विमोहेन शिवेच्छासंभवेन वै ॥

३०

तद् दृष्ट्वा पुरुषश्चैव निश्वासं तर्ह्य मोचयत् ।
स्मृत्वा शिवपदाम्भोजमुवाच निजकामिनीम् ।

सुधर्मोवाच

३१

निर्मितं चेश्वरेणैव कथं चैवान्यथा भवेत् ।
आशा त्यज प्रिये त्वं च परिचर्य्यां कुरु प्रभो ॥

३२

इत्युक्त्वा तु स्वयं विप्र आशां परिविहाय च ।
धर्मकार्यरतः सोऽभूच्छंकरध्यानतत्परः ॥

३३

सा सुदेहाऽऽग्रहं नैव मुमोचात्मजकाम्यया ।
प्रत्युवाच पतिं प्रेम्णा सांजलिर्नतमस्तका ॥

सुदेहोवाच

३४

मयि पुत्रो न चास्त्वन्यां पत्नीं कुरु मदाज्ञया ।
तस्या नूनं सुतश्चैव भविष्यति न संशयः ॥

सूत उवाच

३५

तदैव प्रार्थितो वै स ब्राह्मणः शैवसत्तमः ।
उवाच स्वप्रियां तां च सुदेहां धर्मतत्परः ॥

सुधर्मोवाच

३६

त्वदीयं च मदीयं च सर्वंदुःखं गतं ध्रुवं ।
तस्मात्त्वं धर्मविघ्नं मे प्रिये मा कुरु साम्प्रतं ॥

सूत उवाच

३७

इत्येवं वारिता सा च स्वमातुः पुत्रिकां तदा ।
गृहमानीय भर्तारं वृणोत्वेना मिदं जगौ ॥

सुधर्मोवाच

३८

इदानीं वदसि त्वं च मत्प्रियेयं ततः पुन ।
पुत्रसूश्च यदा स्याद्वै तदा स्पर्द्धां करिष्यति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत उवाच

३९

इत्युक्त्वा तेन पतिना सा सुदेहा च तत्प्रिया ।
पुनः प्राह करौ बद्ध्वा सुधर्माणं पतिद्विजाः ।।

४०

नाहं स्पर्द्धां भगिन्या वै करिष्ये द्विजसत्तम ।
उपयच्छ स्वपुत्रार्थमिमामाज्ञापयामि च ।।

४१

इत्येवं प्राथितः सोऽपि सुधर्मा प्रियया तया ।
घुश्मां तां समुपर्यस्त विवाहविधिना द्विजः ।।

४२

ततस्तां परिणीयाथ प्रार्थयामास तां द्विजः ।
त्वदीयेयं कनिष्ठा हि सदा पोष्याऽनघे प्रिये ।।

४३

उक्त्वैवं स च धर्मात्मा सुधर्मा शैवसत्तमः ।
यथायोग्यं चकाराशु धर्मसंग्रहमात्मनः ।।

४४

सा चापि मात्रपुत्री तां दासीवत्पर्य्यवर्त्तत ।
परित्यज विरोधं हि पुपोषाहर्निशं प्रिया ।।

४५

कनिष्ठा चैव या पत्नी स्वस्त्रनुज्ञामवाप्य च ।
पार्थिवान्सा चकाराशु नित्यमेकोत्तरं शतं ।।

४६

विधानपूर्वकं घुश्मा सोपचारसमन्वितम् ।
कृत्वा तान्प्रक्षिपत्तत्र तड़ागे निकटस्थिते ।।

४७

एवं नित्यं सा चकार शिवपूजां स्वकामदाम् ।
विसृज्य पुनरावाह्य तत्सपर्याविधानतः ।।

४८

कुर्वन्त्या नित्यमेवं हि तस्याः शंकरपूजनम् ।
लक्षसंख्याऽभवत्पूर्णा सर्वकामफलप्रदा ।।

४९

कृपया शंकरस्यैव तस्याः पुत्रो व्यजायत ।
सुन्दरः सुभगश्चैव कल्याणगुणभाजनः ।।

५०

तं दृष्ट्वा परमप्रीतो स विप्रो धर्मवित्तमः ।
अनासक्तः सुखं भेजे ज्ञानधर्मपरायणः ।।

५१

सुदेहा तावदस्यास्तु स्पर्द्धामुग्रां चकार सा ।
प्रथमं शीतलं तस्या हृदयं ह्यसिवत्पुनः ।

५२

ततः परं च यज्जातं कुत्सितं कर्मदुःखदम् ।
सावधानेन मनसा श्रूयतां तन्मुनीश्वराः ।।

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां घुश्मेश्वरमहात्म्ये
सुधर्मा सुदेहा चरितवर्णनं नाम द्वात्रिंशोऽध्यायः ।।३१।।

घुश्मेश्वर ज्योतिर्लिंग शिवालय शिवाड़

सूत उवाच

१

पुत्रं दृष्ट्वा कनिष्ठाया ज्येष्ठा दुःखमुपागता ।
विरोधं सा चकाराशु न सहंती च तत्सुखम् ।।

२

सर्वे पुत्रप्रसूतिं तां प्रशसंसु र्निरन्तरम् ।
तया तत्सह्यते न स्म शिशोरूपादिकं तथा ।।

३

सुप्रियं तनयं तं च पित्रोः सद्गुणभाजनम् ।
दृष्ट्वाऽभवत्तदा तस्य हृदयं तप्तमग्निवत् ।।

४

एतस्मिन्नंतरे विप्राः कन्यां दातुं समागताः ।
विवाहं तस्य तत्रैव चकार विधिवच्च सः ।।

५

सुधर्मा घुश्मया सार्द्धमानन्दं परमं गतः ।
सर्वे संबन्धिनस्तस्यां घुश्मायां मानमादधुः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६
तं दृष्ट्वा सा सुदेहा हि मनसि ज्वलिता तदा।
अत्यन्तं दुःखमापन्ना हा हतास्मीति वादिनी ।।

७
सुधर्मा गृहमागत्य वधूं पुत्रं विवाहितम्।
उत्साहं दर्शयामास प्रियाभ्यां हर्षयन्निव ।।

८
अभवद् हर्षिता घुश्मा सुदेहा दुःखमागता।
न हसंती सुखं तच्च दुःखं कृत्वाऽपतद्भुवि ।।

९
घुश्माऽवदद्वधू पुत्रौ त्वदीयौ न मदीयकौ।
वधू पुत्रं च तां प्रीत्या प्रसूश्वश्रूममन्यत ।।

१०
भर्त्ता प्रियां तां जेष्ठां च मेने नैव कनिष्ठिकाम्।
तथापि सा तदा ज्येष्ठा स्वान्तर्मलवती ह्यभूत् ।।

११
एकस्मिन् दिवसे ज्येष्ठा सा सुदेहा च दुःखिनी।
हृदये स चिचिन्तेति दुःखशान्तिः कथंभवेत् ।।

सुदेहोवाच—

१२
मदीयो हृदयाग्निश्च घुश्मानेत्रजलेन वै।
भविष्यति ध्रुवं शान्तो नान्यथा दुःखजे नहि ।।

१३
अतोऽहं मारमाम्यद्य तत्पुत्रं प्रियवादिनम्।
अग्रेभावि भवेदेवं निश्चयः परमो मम ।।

सूत उवाच—

१४
कदर्याणां विचारश्च कृत्याकृतये भवेन्नहि।
कठोरः प्रायशो विप्राः सापत्नो भाव आत्महा ।।

१५
एकस्मिन् दिवसे ज्येष्ठा सुप्तं पुत्रवधूयुतम्।
चिच्छेद निशि चांगेषु गृहीत्वा छुरिकां च सा ।।

१६
सर्वांगं खण्डयामास रात्रौ घुश्मा सुतस्य सा।
नीत्वा सरसि तत्रैवाक्षिपत्दृप्ता महाबला ।।

१७
यत्र क्षिप्तानि लिंगानि घुश्मया नित्यमेव हि।
तत्र क्षिप्त्वा समायाता, सुष्वाप सुखमागता ।।

१८
प्रातश्च वै समुत्थाय, घुश्मा नित्यंतथाऽकरोत्।
सुधर्मा च स्वयं श्रेष्ठो, नित्यकर्म समाचरत् ।।

१९
एतस्मिन्नंतरे सा च, जेष्ठा कार्यं गृहस्य वै।
चकारानन्दसंयुक्ता, सुशान्तहृदयानला ।।

२०
प्रातःकाले समुत्थाय, वधूः शय्यां विलोक्य सा।
रुधिरार्द्रां देहखण्डैर्युक्तां दुःखमुपागता ।।

२१
श्वश्रूं निवेदयामास पुत्रस्ते च कुतो गतः।
शय्या च रुधिरार्द्रा वै, दृश्यन्ते देहखण्डकाः ।।

२२
हा हतास्मि कृतं केन, दुष्टं कर्म शुचिव्रते।
इत्युच्चार्य रुरोदाति, विविधं तत्प्रिया च सा ।।

२३
ज्येष्ठा दुःखं तदापन्ना, हा हतास्मि किलेति च।
वहिर्दुःखं चकारासौ, मनसा हर्षसंयुता ।।

२४
घुश्मा चापि तदा तस्या, वध्वा दुःखं निशम्य सा
न चचाल व्रतात् तस्मान्नित्यं पार्थिवपूजनात् ।।

२५
मनश्चैवोत्सुकं नैव, जातं तस्या मनागपि।
भर्तापि च तथैवासीद्यावद्व्रतविधिर्भवेत् ।।

२६
मध्याह्ने पूजनान्ते च, दृष्ट्वा शय्यां भयावहाम्।
तथापि न तदा किंचित्कृतं दुःखं हि घुश्मया ।।

२७
ये नैवं चार्पितश्चायं, स वै रक्षां करिष्यति।
भक्तप्रियस्स विख्यातः कालकालस्सतां गतिः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२८
यदि नो रक्षिता शंभुरीश्वरः प्रभुरेकलः ।
मालाकार इवासौ या न्युक्ते तान्वियुनक्ति च ।।

२९
अद्य मे चिन्तया किं स्यादिति तत्वं विचार्य सा ।
न चकार तदा दुःखं, शिवे धैर्यं समागता ।।

३०
पार्थिवाँश्च गृहीत्वा सा, पूर्वं वत्स्वस्थमानसा ।
शंभोर्नामान्युच्चरंती, जगाम सरसस्तटे ।।

३१
क्षिप्त्वा च पार्थिवांस्तत्र परावर्तत सा यदा ।
तदा पुत्रस्तड़ागस्थो, दृश्यतेस्म तटे यथा ।।

पुत्र उवाच—

३२
मातरं ह्रि मिलिष्यामि, मृतोऽहं जीवितोऽधुना ।
तव पुण्यप्रभावाद्धि, कृपया शंकरस्य वै ।।

सूत उवाच—

३३
जीवितं तं सुतं दृष्ट्वा, घुश्मा सा तत्प्रसूद्विजाः ।
प्रहृष्टा नाभवत्तत्र, दुःखिता न यथा पुरा ।।

३४
एतस्मिन् समये तत्र, स्वाविरासीच्छिवो द्रुतम् ।
ज्योतिरूपो महेशश्च, संतुष्टः प्रत्युवाच ह ।।

शिव उवाच—

३५
प्रसन्नोऽस्मि वरं ब्रूहि, दुष्टया मारितो ह्ययम् ।
एनां च मारयिष्यामि, त्रिशूलेन वरानने ।।

सूत उवाच—

३६
घुश्मा तदा वरं वव्रे सुप्रणम्य शिवं नता ।
रक्षणीया त्वया नाथ, सुदेहेयं स्वसा मम ।।

शिव उवाच—

३७
अपकारः कृतस्तस्यामुपकारः कथं त्वया ।
क्रियते हननीया च, सुदेहा दुष्टकारिणी ।।

घुश्मोवाच—

३८
तव दर्शनमात्रेण, पातकं नैव तिष्ठति ।
इदानीं त्वां च वै दृष्ट्वा तत्पापं भस्मतां व्रजेत् ।।

३९
अपकारेषु यश्चैव, ह्युपकारं करोति च ।
तस्य दर्शनमात्रेण, पापं दूरतरं व्रजेत् ।।

४०
इति श्रुतं मया देव, भगवद्वाक्यमद्भुतम् ।
तस्माच्चैवं कृतं येन, क्रियतां च सदाशिव ।।

सूत उवाच—

४१
इत्युक्तस्तु तया तत्र, प्रसन्नोऽत्यभवत्पुनः ।
महेश्वरः कृपासिंधुः समूचे भक्तवत्सलः ।।

शिव उवाच—

४२
अन्यद् वरं ब्रूहि घुश्मे, ददामि च हितं तव ।
त्वद् भक्त्यासु प्रसन्नोस्मि, निर्विकारस्वभावतः ।।

सूत उवाच—

४३
सोवाच तद्वचः श्रुत्वा, यदि देयो वरस्त्वया ।
लोकानां चैव रक्षार्थमत्रस्थेयं मदाख्यया ।।

४४
तदोवाच शिवस्तत्र, सुप्रसन्नो महेश्वरः ।
स्थास्येऽत्र तव नाम्नाहं घुश्मेशाख्यः सुखप्रदः ।

४५
घुश्मेशाख्यं सुप्रसिद्धं, लिङ्गं मे जायतां शुभं ।
इदं सरस्तु लिङ्गानामालयं जयतां सदा ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४६

तस्माच्छिवालयं नाम, प्रसिद्धं भुवनत्रये ।
सर्वकामप्रदं ह्यैतद्दर्शनात्स्यात्सदासरः ।।

४७

तव वंशे शतं चैकं, पुरुषावधि सुव्रते ।
ईदृशाःपुत्रकाः श्रेष्ठाः भविष्यंति न संशयः ।।

४८

सुस्त्रीकाः सुधनाश्चैव स्वायुष्याश्च विचक्षणाः
विद्यावंतो ह्यु दाराश्च, भुक्तिमुक्तिफलाप्तये ।।

४९

शतमेकोत्तरं चैव, भविष्यंति गुणाधिकाः ।
ईदृशो वंशविस्तारो, भविष्यति सुशोभनः ।।

सूत उवाच—

५०

इत्युक्त्वा च शिवस्तत्र, लिङ्गरूपोऽभवत्तदा ।
घुश्मेशो नाम विख्यातः, सरश्चैव शिवालयम् ।।

५१

सुधर्मा चैव घुश्मा च, सुदेहा च समागताः ।
प्रदक्षिणं शिवस्याशु, शतमेकोत्तरं दधुः ।।

५२

पूजां कृत्वा महेशस्य, मिलित्वा च परस्परम् ।
हित्वा चांतर्मलं तत्र, लेभिरे परमं सुखम् ।।

५३

पुत्रं दृष्ट्वा सुदेहा सा, जीवितं लज्जिताऽभवत् ।
तौ क्षमा प्याचरद्विप्रा, निजपापापहं व्रतम् ।।

५४

घुश्मेशाख्यमिदंलिङ्गमित्थं जातं मुनीश्वराः ।
तत् दृष्ट्वा पूजयित्वा हि सुखं संवर्द्धते सदा ।।

५५

इति वश्च समाख्याता, ज्योतिर्लिङ्गावली मया ।
द्वादश प्रतिमा सर्व, कामदा भुक्तिमुक्तिदा ।।

५६

एतज्योतिर्लिगकथां, यः पठेच्छृणुयादपि ।
मुच्यते सर्वपापेभ्यो, भुक्ति मुक्ति च विंदति ।।

इति श्रीशिवमहापुराणे चतुर्थ-कोटि-रुद्र संहितायां घुश्मेशज्योतिर्लिङ्गोत्पत्ति महात्म्य वर्णनं नाम त्रयस्त्रिंशोऽध्यायः ।। ३२ ।।

अथ घुश्मेश्वर ज्योतिर्लिग माहात्म्य प्रारम्भ

शौनक उवाच

१

एकदा नैमिषारण्ये, सूतञ्च प्राह शौनकः ।
कथिता भवता गाथा, प्रादुरश्च घुश्मेश्वरः ।।

२

इदानीं श्रोतुकामान्नो, घुश्मेशं च शिवालयः ।
विस्तृतञ्च कियत्क्षेत्रं, वद नो वदतां वरः ।।

३

किं फलं पूजते तस्य, यात्रायाञ्च किं फलम् ।
द्वादशोर्लिगेभूतस्य, घुश्मेश्वरशिवस्य च ।।

सूत उवाच—

४

धन्या यूयं मुनिश्रेष्ठाः, यत्क्षैत्रीयकथारुचिः ।
घुश्मेशज्योतिर्लिंगस्य, दर्शने पूजने च हि ।।

५

श्रूयतां पुण्यदां गाथां, घुश्मेश्वरसमन्विताम् ।
चास्ते शिवालये रम्ये, घुश्मेश्वरः सदाशिवः ।।

६

लिंगस्य दक्षिणे भागे, नाम्ना देवगिरिर्महान् ।
चोत्तरे ह्यस्य लिंगस्य, शिवालयः सरोवरः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७

उभयोर्मध्यमे चास्ते, घुश्मेश्वर लिङ्गो महान्।
शिवालयाख्ये सरसा, शिवालयं वदन्ति वै ।।

८

दूरतो योजनैकञ्च, तावता विस्तरेण वै ।
द्वाराणि सन्ति चत्वारि, देवस्य परितोऽधुना ।।

९

पूर्वं द्वारस्य सर्वे वै, सर्पमपि वदन्ति हि ।
अस्मिन्द्वारे वै सर्पाः, शृङ्गारं भूषयन्ति च ।।

१०

रक्षको भैरवश्चास्ते, प्रत्यहं दर्शको विभोः ।
चोत्तरे बृषभो द्वारं यत्र नन्दी निवासते ।।

११

पश्चिमे द्वारकं नाट्यं, नाट्यशालाख्यद्वारकं ।
तेऽपि नृत्यन्ति वै गणाः श्रीघुश्मेश्वरसन्निधौ ।।

१२

ईश्वरे द्वारके याम्ये, तत्र लिङ्गश्च ईश्वरः ।
पश्चिमोत्तरदेवस्य, सुरसराख्यसागरः ।।

१३

वाशिष्ठी शुभदा गंगा, आप्लावयति सांप्रतम् ।
कूले सन्ति हि पुष्पाणि, मंदारस्य शुभानि च ।।

१४

पुष्पैरेवं महादेवं, पूजयन्ति सदा शिवम् ।
विल्वानि यानि चोद्याने, सम्भूतानि महान्ति च ।।

१५

नीत्वा नीत्वा सदा भक्ता श्चाधुना पूजयन्ति वै ।
मोदन्ते दर्शनं कृत्वा, नृत्यन्ति सुस्मरन्ति च ।।

१६

एवं विधौ चतुर्दिक्षु, शिवालयस्य संस्थितिः ।
राजते चार्कलिङ्गं वे, ज्योतिष्मान् घुश्मेश्वरः ।।

१७

शिवालये याम्ये तीरे, सर्वं देव तपः क्षितौ ।
ज्योतिरूपो मुने साक्षात् घुश्मेश्वर विराजते ।।

१८

अव्यक्तं परमं लिङ्गं, प्रकाशते ह्यहर्निशम् ।
दीपशिखाकृतिनश्च, योगिभिरेव दृश्यते ।।

१९

सर्वदेवमयं यस्मादेतल्लिगं परात् परम् ।
भुक्तिमुक्तिप्रदः साक्षात्, घुश्मेश्वरस्ततो विभुः ।

घुश्मेश्वर के सहस्रघट भराने का फल

२०

शिवालयोः सलिलं हि, सहस्रघटमुद्धरेत् ।
स्नापयेद् भक्तिभावेन, तस्य पुण्यफलं शृणु ।।

२१

यावत् तदम्भसां विन्दुस्तावत् कालं समैककम्
कोटिपितृन् समुद्धृत्य, शिवलोके प्रमोदते ।।

२२

अश्वमेधफलं प्राप्य, मम लोके महीयते ।
अम्भसां विन्दवो यावत्, तावद्वर्षाणि संख्यया ।।

घुश्मेश्वर के दर्शन का फल

२३

ये पश्यन्ति शिवं साक्षात्,घुश्मेशं शिवालयं ।
श्रद्धयाऽश्रद्धया वापि, तेषां पुण्यफलं शृणु ।।

२४

शिवालये जले स्नात्वा, ये माम् पश्यन्ति भक्तितः
तेषां मुक्तिर्भवेन्नित्यं, घोरात् संसारसागरात् ।।

२५

धन्यास्त एव मर्त्याश्च, दृष्टः घुश्मेश्वरश्च यैः ।
मनुष्ये येन पश्यन्ति, ज्योतिर्लिङ्ग परात्परम् ।।

२६

घुश्मेशं च शिवालये, दृष्ट्वा पापैः प्रमुच्यते ।
सुखं संवर्धते पुंसां, शुक्लपक्षे यथा शशी ।।

२७

दुर्लभं मानुषं देहं, लब्ध्वा येन कृतं न हि ।
दर्शनं घुश्मेशस्य स, चेह च भवेत् खरः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घुश्मेश्वर के पूजन का फल

२८

सरः शिवालये स्नात्वा, मामर्चयन्ति सन्ततम् ।
उद्धरिष्यामि तान् प्रीत्या, घोरात् संसारसागरात्

२९

ये तस्या वारिणा पूर्णमेकं च घटमुद्धरेत् ।
स्नापनार्थे मम शुचिः श्रद्धधानोऽनसूयकः ।।

३०

आहृतस्याग्निहोत्रस्य, यत् फलं तस्य तद्भवेत् ।
उद्धराम्यहमेतान् वै, प्रीतः संसारसागरात् ।।

३१

दध्ना क्षीरेण मधुना, सर्पिषा सलिलेन वा ।
स्नापनं ये प्रयच्छन्ति, ते तरन्ति जरान्तकाः ।।

३२

गुग्गुलं दहते यो मे, नानाधूपांश्च भक्तिमान् ।
जन्मान्तरे कृतैः पापैर्मुच्यते स न संशयः ।।

३३

यस्तु दद्यात् प्रदीपं मे, समीपे श्रद्धयाऽन्वितः ।
सूर्यप्रभेषु देवेषु, तस्योत्पत्तिर्विधीयते ।।

३४

दीपवृक्षं तु यो दद्याद्, भवने मम शोभनम् ।
तीक्ष्णदृष्टिर्भवेन्नित्यं, सर्वजन्मनि जन्मनि ।।

३५

सर्वयज्ञोपवासेषु, सर्वतीर्थेषु यत् फलम् ः
स्तुतिजप्योपहारेण, सर्वं तत् फलमाप्नुयात् ।।

३६

अत्रार्चनैः स्तवै र्यो, मां जपैर्भजति वा जलैः ।
स्वकुलानि समुद्धृत्य, स योगी मयि लीयते।।

३७

भक्त्या प्रदक्षिणां कृत्वा, घुश्मेश्वरं यथाविधिः ।
अश्वमेधसहस्राणां, तत्क्षणाल्लभते फलम् ।।

३८

परिक्रमति यो भक्त्या, लिङ्गं घुश्मेश्वरं परम् ।
सर्वजन्मार्जितैः -पापैर्मुक्तः परं स गच्छति ।।

३९

अर्धप्रदक्षिणां धाताः करिष्यति च भक्तिमान् ।
स रूपवान् भवेदत्र, निष्पापो मत्पुरं व्रजेत् ।।

४०

प्रणम्य दण्डवद् भूमौ, नमस्कारेण योऽर्चयेत् ।
स यां गतिमवाप्नोति, न तां यज्ञशतैरपि ।।

४१

भक्त्या प्रेक्ष्य नमेल्लिंगं, दण्डवत् पातयेत् तनुम् ।
तिर्यग्योनीं परित्यज्य, दुःखसंसारतस्तरेत् ।।

४२

घुश्मेश्वर इति प्राज्ञो, यो ब्रूयाद् भक्तिभावतः ।
क्रोधान्मोहाद् भयाद्दम्भात् स मुक्तोलीलयापि वा

४३

यो भोजयेद् द्विजांस्तत्र, शिवमुद्दिश्य भक्तितः ।
क्षितौ सर्वसुखं-भुक्त्वा, शिवलोकं स गच्छति ।।

४४

यो दद्याद् भोजनं भक्त्या, विप्रेभ्यःश्रद्धयान्वितः ।
योऽमृताशी भवेत्स्वर्गे, भूषितोऽमरपूजितः ।।

४५

यत्किंचिद्दीयते दानं, कामेन परमार्थतः ।
तत् सर्वमक्षयं लब्ध्वा, तत्तल्लोकान् स गच्छति।।

४६

स्वल्पमप्यत्र यत्किंचिद्, द्विजेभ्यो दीयते धनं ।
तदक्षयं भवेदाशु, दानपुण्यफलं महत् ।

४७

गीतवादित्रनृत्यैश्च, स्तुतिभिर्जागरेण वा ।
यो मे कुर्वन्ति सेवां ते, गमिष्यन्ति ममालयम् ।।

४८

म्रियते यत्र कुत्रापि, क्षेत्रे शिवालये वरे ।
ब्रह्मादिलोकं भुक्त्वा, स शिवेन सह मोदते ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४९

यो मृतो यत्र कुत्रापि, क्षेत्रे शिवालये नरः।
विधूय सर्वपापानि, शिवलोकं स गच्छति ॥

५०

घुश्मेश्वरतीर्थे हि, स्नातो शिवालयं व्रजेत् ।
त्रिसप्तकुलमुद् धृत्य, शिवलोकं सः गच्छति ॥

५१

घुश्मेशस्य शिवालयः, सर्वपापहरः शुभः।
पवित्राणां पवित्रं तु, मंगलानां च मंगलम् ॥

५२

एवं शुद्धमनो भूत्वा, घुश्मेश्वरकथानकम् ।
शृण्वन्ति श्रावयन्ति च, तेषामभ्युदयो महान् ॥

५३

सरसो ज्योतिर्लिङ्गस्य, यशो वै कीर्तयन्ति हि।
प्रत्यहं प्रयतो भूत्वा, तेषां मुक्तिः सदा भवेत् ॥

५४

आयुष्मान्कीर्तिमान्श्चापि, धनधान्यसमन्वितः।
भूमिभोगांश्च संभोज्य, चान्ते सायुज्यमाप्नुयात्

॥ इतिश्री घुश्मेश्वर-माहात्म्य-समाप्तम् ॥

जगद्गुरु भारत की मान्यता

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मति र्मम ॥

योगिराज श्रीकृष्ण

शुभकामनाओं सहित

श्री बजरंग दाल एवं तेल मिल

गोवर्धनपुरा, कोटा (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्ण जयंती वर्ष
आयुर्वेद सेवाश्रम लि.

जनसेवा के ५० वर्ष

हम आभारी हैं



ऋषि मुनियों की युगों युगों की शोध

सेवाश्रम का
गाय छाप



ब्राह्मी आँवला केश-तैल
और काला दन्त मन्जन

ब्राह्मी आँवला केश-तैल आधुनिक पद्धतिसे निर्मित केवल तैल ही नहीं एक आयुर्वेदिक सौंदर्य प्रसाधन है। तथा काला दन्त-मंजन केवल मंजन ही नहीं एक आयुर्वेदिक औषधि है।

आयुर्वेद सेवाश्रम लिमिटेड उदयपुर, वाराणसी, हैदराबाद

heros' AS-147

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतव्याकरणप्रवेशिका

हलन्त सर्वनामशब्द

लेखकः श्रीविश्वनाथमिश्रः, बीकानेरः

पूर्वाऽनुवृत्तम्—

अजन्त पुंलिग के विवेचन के अवसर पर सर्वनाम का परिचय दिया जा चुका है कि जो संज्ञा के बदले प्रयुक्त हो वे सर्वनाम कहे जाते हैं। किन्तु सर्वनाम की यह परिभाषा यद्, तद् एतद् इदम्, अदस् इन शब्दों पर ही लागू होती है। युष्मद् अस्मद् और तद् ये तीनों सर्वनाम क्रमशः मध्यमपुरुष उत्तमपुरुष और अन्यपुरुष के लिये प्रयुक्त होते हैं इसलिए इन्हें पुरुषवाचक सर्वनाम कहते हैं। युष्मद् अस्मद्, तद्, इनका प्रयोग सबके लिये होता है। उदाहरणार्थ हम किसी को "तुम" शब्द से कहते हैं। इसी प्रकार कोई भी अपने को मैं शब्द से कह सकता है। ऐसे ही वह (तद्) शब्द सर्व सामान्य का वाचक है। इस प्रकार सर्वार्थ के वाचक होने के कारण इन्हें सर्वनाम कहा जाता है। किम् शब्द प्रश्न वाचक सर्वनाम है। इदम् और एतद् ये शब्द समानार्थक हैं। सर्वनाम शब्द विशेषण होते हैं। विशेष्य के अनुसार इनके लिंग और वचन बदलते रहते हैं। युष्मद् और अस्मद् के रूप तीनों लिंगों में समान ही होते हैं। सर्वनाम शब्दों के अन्तर्गत जो तद् आदि बारह[1] त्यदादि शब्द हैं उनका सम्बोधन नहीं होता है।

एक शब्द नित्य एकवचनान्त और द्विशब्द नित्य द्विवचनान्त है। यहां कहा जा सकता है कि जब एक शब्द नित्य एकवचनान्त है तो– "एके सत्पुरुषाः परार्थघटकाः" इस श्लोक में "एके" यह बहुवचनान्त प्रयोग कैसे किया गया है तो इसका उत्तर है कि एक शब्द नानार्थक[2] है। प्रस्तुत श्लोक में एक शब्द का अर्थ प्रधान या प्रथम है। इस प्रकार यहां एक शब्द के संख्यावाची न होने के कारण यहां उसकी बहुवचनान्तता उत्पन्न हो जाती है। सर्वादिगण में पठित शब्दों की सर्वनाम संज्ञा होती है। फलस्वरूप सर्वनाम संज्ञा प्रयुक्त कार्य जैसे जश् को शी, ङे को स्मै, ङसि को स्मात्, ङि को स्मिन् और आम् को सुट्का आगम इन कार्यों के करने के उपरान्त कुछ प्रमुख हलन्त सर्वनाम शब्दों के रूप यहां प्रस्तुत किये जा रहे हैं—

१. त्यद्, तद्, यद् एतद्, इदम् अदस् एक, द्वि, युष्मद्, अस्मद्, भवत्, किम्,

२. एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे समानेऽल्पे संख्यायाञ्च प्रयुज्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किम् (कौन) पुंलिङ्ग

प्र.	कः	कौ	के
द्वि.	कम्	कौ	कान्
तृ.	केन	काभ्याम्	कैः
च.	कस्मै	,,	केभ्यः
पं.	कस्मात्	,,	,,
ष.	कस्य	कयोः	केषाम्
स.	कस्मिन्	कयोः	केषु

किम् शब्द के ये रूप पुंलिंग विशेष्य के विशेषण बनकर प्रयोग में आते हैं। उदाहरण के लिये—

१—कौन लड़का पढ़ता है = कः बालकः पठति ।

२-तुम किस गांव से आये हो=त्वं कस्माद् ग्रामात् आगतोऽसि ?

३-तुम किस विद्यालय में पढ़ते हो = त्वं कस्मिन् विद्यालये पठसि ?

उपर्युक्त वाक्यों में लड़का, गांव, और विद्यालय ये तीन विशेष्य हैं और तीनों पुंलिङ्ग हैं, अतः इनके विशेषण किम् शब्द का तत्तद् विभक्तियों का रूप विशेष्य के साथ प्रयुक्त हुआ है।

किम् शब्द स्त्रीलिङ्ग

प्र.	का	के	काः
द्वितीया	काम्	के	काः
तृतीया	कया	काभ्याम्	काभिः
चतुर्थी	कस्यै	,,	काभ्यः
पञ्चमी	कस्याः	,,	,,
षष्ठी	कस्याः	कयोः	कासाम्
सप्तमी	कस्याम्	,,	कासु

नपुंसकलिंग

किम्	के	कानि
किम्	के	कानि

तृतीया से सप्तमी तक रूप पुंलिङ्ग के समान ही नपुंसकलिङ्ग में भी होते हैं।

किम् शब्द के स्त्रीलिंग के ये रूप स्त्रीलिंग विशेष्य के विशेषण बन कर तथा नपुंसक के रूप नपुंसकलिङ्ग के विशेष्य के विशेषण बनकर प्रयोग में आते हैं। उदाहरणार्थ—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. कौन बालिका पठती है ? — का बालिका पठति

२. तुम किस शाला से आये हो ? — त्वं कस्याः शालाया आगतोऽसि ?

३. तुम किस शाला में पढ़ते हो ? — त्वं कस्यां शालायां पठसि ?

४. तुम्हारे पास कौन कौन पुस्तकें हैं—

तव पार्श्वे कानि कानि पुस्तकानि सन्ति ?

५. यह क्या है—किमिदमस्ति ।

उपर्युक्त वाक्यों में तीन वाक्य स्त्रीलिङ्ग विशेष्य वाले हैं अतः वहां किम् शब्द के स्त्रीलिङ्ग के रूपों का प्रयोग किया गया है । शेष दो वाक्यों में विशेष्य नपुंसक लिङ्ग के हैं अतः यहां नपुंसक लिंग में किम् शब्द का प्रयोग किया गया है ।

यद् शब्द के दकार को विभक्ति परमें रहने पर अकार हो जाता है इसलिये यद् शब्द अकारान्त हो जाता है । पुंलिङ्ग में इसका रूप पुंलिङ्ग किम् शब्द की भांति चलता है । स्त्रीलिङ्ग में टाप् हो जाने के कारण यद् शब्द का परिवर्तित रूप "या" हो जाता है और इसके रूप स्त्रीलिङ्ग "का" शब्द के रूप के समान होते हैं । नपुंसक लिङ्ग में किम् के कानि की भांति "यत् ये यानि" ये रूप होते हैं । इसी प्रकार तद् शब्द के भी रुप तीनों लिङ्गों में समझने चाहिए । तद् शब्द की यह विशेषता है कि पुंलिङ्ग और स्त्रीलिङ्ग में प्रथमा के एकवचन में तद् शब्द के तकार को सकार हो जाता है । इस विवेचन के आधार पर तद् शब्द के रूप पुलिङ्ग में इस प्रकार होते हैं—

	तद् शब्द (वह) पुंलिंग			स्त्रीलिंग		
प्र.	सः	तौ	ते	सा	ते	ताः
द्वि.	तम्	तौ	तान्	ताम्	ते	ताः
तृ.	तेन	ताभ्याम्	तैः	तया	ताभ्याम्	ताभिः
च.	तस्मै	"	तेभ्यः	तस्यै	"	ताभ्यः
पं.	तस्मात्	"	"	तस्याः	"	"
ष.	तस्य	तयोः	तेषाम्	तस्याः	तयोः	तासाम्
स.	तस्मिन्	तयोः	तेषु	तस्याम्	"	तासु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नपुंसक लिङ्ग में प्रथमा और द्वितीया में "तत् ते तानि" रूपों के अलावा सभी रूप पुंलिङ्ग के समान होते हैं।

	अस्मद् (मैं) (इसके रूप तीनों लिङ्गों में समान होते हैं)			युष्मद् (तुम) (तीनों लिङ्गों में समान रुप)		
प्र.	अहम्	आवाम्	वयम्	त्वम्	युवाम्	यूयम्
द्वि.	माम्	,,	अस्मान्	त्वाम्	,,	युष्मान्
तृ.	मया	आवाभ्याम्	अस्माभिः	त्वया	युवाभ्याम्	युष्माभिः
च.	मह्यम्	आवाभ्याम्	अस्मभ्यम्	तुभ्यम्	,,	युष्मभ्यम्
पं.	मत्	आवाभ्याम्	अस्मत्	त्वत्	,,	युष्मत्
ष.	मम	आवयोः	अस्माकम्	तव	युवयोः	युष्माकम्
स.	मयि	आवयोः	अस्मासु	त्वयि	युवयोः	युष्मासु

(क्रमशः)

अरुणा उद्योग

माइन आनर्स, रेंजिग कोन्ट्रेक्टर्स ट्रांसपोर्ट्स

बैंकर्स एण्ड कमीशन एजेन्ट्स

दूरभाष : ७३९२६

ग्राम अरुण उद्योग

हैड आफिस :

श्री राम भवन

किशनपोल बाजार, जयपुर-१

ब्रांच आफिस :

गांधी मार्ग, भद्रक (उडीसा)

स्टेशन मार्ग के सामने, जे० के० रोड़

(उडीसा)

वर्किंग एट :

बाउला क्रोमाइट माइन्स एट : धानपुर जैपुर, जिला के उनझर (उडीसा)

केथपाल क्रोमाइट लाइन्स एटः बिरसल जिला धेनकानाल (उडीसा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगिनी लघुकथा

३४–अनुपमा राज्ञी [तुर्कीदेशस्य श्रेष्ठकथा]

श्री "पद्म" शास्त्री
१२८ मुक्तानन्दनगर, गोपालपुरारोड, जयपुरम्–१५

ईरानदेशे पुरा चैको नृपो न्यवसत्। तस्य तिस्रः प्राणप्रिया बालिकाश्चासन्। ता विवाहयोग्याः सञ्जाताः। तात्कालिकप्रथानुसारेण नृपस्तासां हस्तेषु धनूंषि दत्वा प्रोवाच यस्या बाणो यत्र पतिष्यति तत्रैव तस्या विवाहो भविष्यति। एकस्याः कुमार्या बाणश्चामात्यभवने न्यपतत्। अमात्यपुत्रेण सह तस्या विवाहः सञ्जातः। द्वितीयाया बाणः कस्यचिद् व्यवसायिनो भवने न्यपतत् तस्या विवाहः तत्पुत्रेण सह कृतः। तृतीयायाः कुमार्या बाणः कानने काष्ठविक्रेतुर्भवने न्यपतत्। नृपश्चिन्तितो जातो यत् काष्ठविक्रेतुः पुत्रेण सह कन्याया विवाहः कथं प्रकुर्यात्?। तृतीयां कन्यां पुन र्बाणं योक्तुमकथयत् परं कन्या तन्न मेने। तस्या विवाहः काष्ठविक्रेतुःपुत्रेण सह बभूव।

बहुत पहले ईरान में एक राजा रहता था। उसके प्राणों से भी प्रिय, तीन बालिकाएं थीं। वे सभी विवाह योग्य हो गईं। उस समय के रिवाज के अनुसार राजा ने उनके हाथों में धनुषबाण देकर कहा, जिसका बाण जहां गिरेगा वहीं उसका विवाह होगा। एक पुत्री का बाण वजीर के महल पर गिरा। वजीर के पुत्र के साथ ही उसका विवाह हो गया। दूसरी कन्या का बाण किसी व्यापारी के भवन में गिरा, उसका विवाह व्यापारी के पुत्र से कर दिया गया। तीसरी कन्या का बाण वन में, किसी लकड़हारे के घर में गिरा। राजा चिन्तित हो उठा कि लकड़हारे के पुत्र के साथ कन्या का विवाह कैसे किया जा सकता है? राजा ने तीसरी कन्या को फिर बाण छोड़ने को कहा किन्तु कन्या ने इस प्रस्ताव को स्वीकार नहीं किया। उस कन्या का विवाह लकड़हारे के पुत्र के साथ हो गया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजकुमारी सहर्षं काष्ठविक्रेतुः गृहमागता । काष्ठविक्रेता बिभेति स्म कथं सा मद् गृहे निवसिष्यति । परं सा ससुखं तत्र निवसन्नास्ते । सा स्वच्छं विधायोटजं पुष्पमालाभिरलञ्चकार । स्वहस्ताभ्यां भोजनं निर्माय पतिं भोजयामास । काष्ठानि छेत्तुमपि सा भर्त्रा सह निर्गता । इत्थं परिश्रमं कृत्वा तौ दिनानि यापयामासतुः । बहूनि दिनानि व्यतीतानि । किञ्चित्कालानन्तरं राजपुत्री कन्यामेकां प्रासूत । तदा शीतकालश्चासीत् । कन्यापरिधानायोर्णावस्त्राण्यपि नासन् । एकदा हिमपातोऽभवत् शीतपवनः प्राचचत् । तद्दिने सा कन्याया रक्षार्थं गृह एवातिष्ठत् ।

राजकुमारी प्रसन्न होकर लकड़हारे के घर आ गई। लकड़हारा डर रहा था कि वह मेरे घर में कैसे रहेगी ? परन्तु वह सुखपूर्वक वहां रहने लगी। उसने झौपड़ी को साफ कर पुष्पमालाओं से सजा दिया। अपने हाथों से भोजन पकाकर पति को खिलाने लगी। वह पति के साथ लकड़ी काटने भी जाने लगी। इस प्रकार परिश्रम करके वे दोनों अपने दिन बिताने लगे। बहुत दिन बीत गये। कुछ समय बाद राजपुत्री ने एक कन्या को जन्म दिया। उस समय सर्दी थी। कन्या को पहनाने के लिए ऊनी वस्त्र भी नहीं थे। एक दिन बर्फ गिरी, ठण्डी हवा चलने लगी। उस दिन राजपुत्री कन्या की रक्षा के लिए घर पर ही ठहर गई।

मध्याह्नश्चासीत् कन्यामंकमारोप्य सा चोपविष्टाऽऽसीत् । सहसा तया दृष्टं यदुटजमभितः तीव्रः प्रकाशः प्रसृतः । प्रकाशपरिधेस्तिस्रः कन्याः प्रादुरभवन् । उटजद्वारमागत्य ताः समुपस्थिताः । ताः स्वहस्तैः संकेतमकुर्वन् । सहसा तदुटजं राजभवनरूपे परिणतम् । गृहवस्तून्यपि विपरिणतानि । तिस्रस्ताः कन्या वरं दत्वा अक्ष्णोरगोचराः सञ्जाताः । तासां वरै साऽतीवरूपगुणयुक्ता जाता । यदा सा रोदिति

दोपहरी हो गई, राजपुत्री कन्या को गोदी में बिठाकर बैठी हुई थी। अचानक उसने देखा कि उसकी झौपड़ी के चारों ओर तेज प्रकाश फैल रहा है। प्रकाश के घेरे में तीन कन्याएँ दिखाई दीं। वे झौपड़ी के दरवाजे पर आ गईं। उन्होंने अपने हाथों से संकेत किया। वह झौपड़ी अचानक राजभवन बन गई। घर की सभी वस्तुएं बदल गईं। वे तीनों कन्याएं उस कन्या को वरदान देकर अदृश्य हो गईं। उनके वरदान से यह कन्या रूप और गुणों से युक्त हो गई। जब वह रोती थी तब उसकी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदा तन्नयनाभ्यां मुक्ताफलान्यपतन्, यदा सा हसति तदा सर्वतः पुष्पाण्यविकसन्, यदा सा प्रचलति तदा धरायां हरितानि शष्पाणि प्रादुरभूवन् । तद्दिनादेव माता तन्नाम वरदानीति चकार ।

सायं काष्ठविक्रेता वनात्प्रतिनिवृत्तः । उटजस्थाने नूतनं भवनं विलोक्य विस्मितोऽभवत् । किमहं मार्गं विस्मृतवानिति प्रोच्चस्वरेण प्राह । राजकुमारी कक्षाभ्यन्तरात्प्रोवाच न विस्मृतवानसि । सा सर्वां घटनामकथयत् हर्षेण नृत्यन्नसौ नितरां चुक्रोश । कालस्य गति विचित्रा वर्तते । वरदानी-कन्या पितृवेश्मनि ववृधे । पितरौ व्यचारयतां कदाचित् वरदानी राज्ञी भूत्वा कस्मिश्चिद् राजभवने गमिष्यति । तस्याः गुणानां चर्चा सर्वत्र प्रसृता । नृपश्चैको व्यचारयत् कथन्न कन्यामिमां स्वपुत्रवधूं विधास्यामि । नृपः स्वप्रस्तावं नीत्वा तत्रागतवान् । तेन सह चैका वृद्धाऽप्यासोत् । कन्यायाः सौन्दर्यं विलोक्येर्ष्यया सा भृशं प्रतप्ता, सा व्यचारयत् कथन्न मदीया कन्या राज्ञी भवेत् ।

विवाहदिवसः समीपमागतः । निश्चिते दिवसे राजा कन्यामानेतुं वृद्धा-

आंखों से मोती गिरते थे, जब वह हंसती थी तब सब ओर पुष्प बिखर जाते थे । जब वह चलती थी तो पृथ्वी पर हरी घास उग आती थी । उस दिन से माता ने उसका नाम वरदानी रख दिया ।

लकड़हारा साम को वन से लौटा । झोपड़ी की जगह नया भवन देखकर वह चकित रह गया । वह जोर से चिल्लाया—कि क्या मैं रास्ता भूल गया हूं । पत्नी ने सारी घटना सुनायी । हर्ष से नाचता हुआ वह चिल्लाने लगा । काल की गति बड़ी विचित्र होती है । वरदानी कन्या पिता के घर में बढ़ती रही । माता पिता ने विचार किया कि कभी वरदानी रानी बनकर किसी राजभवन में जायेगी । उसके गुणों की चर्चा सर्वत्र फैल गई । एक राजा ने विचार किया—इस कन्या को मैं पुत्रवधू क्यों न बनालूं । राजा अपना प्रस्ताव लेकर वहां आया । उसके साथ एक वृद्धा भी थी । कन्या की सुन्दरता को देखकर वृद्धा जलभुन गई । उसने विचार किया । मेरी कन्या रानी क्यों न बने ? ।

विवाह का दिन पास आ गया । निश्चित दिन आने पर राजा ने कन्या को लाने के लिए

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मप्रैषयत् । वृद्धा चतुरा चासीत् । सा शिविकाद्वयं सुसज्जितवती । एकस्यां शिविकायां सा वस्त्राभूषणैरलंकृत्य स्वकन्यामस्थापयदन्यायाञ्च स्वयमुपाविशत् । शिविकावाहकान् सा रूप्यकप्रदानैस्तुतोष । ते सर्वे वरदानीगृहं प्रापु: । शिविकां विलोक्य पितरौ परितुष्टौ । पितरौ स्वकन्यां शिविकायामारोप्य भृशं प्रहृष्टौ । शिविके प्राचलताम् । प्रचलन् गहनं काननं समागतम् । सहसा वृद्धायाश्चेंगितेन शिविके तस्थतु: । वृद्धा शिशिकातो बहिरागता । तस्या हस्तयो रज्जवश्चासन् । तया वरदानी बहिरानीता । वरदानी चुक्रोश परं तत्र न कोऽप्यासीत् य स्तस्या: साहाय्यं विदध्यात् । तस्या हस्तपादौ रज्जुभि: परिवेष्ट्य, तां काष्ठमञ्जूषायां निक्षिप्य भारवाहका वने चिक्षिपु: । स्वपुत्रीयुतां शिविकामानीय वृद्धा राजभवनं प्रत्यागता । राजा कन्याया: स्वागतञ्चकार । शुभे मुहूर्ते विवाहो जज्ञे ।

द्वितीये दिने राजपुत्रो वधूं प्रत्याजगाम । तेन मनसि विचारितमासीत् यद् वरदानो यदा पितृगृहान्निर्गता भविष्यति तदा रुदनेन मुक्ताफलानि निपतितानि भवेयु: । परं तत्र न

वृद्धा को भेजा । वृद्धा चालाक थी । उसने दो पालकियां सजवाईं । एक पालकी में उसने वस्त्राभूषणों से सुसज्जित, अपनी पुत्री को बिठाया, दूसरी में स्वयं बैठ गई । पालकी ढ़ोने वालों को उसने रुपये देकर प्रसन्न कर लिया । वे सभी वरदानी के घर पहुंचे । पालकी देखकर माता पिता प्रसन्न हुए । दोनों पालकियां चल पड़ी । चलते चलते घना जंगल आ गया । अचानक वृद्धा के इशारे से पालकियां रुक गईं । वृद्धा पालकी से बाहर आयी । उसके हाथों में रस्सियां थी । उसने वरदानी को बाहर निकाला । वरदानी चिल्लायी परन्तु वहां कोई नहीं था जो उसकी सहायता कर सके । उसके हाथपैरों को रस्सी से बांधकर, उसे लकड़ी की पेटी में डालकर पालकी ढ़ोने वाले वन में फैंक आये । वृद्धा अपनी लड़की वाली पालकी को लेकर राजभवन पहुंची । राजा ने कन्या का स्वागत किया । शुभ मुहूर्त में विवाह हुआ ।

दूसरे दिन राजपुत्र पत्नी के समीप गया । उसने मन में विचार किया था कि वरदानी जब पिता के घर से निकली होगी तब उसकी आंखों से मोती झड़े होंगे । परन्तु वहां कुछ भी न देखकर उसने विचार किया । क्या वह सब कुछ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमपि दृष्ट्वा स व्यचारयत् किमिदं सर्वं कल्पितमेवासीत् । स चीत्कुर्वन् प्रोवाच-काऽसि त्वम् ? वृद्धा सहसा तमुपसृत्य प्रोवाच-इयं वरदानी तव पत्नी वर्तते । मार्गे चानया वनकन्यानां पूजनं न कृतमतस्ताः श्रापमस्यै प्रदत्तवत्यः । एकवर्षानन्तरं श्रापनिर्मुक्तेयं पूर्ववद् भविष्यति-इति श्रुत्वा राजपुत्रस्तूष्णीं तस्थौ ।

इतो वने वरदानी चीत्कुर्वती भृशं सन्तप्ता, काष्ठमञ्जूषायां निक्षिप्ता, विधिचेष्टितं सर्वमिति व्यचारयत् । पान्थेनैकेन सा बहिर्निष्कासिता । रूपवतीं कन्यां विलोक्य पान्थश्चाश्चर्यचकितः सञ्जातः । तस्या रुदनेन मौक्तिकफलानि काष्ठमञ्जूषायां प्रसृतान्यासन् । पान्थस्तां जलमपाययत् । वरदानी तं सर्वं वृत्तान्तमकथयत् पान्थो वृद्धश्चासीदपत्यरहितश्च । तां कन्यां स स्वगृहमानयत् । निर्धनोऽयं वृद्धो मौक्तिकविक्रयेण धनी संवृतः । एकदा सः कन्यायाः कृते वस्त्राण्यानयत् । वस्त्राणि विलोक्य वरदानी हसितुमारब्धा । तत्कालमेव सर्वतः पुष्पाणि विकसितानि । विस्मितं वृद्धं विलोक्य

झूठ था ? । वह चिल्लाता हुआ बोला-तुम कौन हो ? वृद्धा शीघ्र ही उसके पास जाकर बोली-यह वरदानी तुम्हारी पत्नी है । रास्ते में इसने वनकन्याओं का पूजन नहीं किया इसलिए उन्होंने इसे श्राप दिया । एक वर्ष में यह श्राप-मुक्त होकर पहले की तरह ही हो जायेगी । यह सुनकर राजपुत्र चुप हो गया ।

इधर वन में वरदानी चिल्लाती हुई दुःखी हुई, लकड़ी की पेटी में पड़ी विचार करने लगी यह सब विधि का खेल है । किसी मुसाफिर ने उसे बाहर निकाला । वह रूपवती कन्या को देख आश्चर्य में पड़ गया । उसके रोने से लकड़ी की पेटी में मोती बिखरे पड़े थे । मुसाफिर ने उसे जल पिलाया । वरदानी ने मुसाफिर को सारी कथा सुनायी । वृद्ध मुसाफिर सन्तान रहित था । वह कन्या को अपने घर ले आया । वह निर्धन वृद्ध मोती बेचने से धनी हो गया । एक दिन वह कन्या के लिए वस्त्र ले आया । वस्त्र देखकर कल्याणी हंसने लगी । उसी समय सब ओर पुष्प बिखर गये ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरदानी प्राह–पुष्पाण्येतानि राजभवने विक्रेतव्यानि ।

स पुष्पाणि विक्रेतुं राजभवनं विवेश । तस्मिन्नेव काले राजपुत्रश्चाखेटात्प्रतिनिवृत्तः । स विचित्राणि पुष्पाणि विलोक्य व्यचारयत् यदसमये कथमेतेषां पुष्पाणां समुद्भवः ? स सर्वाणि पुष्पाणि क्रीत्वा वृद्धं राजभवनमानयत्, अकथयच्च पुनरागन्तव्यं पुष्पाण्यादाय । कुतः समासादितानि पुष्पाण्येतानि ? वृद्धस्तूष्णीं तस्थौ ।

राजपुत्रस्याग्रहेण स सर्वं वृत्तं निवेदयामास । रहस्यमेतद्राजपुत्रेण परिज्ञातं वृद्धायाः । स वृद्धां तथा वधूं कारागारे न्यक्षिपत् । स्वयमश्वमारुह्य वरदानी–पार्श्वमाजगाम । यदा वरदानी राजभवनमाससाद तदा सर्वत्र पुष्पवृष्टिरभवत् । शुभे मुहूर्ते राजपुत्रस्य विवाहः सञ्जातः । समस्तं राजभवनं पुष्पैराच्छादितमभवत् । राजपुत्रः ससुखं स्वजीवनं यापयामास ।

आश्चर्य के पड़े हुए वृद्ध को वरदानी कहने लगी–इन पुष्पों को राजभवन में बेच आओ ।

वह वृद्ध पुष्प बेचने के लिए राजभवन में गया । उस समय राजपुत्र शिकार से लौट रहा था । उसके इन विचित्र पुष्पों को देखकर राजपुत्र ने विचार किया कि इस समय ये पुष्प कैसे खिल गये । सब पुष्प खरीदकर वह वृद्ध को राजभवन ले गया और कहने लगा फिर पुष्प लेकर आना । ये पुष्प आप कहां से लाये ? वृद्ध चुप ही रहा ।

राजपुत्र के आग्रह पर उसने सारा वृत्तान्त कह सुनाया । राजपुत्र वृद्धा के रहस्य को जान गया । उसने वृद्धा को और नकली वधू को जेल में डाल दिया । स्वयं घोड़े पर बैठकर वरदानी के पास आया । जब वरदानी राजभवन पहुंची तब सर्वत्र पुष्पवृष्टि होने लगी । शुभ मुहूर्त आने पर राजपुत्र का विवाह हुआ । सारा राजभवन पुष्पों से ढ़क गया । राजपुत्र सुखपूर्वक अपना जीवन बिताने लगा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

"धेनुं धीराः सूनृतां वाचमाहुः"

डॉक्टर श्रीगङ्गाधरभट्टः
सह-आचार्य, संस्कृतविभागे, राजस्थानविश्वविद्यालयः, जयपुरम्

अमृत–स्यन्दिनीं वाचं चन्दनस्पर्शशीतलाम् ।
धर्माविरोधिनीमुक्त्वा सुखमक्षय्यमाप्नुयात् ।

अमृतप्रस्रविणीं चन्दनस्य स्पर्शवत् शीतलां परमशान्तिप्रदाम् धर्मानुकूलां वाचमुक्त्वा जनः चिरसुखं प्राप्नुयात् । वाचि माधुर्यं प्रथमो गुणः । चन्दनद्रववत् सुखप्रदत्वमपरो गुणः । धर्मादप्यनपेतत्वं तृतीयो गुणः । वाचि एतेषां गुणानां समावेशेन मानवः चिरस्थायिनं सुखमधिगच्छति ।

आकर्ण्य कर्णसुखदं किल वेणुनादं सन्यस्त-कर्म निकरा रस-सिन्धु मग्नाः ।
गोप्यो यदङ्घ्रियुगमेत्य मुदं ययुस्तौ श्रीमन्मुकुन्दचरणौ शरणं प्रपद्ये ॥

❖ ❖ ❖ ❖

योऽयं स्वस्य सिते दले शरतिथौ संपूजयन् शारदां
श्रीमन्निम्बविभावसोः शरणगं श्रीश्रीनिवासं स्मरन् ।
सप्तम्यां द्युमणिं रथस्थमकरोद् वन्दारु-चिन्तामणिं
सोऽयं मासवरः समेति भुवने माघोऽघहारी नृणाम् ॥

❖ ❖ ❖ ❖

ये मन्दास्तेऽपि जायन्ते यत्स्मृतेर्लब्ध-संविदः ।
सा स्मर्यतां जनैर्नित्यं गिरां देवी सरस्वती ॥

—श्रीरामगोपाल शास्त्री जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd. No. 1379/51
R. J. No. 2617
Licence No. PP. 9.
Licence to Post
Without
Prepayment

भारती

वाणी अमृत के समान मधुर हो। अमृत जैसा आनन्द उसे सुनते ही प्राप्त हो। वाणी में चन्दन के लेप के समान स्पर्श में शीतलता हो तथा वह धर्म के प्रतिकूल भी न हो तो उस वाणी का उच्चारण कर चिरस्थायी सुख को प्राप्त किया जा सकता है।

प्रियवाक्यात्परं लोके नास्ति संवननं परम् ।
प्रियो भवति लोकानां प्रियवादी तथा नरः ।

इह जगति प्रियवाक्यादधिकं वशीकरणं न वर्तते। प्रियभाषी मानवः लोकानां प्रियो भवति। सर्वातिशायि वशीकरणं लोकेऽस्मिन् प्रिया मधुरा च वाणी भवति। प्रियमधुरालापी जनो जनानां प्रियतरो भवति फलतः स सर्वैं राद्रीयते प्रशंसाञ्च परमां लभते।

प्रिय और मधुर वाणी से अधिक कोई वशीकरण मन्त्र नहीं है। लोक प्रिय बोलने वाले के स्वतः ही वश में हो जाते हैं और वह सबका प्रिय बन जाता है।

नहीदृक् स्वर्गयानाय यथालोके प्रियं वचः ।
इहामुत्र सुखन्तेषां वाग्येषां मधुरा भवेत् ।

जगति नान्यदीदृशं स्वर्गप्रयाणसाधनं यादृशं लोके मधुरं प्रियञ्च वचः भवति। येषां जनानां वाक् मधुरा वर्तते तेषां इह लोके परलोके च सुखं भवति। प्रियभाषित्वं अमुष्मिन् लोके परलोके च सुखं प्रददाति। स्वर्गलोकप्राप्तेरिदमस्ति विशिष्टं साधनम्।

स्वर्ग की प्राप्ति करने वाला संसार में ऐसा कोई अन्य साधन नहीं दृष्टिगोचर होता जैसी लोक में प्रिय एवं मधुर वाणी होती है। जिनकी वाणी में माधुर्य है वे इहलोक और परलोक दोनों में सुख प्राप्त करते हैं।

प्रकाशकः—संस्कृत प्रचार परिषद् राजस्थान,
पता—भारती भवन, बी. १५ न्यू कालोनी, जयपुर—३०२०१। दूरभाष—७५४९६
राधेश्याम द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित। दूरभाष—६१७६७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृत-मासपत्रिकाया



वर्षम् ३१

चैत्रः

अङ्कः ६

अप्रैलः

१९८१

वार्षिकमूल्यम् पञ्चदशमुद्राः १५.००

एकप्रतेः—सार्धैकं रूप्यकम् १.००

...त्वा यो रावणं,
राज्येऽभिषिषेच विभीषणम् ।
...क-लोक-प्रियकरो
...न्द्रः स नम्यताम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आन्ध्र-उत्तरप्रदेश-
बिहार-पञ्चनद-सर्वकारैः स्वीकृता

विषय-सूची

क्र.सं	विषयाः	निबन्धारः	पृष्ठ-संख्या
१.	मङ्गलम्	श्रीरामगोपालशास्त्री, जयपुरम्	१९९
२.	मासावतरणम्	,, ,, ,,	१९९
३.	संस्कृते आचारः	श्रीठाकुरदत्त जोशी जोधपुरम्	२००
४.	वैलक्षण्यं सारशतकस्य	श्रीमतीलक्ष्मी शर्मा	२०२
५.	आयुर्वेद-स्तम्भः-	श्री बी० वी० नटराज शास्त्री त्रिचिरापल्ली	२०५
६.	श्रीमारुति-परिष्टुतिः	श्रीहनुमद्दत्त शास्त्री जयपुरम्	२०८
७.	संस्कृतसमाचाराः		२०९
८.	पुस्तक-समीक्षाः	प्रधानसम्पादकः	२१२
९.	तत्त्वशतकम्	डा० ब्रह्मानन्द शर्मा	२१३
१०.	विश्व-वार्ताः	श्रीविश्वदर्शी	२१९
११.	संस्कृतव्याकरणप्रवेशिका	श्रीविश्वनाथमिश्रः, बीकानेरः	२२१
१२.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, जयपुरम्	२५२
१३.	नारी-स्तम्भः	श्रीमती राजेश्वरीभट्ट, जयपुरम्	२३०
१४.	सूक्ति-सुधा	डा० श्रीगङ्गाधरभट्टः, जयपुरम्	२३१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानसंरक्षका:–
जगद्गुरुशङ्कराचार्य-
स्वामिश्रीजयेन्द्रसरस्वतीमहाभागा:
कांचीकामकोटिपीठाधिपतय:

संस्थापक:
स्व. श्री उमाकान्तकेशव आप्टे
(बाबा साहब आप्टे)

प्रधान सम्पादक:
जगदीशशर्मा
साहित्याचार्य:
सम्पादक:
दीनानाथत्रिवेदी 'मधुप:'
सहसम्पादक:
रामगोपालशास्त्री जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

संरक्षक:
श्रीदेवीशङ्करतिवाड़ी
जयपुरम्
प्रबन्ध-सम्पादक:
श्रीगिरिराजशर्मा
भारती-भवनम्
बी १५, न्यू कालोनी
जयपुरम्–१
(राजस्थानम्)

वर्षम् ३१ | चैत्र:, विक्रमाब्द:, २०३७-२०३८ [अप्रैल:, १९८१] | अङ्क: ६

मङ्गलम्

नाना-सुगन्धि-रस-सिन्धु-निमग्न-देहौ
स्नेहानुबन्धन-विचित्रगती सुरम्यौ ।
नित्यं निकुञ्ज-भवने सहितौ सखीभि:
श्रीमन्मुकुन्दचरणौ शरणं प्रपद्ये ।।

मासावतरणम्

मर्यादा-पुरुषोत्तमो जनकजाजानि: परान् मर्दयन्
वन्दारून्निज-पाद-पद्म-निरतानानन्दयन् यत्र वै ।
प्रादुर्भावमवाप्तवान् स परमो मासोत्तम: पावनो
नूत्नं हर्षभरं सुवत्सरमुपादायैति चैत्रो भुवि ।।

— श्रीरामगोपालशास्त्री, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृते आचारः

श्रीठाकुरदत्त जोशी
व्याख्याता—संस्कृतविभागे जोधपुर-विश्वविद्यालय, जोधपुरम्

भारतीयजीवने मानवीयगुणेषु अन्तःकरणस्य शुद्धता लब्धास्पदा समादृता वा वर्तते। पुष्कलरूपेण वित्तस्य सत्यपि वृत्तस्याभाव आचारराहित्यं वा विराट्स्वरूपवतः कस्यापि देशस्य नैरर्थक्यं प्रतिपादयति। लङ्कापतेः साम्राज्यमिव चरित्ररहितं राष्ट्रं सद्य विनाशमेतीति राद्धान्तः। अतो व्यासेन प्रोक्तं महाभारते—

'वित्तेन क्षीणोऽक्षीणो
वृत्ततस्तु हतो हतः।'

अतः पुरा ऋषय आश्रमेषु छात्रान् किमभिहितवन्तः, निभाल्यन्तान्तावद् भारतीयसदाचारस्य चरित्रस्य च भव्यताम्।

'वाचं ते शुन्धामि, मनस्ते शुन्धामि, चरित्रास्ते शुन्धामि'।

विषयेऽस्मिन् महात्मा मनुरपि इमां वाचं प्रब्रूते। यदार्यावर्तस्य पार्श्वे सदाचारमेव परमनिधिरासीत् यं निधिं पुरा अत्रत्यास्माकमग्रजन्मानोऽन्येभ्यो राष्ट्रेभ्यो यच्छन्ति स्म। यथा—

एतद्देशप्रसूतस्य
सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन्
पृथिव्यां सर्वमानवाः॥
(मनु० स्मृ० २। ३०)

अतोऽस्माकमग्रजा राजनीतिकसाम्राज्येण सह सांस्कृतिकं सामाज्यमपि सर्वत्र वितेनिरे। एवं ते यत्र तत्र निजसंस्कृतेः पताकार्यष्टिं निचख्नुः।

अनुमातुं शक्यते यत्तस्मिन् काले भारते आचारस्य कदापि उपेक्षा न जाता। आचारभ्रष्टस्तु सर्वतोभावेन भ्रष्ट इति रूपेण मन्यते स्म। यतो हि—

'आचारहीनं न पुनन्ति वेदाः'
(वसिष्ठस्मृति ६। ३।)

अत एव जीवनस्य पवित्रीकरणाय वेदेषु प्रार्थना विहिता वर्तते।

'पुनन्तु मा देवजना
पुनन्तु मनसा धियः।
पुनन्तु विश्वाभूतानि
जातवेदः पुनीहि माम्।

वस्तुतो विचारशीलैर्मनीषिभिर्मानवजीवनस्य सर्वाङ्गीणाभ्युदयार्थं सदा चास्याः सच्चरित्रताया महत्वं सदैव स्वीकृतम्। सदाचा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेणैव सामाजिकजीवनस्य सुश्लिष्टता व्यक्तिगताजीवनस्य सुखं, शान्तिश्च सम्भाव्यते। अतो मानवजीवने आचारस्य शाश्वती प्रतिष्ठा वर्तते भारते, प्राचीनकालादेवात्मगुणानां महत्त्वञ्च वर्तते।

ऋग्वेदेऽपि आचारान्तर्गतस्य सत्यस्य महिमा सर्वतोभावेन प्राथम्यं स्थानं बिभर्ति। अतः कथितञ्च—

'सत्येनोत्तभिता भूमिः'

(ऋ० १०. ८५. १.)

वस्तुतः सत्यान्नहि श्रेष्ठतरं किञ्चित्। एवमेव आचारान्तर्गतानामन्येषामपि गुणानां समादरो वैदिकयुगे दृश्यते। दुर्गुणानाञ्च निन्दा विहिता वर्तते। यतः परेषां निन्दा सामाजिकजीवने पारस्परिकसौहार्द्रं सौजन्यं चापहरति। यथा—

'निन्दितारो निन्द्यासो भवन्तु'

(ऋ० ५।२।६)

आत्मगुणा मनुष्यजीवनस्य सर्वोच्चादर्शाणामाधारभित्तयःसन्ति। त एव मनुष्यस्यान्तकरणस्योदात्तभावानां परिचायकाः सन्ति। कालत्रयेऽपि तेषां महत्त्वं न बाधते।

उपनिषत्कालेऽपि आत्मगुणानां महती प्रतिष्ठा जाताः। आत्मनि सर्वभूतानि सर्वभूतेषु चात्मानमवलोकयन्नरो अन्यं प्रति घृणां कर्तुं कथमपि समर्थो नैव भवति स्म। उक्तञ्च—

यस्मिन् सर्वाणि भूतानि
आत्मैवाभूद्विजानतः।
तत्र को मोहः कः शोकः
एकत्वमनुपश्यतः॥
(ईशो० ७।)

भारतीयाचारस्याङ्गभूतयानया एकत्वभावनया एव कालान्तरे विश्वबन्धुत्वभावनायाः समुत्पत्तिर्जायते ऋषयो मन्त्रदृष्टारः सम्यक्प्रकारेण विजानन्ति स्म। अतः तस्या विकासाय समुचितोपाया विज्ञैर्विचारिताः। समग्रमेतत्साहित्यं संस्कृतं विहाय नान्यत्र समुपलभ्यते। यतो हि संस्कृतातिरिक्तं नास्त्यन्यत्र एतादृग्विश्वबन्धुत्वसाहित्यस्योदाहरणम्। अवलोक्यन्तां तावन्नारदीयभावनाम्।

न चाहं कामये राज्यं
न स्वर्गं ना पुनर्भवम्।
कामये दुःखतप्तानां
प्राणिनामार्तिनाशनम्॥

भारतीयाचारस्याङ्गभूता एषा अधोवर्णिता विवेकभावनापि निभाल्यन्तां तावत्—

श्रूयतां धर्मसर्वस्वं
श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि
परेषां न समाचरेत्॥

एवं संस्कृतसाहित्ये वर्णितो भारतीय आचारः तदैव प्रजानां हितमावहिष्यति राष्ट्रजीवनञ्च उच्छ्राययिष्यति यदा संस्कृतसाहित्यस्य प्रचारः प्रसारो वा सर्वाङ्गरूपेण वा भवेत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैलक्षण्यं सारशतकस्य

श्रीमती लक्ष्मीशर्मा
शोधच्छात्रा-संस्कृतविभागे राजस्थान-विश्वविद्यालय, जयपुरम्

श्रीपाटलाभापटलिते जयपत्तने सूर्यवंशीयशासकानां व्यवस्थितशासने नानाविधाः विद्वांसः स्वीये वैदुष्योद्याने राजन्तो "वाराणसी वा जयपत्तनम् वा" इति उक्ति चरितार्थां कुर्वन्ति स्म तेष्वेव कविकुलेषु भट्टकुलमपि महत् विद्वत्कुलमासीत्। यत्र वैद्यकुलगुरुः श्रीश्रीकृष्णरामभट्टाभिधः कविर्बभूव। यो हि न केवलम् वैद्यवरः अपितु कविवरोऽपि बभूव। सुप्रसिद्धेषु तस्य काव्येषु "सारशतकम्" नाम काव्यसारम् विलक्षणम् वर्तते। अस्य काव्यस्य महत्त्वम् भारतीपाठकानां सम्मुखे समुपस्थातुमुत्सहे।

' सारशतके " भारतीयसंस्कृतसाहित्ये प्रसिद्धानाम् पञ्चमहाकाव्यानाम् कथाभागस्य सारतरं रूपम् लघुकाव्यरूपेण निबद्धमस्ति। तानि च रघुवंशकुमारसम्भवशिशुपालवधकिरातार्जुनीयनैषधीयचरितसारनामकानि सन्ति।

प्रस्तुते काव्ये द्व्युत्तरशतम् पद्यानि सन्ति। तत्र विंशतिप्रायाणि पद्यानि एकैकस्य विषये वर्णितानि सन्ति। प्रस्तुतस्य काव्यस्य प्रथमपद्यालोचनेन शतककाव्यरचनारूपां कामनां निधाय एतत् सारपंचकं निबद्धं अनेन भट्टमहाभागेन इति ज्ञायते।

कार्यव्यग्रताबहुले समये स्वल्पेनैव आयासेन काव्यं पिपठिषन्ति, यतो हि महाकाव्यानाम् ज्ञानार्जनं समयापेक्षम्। तस्मात् छात्रगणोपयोगि तथा समयक्षपणानाम् विदुषाञ्चोपयोगि पुस्तकमिदमस्ति।

काव्यसौष्ठवविषयेऽपि "सारशतकम्" अतीव रमणीयम् काव्यम् अस्ति। एकस्मिन् स्थाने अनुप्रासस्य छटा दर्शनीया—

"स्वर्गादप्सरसो नीरीक्ष्य
सचिवैरुद्दाममन्दाकिनी—
कल्लोलानिलकेलि—
लोलदलकस्त्रस्तप्रसूनोत्करा।
रासेदुर्हरिचन्दनांचितकुचाः
सन्नन्दनानन्दनाः
श्रीसंक्रन्दननन्दनं
द्रुततरप्रस्पन्दनैः स्यन्दनैः ॥४६॥

अस्मिन् पद्ये महाकविना "सन्नन्दनानन्दना," विशेषणस्य प्रयोगेण साहित्यशास्त्रस्य "कूटान्योक्ति" प्रकारस्य रमणीयोदाहरणम् प्रस्तुतम्।

कूटान्योक्त्या तात्पर्यम् इदमस्ति यत्र मूलार्थः चित्रितार्थात् भिन्नः भवति तथा च मूलार्थः तेषु शब्देषु एव निवसति " सा कूटान्योक्तिः कथिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र "सन्नन्दनानन्दना" शब्दस्य दृश्यमानः अर्थः "प्रशस्तनन्दनविहारिणीः" भवति तथा वाक्ययोजनायाम् अयम् सार्थक अस्ति तथापि अस्य शब्दस्य तात्पर्यं "इन्द्र" अस्ति—"सत्" शब्दस्य पर्यायः सत्यमिति, सत्यं च "विष्णोः पर्यायरूपं तथा विष्णुशब्दः हरेः पर्यायः तथा च हरिशब्दः, इन्द्रवाचको भवति। अतएव "सत्" शब्दस्य तात्पर्यम् इन्द्रः अस्ति एवं इन्द्रनन्दन अर्जुनः कथितः। एवं सन्नन्दनानन्दनाः शब्देन अर्जुनमोहका इति। अत्र महान् वैशिष्ट्यमिदमस्ति यत् 'सन्नन्दनानन्दनाः' शब्दः अप्सरसाम् विशेषणम् अस्ति। तथापि तेन अर्जुनस्य महत्त्वम् प्रकाशितम्। याः अप्सरसः मेनकादयः विश्वामित्रम् स्वरूपेण व्यामोहयन् ता एव अर्जुनसम्मुखे पराजिता अभूवन्।

एकस्मिन् श्लोके सुन्दरो विरोधाभासो दृश्यते—

दत्तोऽर्घ्येऽभिसभं सुतेन तपसः
कंसद्विषे विद्विष—
न्मात्सर्याद्दमघोषजोऽभवदहो
निन्दन्ननिन्दन्नलम्।
मा गा इत्यसकृन्नृपैरभिहितोऽ—
प्यालम्ब्य खड्गं समु—
त्तिष्ठन्दुष्टमतिः स्वमेत्य शिबिरं
जन्याय सज्जोऽजनि ।।७३।।

अत्र शोभनीयैः अनुप्रासैः विरोधोऽपि दृश्यते—"निन्दन्ननिन्दन्नलम्" पदे निन्दन् अनिन्दनिति विरोधः द्रष्टव्यः परम् अत्रैव अस्य परिहारोऽपि विद्यते—निन्दन् अनिन्दन् अर्थात् अशोभमानः, इन्दि-परमैश्वर्ये अन्यत्र। अस्मिन् काव्ये काव्यसौन्दर्यवर्धकानि पद्यानि प्राप्यन्ते यथा श्रृङ्गारवीरवीभत्सरौद्राश्च रसाः श्रेष्ठप्रकारेण वर्णिताः। "शिशुपालवधसारे' रौद्रवीभत्सरसयो योजना अतीव रमणीया अस्ति। द्रष्टव्यम्—

वाचा चैद्यचरस्य यादवभुवां
राज्ञां समाजः क्षय—
क्षुब्धाम्भोधिरिव
प्रचण्डचरितैरुच्छृङ्खलां चक्षुभे।
उत्तस्थौ मुसलीकरेण मुशलं
धुन्वन् रुषा रुक्मिणी—
कान्तः प्रौढसुदर्शनोऽपि
स चलन्दुर्दर्शनोऽदृश्यत ।।७५।।

अत्र सम्पूर्णयादवराजकुलमेव प्रलयकालस्य समुद्रमिव प्रचण्डरूपेण आन्दोलितं भवति स्म। अस्य कारणम् शिशुपालदूतवचनम् आसीत्। तत्पश्चात् बलरामस्य चेष्टा रौद्ररसस्य अनुभावरूपा तथा च सुष्ठु दर्शनः श्रीकृष्णः दुदर्शनो बभूव। इत्थमेव वीभत्सस्य छटापि अत्र अतीवरमणीया दृश्यते—

"वलगद्वीरघटाविमुक्त—
विशिखव्याहन्यमानद्विप—
श्रेणीनिर्यदनूनशोणितधुनी—
शोणीकृतार्णोनिधिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्ववेंश्यापरिमृग्यमाण
सुभटोनृत्यत्कबन्धोत्कटः
सङ्ग्रामोऽजनि कृष्णचैद्यबलयोः
प्रेतेन्द्र कुक्षिम्भरि ।।"

अत्र वीभत्सरसः स्ववीभत्सरूपैः चित्रितः । कविना वीभत्सस्य विभिन्नरूपाणि कबन्धरक्तमांसप्रेतेन्द्रादीनि प्रदर्शितानि ।

न केवलम् रौद्रवीभत्सयोः चित्रणं कविवरैः चित्रितम् अपितु शृङ्गारादिरसाः अपि सफलरूपेण अभिव्यञ्जिताः—

"इत्थं तामथमेदिनीतल–
शचीमासाद्य सौधे महा–
रत्नस्फूर्जितकाञ्चनक्षितिभृति
क्ष्माचक्रशक्रोऽनलः ।
नक्तं यत्नवशीकृतां
क्रमगलल्लज्जां कलाकोविदः
कन्दर्पोदधिपारलम्भनतरी
मुच्चैर्मुदाऽरीरमत् ।।"

इत्थं सारशतके रसयोजनाया विधिः अतीव सफलोऽस्ति तथा च सर्वत्र वाक्य योजना विधिरपि नवीनः अस्ति ।

अस्मिन् काव्ये पञ्चमहाकाव्यानाम् छाया स्पष्टरूपेण परिलक्षिता । "यथा—कुमारसम्भवे" प्रथमश्लोके—

"अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधीवगाह्य
स्थित:पृथिव्या इव मानदण्डः ।।

तथा "सारशतके" कुमारसम्भवसारेऽपि प्रथमःश्लोकः अस्य छायारूप एव अस्ति—

"आस्ते देववपुः कुबेरककुभिः
श्रीमान्हिमानी गिरि र्मेना
तस्य वधूरसूत तनयां
यासीत्सती प्राग्भवे ।
तां तत्त्वादवगत्य नारदगिरा
शंभोः सपर्याविधौ—
वालीभिः सह संनियोज्य
मुमुदे भूमीधराधीश्वरः ।। २२ ।।

अन्यस्मिन् स्थानेऽपि महाकाव्यानुसारेण अलंकाराणां काव्यसौन्दर्यम् च दृश्यते ।

निष्कर्षे विद्वज्जनाः अस्य काव्यस्य अध्ययनेन महाकाव्यानाम् कथानकानां विषये पूर्ण परिचयं प्राप्स्यन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद-स्तम्भः–

आयुर्वेदीयं आत्मस्वरूपम्

वी० बी० नटराज शास्त्री, त्रिचिरापल्ली

परमात्मनः अनादित्वश्रवणात् परं, अत्रेदं जिज्ञास्यं भवति—परस्त्वात्मा निर्विकारः निर्गुणः निष्क्रियः इत्युक्तम्, षड्धातुको जीवात्मा कर्त्ता कर्मणां, बोद्धा, भोक्ता च तत्फलानां इति प्रतिपादितं प्रमाणैः, परमात्मजीवात्मनोः परमार्थतः अभेदः इति च उपक्रमोपसंहारयोः निरूपितम्। एवमुक्तिः युक्तिविरुद्धा भवति। ज्ञत्व-कर्त्तृत्व भोक्तृत्वादि गुणवता जीवात्मना सह निर्गुण-शुद्ध-मुक्त-परमात्मनः अभिन्नता दुर्वचा दुर्घटत्वात् इति शंसयानः शिष्यः पृच्छति—परमात्मा ज्ञो वा ? अज्ञो वा ? ज्ञत्वे परमात्मनो निर्गुणत्व-निर्विकारत्वाद्युक्तिः दुष्यति अन्तःकरणसहितस्यैव ज्ञानप्राप्तेः सम्भवात्। अज्ञत्वे तु परमात्म-जीवात्मनोः अभेदोक्तिः हन्यते इति।

ज्ञत्वाज्ञत्वे उभे अपि परमात्म-जीवात्मनोरुभयोरपि यथा सम्भवतः तथा उपपादनेन प्रश्नं परिहरति गुरुः—

"आत्मा ज्ञः करणैर्योगात् ज्ञानं
त्वस्य प्रवर्तते।
करणानामवैमत्याद्
अयोगाद् वा न वर्त्तते॥
पश्यतोऽपि यथाऽऽदर्शे
संक्लिष्टे नास्ति दर्शनम्।
यद्वज्जले वा कलुषे
चेतस्युपहृते तथा॥

अयं भावः—आदौ इहेदं स्मर्त्तव्यम्—परमात्मा परिशुद्धज्ञानस्वरूपः, अयं प्रपञ्चसिसृक्षया मायासंज्ञया आत्मशक्त्या शबलितो भवति तस्यामवस्थायां जीवात्मसंज्ञको भवति व्यवहारदशायाम्। परमात्मनो ज्ञानचैतन्यं जीवात्मानं सदा अनुप्रविष्टम्। अतो जीवात्मा ज्ञानवान् भवति इति। अथ श्लोकार्थः—कर्मजः आत्मा ज्ञः ज्ञानवान् बाह्यविषयग्रहणशक्तिरस्य अस्ति। अथापि स्वयं विषयान् ग्रहीतुं न शक्नोति। करणैः सहसंयोगादेव अस्य ज्ञानं प्रवर्त्तते। ज्ञानार्थं करणानि कानि ? आह—"करणानि मनोबुद्धि बुद्धिकर्मेन्द्रियाणि चेति" जीवात्मनः शब्द-स्पर्श-रूप-रस-गन्धानां अर्थानां ग्रहणार्थं शरीरे सन्ति—श्रोत्र–त्वक्–चक्षू-रसना-नासिकाः बुद्धीन्द्रियाणि। इमानि सूक्ष्मपञ्चभूतोपादानानि, तांस्तान् अर्थान् मनोमाध्यमिकतया, ज्ञातारं आत्मानं प्रापयन्ति। पाणि-पाद-पायूपस्थ-जिह्वाः क्रमेण आदानदान-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गतागति-पुरीषविसर्जन-कामसुखानुभव-गानवचनात्मकानि कायिकवाचिककर्मणां साधनानि सन्ति। एतानि कर्मेन्द्रियाणि स्थूलपञ्चभूतोपादानानि मनसा उद्योजितानि स्वस्वकर्माणि निष्पादयन्ति। इत्थं जीवात्मनः तत्तदिन्द्रियैः संयोगात् ज्ञानं प्रवर्त्तते, अतः अस्य ज्ञत्वं सिद्धम्।

अथ प्रदर्श्यते आत्मनः अज्ञत्वं कदा कथं सम्भवतीति—श्रोत्रादीन्द्रियाणां रोगेण वा कारणान्तरेण वा अर्थग्रहणशक्तौ उपहतायां, अर्थानां वा अतिसूक्ष्मातिविप्रकर्षतिरोधानादिभिः, अन्तःकरणस्य च अर्थैरसंयोगात्, अन्तःकरणस्य कालुष्याद्वा, यथावत् अर्थज्ञानं जीवस्य न सम्भवक्षमम्, अत्र दृष्टान्तः—यथा आदर्शे मलिने, पंकिले जले च पश्यतो जनस्य स्वप्रतिबिम्बदर्शनं न सम्भवति तथा। अतोऽवधेयम्—श्रोत्रादिकरणानां दोष इव, चेतःकरणयोः अयोग इव च चेतसः कालुष्यं उपहतिश्च आत्मनो ज्ञानं प्रतिबन्धतः। किञ्च, यत् श्रोत्रादिकरणनिरपेक्षं अन्तःकरणसाध्यं संकल्प-चिन्तन-अध्यवसायादिजन्यं ज्ञानं तदपि चेतसः कालुष्ये उपहतौ वा नैव यथावत् सम्पद्यतेति। जाग्रदवस्थायामेवम्।

यत् स्वप्नावस्थायां यदा सर्वेषु ज्ञानकर्मेन्द्रियेषु-उपरतव्यापारेषु सत्स्वपि, जीवः जागरे इवैव समस्तप्रकारज्ञानवान्, गत्यादिक्रियावांश्च भवति, तत् स्वप्नदशायां केवलं इन्द्रियाणामेव तमोगुणोत्कर्षेण उपरतिः नैष्कर्म्यं च भवति, न मनसः मनस्तावत् वृद्धरजोगुणं भवत्. पूर्वतनसंस्कारवशात् प्रक्तजन्मनि प्राक्तनजन्मसु च अनुभूतान् कामितान् सर्वानपि विषयान् विविधान् स्वयं सृजति। तान् मनःसृष्टान् विषयान् जीवा आत्मनि केवलं आरोपयन् अनिद्रइव तत्तज्ज्ञानवान् चेष्टा कृतिमानिव च भवति। इदमेव हि स्वप्नस्य स्वलक्षणं यत् स्वकर्मभ्यः उपरतेष्वपि इन्द्रियेषु मनः सृष्टं वस्तुतः। असत्यमपि अर्थजातं सत्यमिति गृह्णन् भुङ्क्ते विषयसुखदुःखानि निद्रामुक्तः प्रबुद्धः स्मयमानो मन्यते, अहो सर्वं स्वप्नकृत्यमिति स्वप्नानुभूतानां विषयाणां वस्तूनां च मिथ्याभूतत्वात्। स्वप्नदृष्टान्तेनैव जागरकालदृष्टं प्रपञ्चमपि मिथ्यैवेति वेदान्तिनो ब्रह्माद्वैतत्वं साधयन्ति। तत्प्रक्रियारूपं नेह अपेक्ष्यते।

सुषुप्त्यवस्थायां जीवात्मनः, इन्द्रियाणामिव मनसश्च तमः प्रकर्षेण क्रियाभ्यः उपरतत्वात्, आत्मा किमपि न जानाति अन्तःकरणायत्तत्वात् ज्ञानलाभस्य। सुषुप्त्यवस्थायां जीवात्मा हृत्पुण्डरीक सुष्यन्तः आकाशे (ध्यानेन परमात्मानः उपलब्धि प्रदेशे) परमात्मना सह लीनो भवति सुखं, यावत् इन्द्रियाणां तमसो मोचनं भवति इति उपनिषत्सु सुषुप्तौ, जीवात्मपरमात्मनोः हृदि भवति संयोगः इति विशेषः प्रदर्शितः।

यस्मात् आत्मनः अवस्थात्रयेपि अर्थज्ञानं इन्द्रियसंयोगायत्तं भवति, तस्मात् तस्य ज्ञत्वं-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थंज्ञानसामर्थ्यं—जागर-स्वप्नादयोः। अज्ञत्वं सुषुप्त्यवस्थायां, तदानीं वियोगात्, इति आत्मनः ज्ञत्वं उभयमपि अवस्थावशात् संभवति इति उपपादितम्। ननु, स्वाप्निकं ज्ञानं मिथ्या अतस्तस्य अज्ञानेनाविशिष्टत्वात् स्वप्ने आत्मनो ज्ञानवत्त्वं कथं संगच्छेतेति शङ्कनीयम्। यतः स्वप्नाभवसमये प्रौढस्यापि न कस्यापि "नैव स्वपिमि इति भावः", किन्तु जागृतिदशायामिवैव सन् स्वप्नेऽपि मनः सृष्टान् विविधान् भावान् गृह्णन् तदनुरूपतया हर्षविषादवान् भवति, नैव स्वप्नदर्शनसमये सम्भवतां भावानां मिथ्यात्वेन भानं भवति। अतः स्वप्नावस्थायां जीवस्य ज्ञत्वं अबाधितम्।

अरुणा उद्योग

माइन ओनर्स, रेंजिग कोन्ट्रेक्टर्स ट्रांसपोर्ट्स
बैंकर्स एण्ड कमीशन एजेन्ट्स

दूरभाष : ७३९२६
ग्राम अरुण उद्योग

हैड आफिस :
श्री राम भवन
किशनपोल बाजार, जयपुर–१

ब्रांच आफिस :
गांधी मार्ग, भद्रक (उडीसा)
स्टेशन मार्ग के सामने, जे० के० रोड़
(उडीसा)

वकिंग एट :

बाउला क्रोमाइट माइन्स एट : धानपुर जैपुर, जिला के उनभर (उडीसा)
केथपाल क्रोमाइट लाइन्स एट: बिरसल जिला धेनकानाल (उडीसा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमारुति-परिष्टुतिः

श्री हनुमद्दत्त शास्त्री
दधीचि कुटीर, प्लाट नं० बी. २४ गोविन्दपुरी (पूर्व)
नया रामगढ रोड़, जयपुर–३०२००२

एकास्याय महास्याय पंचास्याय नमो नमः ।
कलावेकादशास्याय मुहुर्मुहुर्नमो नमः ॥ १ ॥
ज्ञानविज्ञानविज्ञाय प्रविज्ञाय नमो नमः ।
संकटमोचनज्ञाय मुहुर्मुहुर्नमो नमः ॥ २ ॥
प्रतिज्ञाय स्मृतिज्ञाय स्तुतिज्ञाय नमो नमः ।
संकटमोचनज्ञाय मुहुर्मुहुर्नमो नमः ॥ ३ ॥
प्रभुज्ञाय विभुज्ञाय स्वभुज्ञाय नमो नमः ।
संकटमोचनज्ञाय मुहुर्मुहुर्नमो नमः ॥ ४ ॥
कविज्ञाय पविज्ञाय रविज्ञाय नमो नमः ।
संकटमोचनज्ञाय मुहुर्मुहुर्नमो नमः ॥ ५ ॥
मुखज्ञाय सुखज्ञाय दुःखज्ञाय नमो नमः ।
संकटमोचनज्ञाय मुहुर्मुहुर्नमो नमः ॥ ६ ॥
रामरामानुजज्ञाय कुजज्ञाय नमो नमः ।
संकटमोचनज्ञाय मुहुर्मुहुर्नमो नमः ॥ ७ ॥
श्रवणमननज्ञाय ध्यानज्ञाय नमो नमः ।
संकटमोचनज्ञाय मुहुर्मुहुर्नमो नमः ॥ ८ ॥
जननमरणज्ञाय रणज्ञाय नमो नमः ।
संकटमोचनज्ञाय मुहुर्मुहुर्नमो नमः ॥ ९ ॥
चितिज्ञाय स्थितिज्ञाय क्षितिज्ञाय नमो नमः ।
संकटमोचनज्ञाय मुहुर्मुहुर्नमो नमः ॥१०॥
न स्तोष्यन्ति हनूमन्तं सहस्रास्याः मुहुर्मुहुः ।
एकास्योऽहं कथं स्तौमि नौमि संकटमोचनम् ॥११॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसमाचाराः

प्रतिवेदनप्रेषकाः
डॉ० गयाचरणत्रिपाठिनः

अखिलभारतीयं संस्कृतसम्मेलनम्

प्रयागस्थगङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठे मार्चमासस्य सप्तमतारिकायां दिल्लीस्थराष्ट्रियसंस्कृतसंस्थानेन प्रवर्तितस्य संस्कृतसंस्कृतिवर्षस्याङ्गतयाऽखिलभारतीयं संस्कृतसम्मेलनमायोजितम् । तस्मिन् देशस्यानेकशो भागतः सुप्रसिद्धैः कविभिर्भागो गृहीतः वाराणसीतः समागतेष्वासन्—वटुकनाथशास्त्रिखिस्ते–रतिनाथझा–रेवाप्रसादद्विवेदि-प्रियव्रतशर्म–शिवदत्तशर्मचतुर्वेदि–श्रीनारायणमिश्र-लीलाधरपन्तप्रभृतयः कवयः। नागपुरतः, श्रीधरभास्करवर्णेकरः, कानपुरतः नलिनी शुक्ला, वारंगलतः, एसः बी. विजयसारथिः, गुड़रतः नरसिंहाचार्युलुः, प्रयागतः, त्रिविक्रमपतिः, चन्द्रभानुत्रिपाठी, प्रभातशास्त्री, हरिदत्तशर्मा, केदारनाथमिश्रः, रामखुशीत्रिपाठी, दिल्लीतः रुद्रदेवत्रिपाठी च। सम्मेलनस्याध्यक्ष्यं निर्व्यूढं डा० वर्णेकरमहाशयैः। पूर्वं श्रीमत्या मायामालवीयया स्वसहयोगिनीभ्यां सार्धं संगीतमयं मंगलाचरणं प्रस्तुतम् । विद्यापीठस्य प्राचार्येण डा० गयाचरणत्रिपाठिना समुपस्थितानां कवीनां सहृदयानां च स्वागतं व्याहृतम् । पूर्त्यर्थं प्रदत्ताः समस्या आसन्–'वाणीविलसितम्' 'को विहातुं समर्थः' 'न हसितमहो नापि रुदितम्', 'संगमः' ।

प्रयागविश्वविद्यालयस्य गणितविभागाध्यक्षाणां डा० त्रिविक्रमपतिमहोदयानां समस्यापूर्तिभिः कविसम्मेलनमारब्धम् । अनुपस्थितेन श्रीमता अमीरचन्द्रशास्त्रिणा प्रेषिताः समस्यापूर्तयः पठिताः ।

सहृदयानां श्रोतॄणां काव्यश्रवणार्थमुपस्थित्याऽऽधुनिके युगे संस्कृतकवीन् प्रति सहजमाकर्षणं सम्मेलनप्रसंगे समनुभूयते स्म । संस्कृतकवयोऽपि वर्तमानां सामाजिकीं राजनैतिकीं वा स्थितिमवलम्ब्य कियन्मात्रं जागरुकत्वं बिभ्रतीति तत्र स्फुटमाकलयितुं शक्यमासीत्। पूर्वं, प्रयागविश्वविद्यालयस्य गणितविभागाध्यक्षाणां डा० त्रिविक्रमपतिमहाशयानां 'को विहातुं समर्थः इति समस्यामाश्रित्य विहिताः पूर्तयः सहृदयान् चमदकुर्वन् । श्री विजयसारथिभिः पठितो मन्दाकिनी काव्यस्यांशोऽपि पुष्कलं प्रभावमुदपादयत् । डा० हरिदत्तशर्मणां मधुरस्वरकलितेन काव्यपाठेन श्रीलीलाधरपन्तमहाशयानां वर्तमानस्य कुलपतिपदभाजो जनस्य दयनीयां स्थितिमव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लम्ब्य पठितेन काव्येन डा० रुद्रदेवत्रिपाठिः नामाधुनिकसत्यनारायणकथया च सविशेषं सहृदयानां मनोरंजनमभूत् । यैर्गम्भारो भावविशेषसम्पन्नश्च काव्यपाठः सम्प्रस्तुतस्तेष्वासन् डा० वर्णेकरः, डा० रेवाप्रसादद्विवेदी, पं० बटुकनाथशास्त्रीखिस्ते, आचार्यप्रियव्रतशर्मा, पं० रतिनाथझा, डा० शिवदत्तशर्मा, पं० नरसिंहाचार्युलुः, चन्द्रभानुत्रिपाठी च ।

कविसम्मेलनात् पूर्वं समुपस्थितैः कविभिरनौपचारिकी कविगोष्ठी कृता, यस्यां हास-परिहासात्मकमाकलनीयं दृश्यमासीत् । डा० वर्णेकरमहोदयैः सम्मेलनस्य संचालनं कृतम्, जगन्नाथपाठकेन च साहाय्यं प्रदत्तम् । डा० ब्रह्ममित्रअवस्थिमहोदयेन धन्यवादज्ञापनं कृतम् ।

पर्यन्ते नृत्यगीतमयः संक्षिप्तः कार्यक्रमः सम्प्रस्तुतः । तत्र सरस्वतीवन्दना कु० पार्वती चट्टोपाध्यायया प्रस्तुता, सरस्वत्या अभिनयः कु० वन्दनामालवीयया कृतः । गीतगोविन्दस्य डा० माया मालवीयया गीतं पद्यमाश्रित्य कु० वीणाशुक्लया भावनृत्यं कृतम् । श्रीमत्या गौरीवन्द्योपाध्यायया संस्कृतगीतं, कु० अर्चना चतुर्वेदिन्या च मधुराष्टकं गीतम् ।

डा० मायामालवीयया समग्रस्य सांस्कृतिककार्यक्रमस्य निर्देशनं कृतम् ।

मुफ्त ! मुफ्त !! मुफ्त !!!

सफेद दाग

अगर आप सफेद दाग या किसी प्रकार के चर्म रोगों से परेशान हैं तो चिन्ता न करें। आप हमारे यहां से दो पाकेट लगाने की विजय बूटी मुफ्त मंगाकर केवल ५ दिनों में लाभ प्राप्त करें। रोग विवरण लिखें।

सफेद बाल

मैं अधिक प्रशंसा करना नहीं चाहता, हमारे आयुर्वेदिक "केश कान्ति" तेल से बालों का पकना रुक कर सफेद बाल काले हो जाते हैं। मूल्य १०) तीनशीशी २७) रु०।

हिन्द आयुर्वेद भवन, (B. H. 579) पो० कतरी सराय (गया)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मादक द्रव्यों का व्यवहार जीवन को दुःखद बना देता है। यहां तक कि त्योहारों की सरलता को बीभत्सता में बदल देता है। इस दुर्व्यसन का अन्त ही कल्याणकारी है। इस दिशा में जो भी प्रयत्न होगा वह सदैव प्रशंसनीय है।

—स्व० डा० सम्पूर्णानन्द, भूतपूर्व मुख्यमंत्री (उत्तर प्रदेश)

कांग्रेस और देश के सभी विचारों के लोग नशाबन्दी के पक्ष में एक मत हैं। हमारे धर्म आचार विचार और सामाजिक व्यवस्था सभी नशाबंदी के पक्ष में है। हमारा कर्तव्य है कि सामाजिक उन्नति के इस पवित्र आंदोलन में संलग्न हो जायें और सारे सूबों में नशाबन्दी योजना को चालू करने का मार्ग तैयार करें।

—स्व० पंडित गोविन्द वल्लभ पन्त स्वराष्ट्र मंत्री भारत

यह तो हद दरजे की बेवकूफी और नालायकी है कि अपना रुपया खर्च करें और बदले में सिर्फ बेहोशी और बदहवासी हाथ लगे। —तिरूवल्लुवर

अन्तर्गतमलोदुष्टः तीर्थस्थानशतैरपि।
न शुद्ध्यति यथाभाण्डं सुराया दाहितं च यत्॥

—चाणक्यनीति दर्पण अ० ११ श्लोक ७॥

जिसके हृदय में पाप घर कर चुका है वह सैंकड़ों बार तीर्थ स्नान करके भी शुद्ध नहीं हो सकता। जैसे कि मदिरा का पात्र अग्नि से झुलसने पर भी पवित्र नहीं होता।

आगारदाही मित्रं यः शाकुनिर्ग्रामयाजकः।
रुधिरान्धे पतन्येते सोमं विक्रीणते च ये॥

—श्री विष्णुपुराण अध्याय ६ श्लोक २२

घर में आग लगाने वाले, मित्र की हत्या करने वाले, शकुन आदि बताने वाले, ग्राम पुरोहित तथा मदिरा बेचने वाले ये सब रुधिरान्ध नरक में गिरते हैं!

पंजाबी चन्दू हलवाई करांचीवाला

कार्यालयः—१८५, बालकेश्वर रोड, तीनबत्ती, बम्बई—४००००६

स्थापना—१८९६ शाखायें :— तारका पताः—'चन्दूमेवा'

(१) जवेरी बाजार (२) ग्रान्टरोड (३) कोलावा (४) दादरा (५) वरली नका (६) सायन सर्कल (७) ठाकुरद्वार (८) सूर्योदयस्टोर्स, चर्चगेट (९) घाटकोपर (पश्चिम) (१०) लिंकिंग रोड, (११) रेलवे स्टेशन के सामने, सांताक्रुज (पश्चिम)

कारखाना :—चन्दू भवन, ग्रान्टरोड, बम्बई—४०००७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तक-समीक्षा:—

प्रधानसम्पादक:

अम्बिकासूक्तम् — श्रीहरिशास्त्रिप्रणीतम्

प्राप्तिस्थानम् — भारतीभवनम्
नूतनवसतिः (न्यूकालोनी) जयपुरम्

प्राक्तनमूल्यम् — ३.५०) रु०

श्रीहरिशास्त्रिप्रणीतमम्बिकासूक्तमिदं वैदिकछन्दोबद्धं स्वोपज्ञभाष्यविभूषितं विदुषामपि विस्मयावहम् । कवयः कालिदासाद्याः कति न बभूवुः परमेवं बुद्धिकौशलन्न प्रदर्शितं तै वैंदिकभाषाया दुर्बोधत्वाद्वेदान्तमध्ययनाध्यापनपरम्परायाः शिथिलप्रायत्वाच्च लोकानामत्रापि श्रुताविवारुचिः समुदेष्यतीति वृथैवोपदेशप्रकारो लोकिकभाषयैव रचितानि काव्यानि उपयोगीनि सन्ति सुकुमारमतीनामुपदेशमुखेन सन्मार्गप्रवृत्तये कल्पेरन् ।

शास्त्रिमहाभागोऽयं संस्कृतभाषायां हिन्दीभाषायामपि स्तोत्राण्यन्यान्यपि पद्यमयानि काव्यान्यलेखीत् । प्रतिभैषां महाभागानां लौकिकभाषारचनायां कौशलमक्षुण्णमादधात् तथैव वैदिकभाषारचनायामप्रतिहततया प्रावर्तत । वैदिकभाषायां वैदिकच्छन्दोभिर्भगवत्या अम्बिकायाः स्तुती रचिता । स्तुतिरेषा प्रतिदिनं पठिता जडानामपि मनोऽभिलषितां वाक्सिद्धिं वितीर्याशु कवित्वशक्तिसम्पन्नतामादधाति शब्दब्रह्मणो नित्यत्वादेकोऽपि वैदिकः शब्दः सर्वं साधयितुं शक्नोति मन्त्रवत् । अत्र हि कविता स्वरादिसहकारेण स्वस्य स्वरज्ञानसामर्थ्यमपि प्रकटितं यत्प्रायो वैदिकधुरन्धुरैरेवोपयोक्तुं शक्यते । एवंविधाधुनिकविद्वद्भिरचितसूक्तादिभिर्ब्रह्मनिःश्वसितवेदस्य परम्परासिद्धमपौरुषेयत्वन्तुकथमपि व्याहन्येतेति धिया सूक्तान्ते श्लोकद्वयेन स्वकीयनामोल्लखनेन प्रकटितम् । अस्य सूक्तस्य भाषा सरला परम्परांगतवैदिकमन्त्रभाषया न वै सादृश्यं प्रकाशयति । पौरुषेयत्वख्यापनायात्र वैदिकदेवतादीनान्निर्देशो न विहितः कविना । इदृशी कवित्वशक्तिः साम्प्रतिकानामन्वेषणे कृतेऽपि दुर्लभैव ।

अस्य सूक्तस्य भाष्यं विधाय बोधगम्यतया जिज्ञासूनां रुचिरेतदीयनित्याध्ययनेऽभ्युद्भाविता । हिन्दीभाषाया अर्थोपादानेनाम्बिकाभक्तानां श्रद्धालूनाञ्च तस्यां महानुपकारः कृतः । सूक्तमेतदवश्यमेव प्रतिदिनं पठितं पौराणिकस्तवादिवदवश्यमेव फलप्रदं स्यादिति विश्वसिति भारतीपरिवारो । अस्मिन्सूक्ते अनुष्टुप्छन्दांस्येकविंशतिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्त्वशतकम्

डा० ब्रह्मानन्दशर्मा

डा० ब्रह्मानन्दशर्मप्रणीते तत्त्वशतके सत्यस्य तात्त्विकं विवेचनमस्ति । लोके यस्य तत्त्वस्य सत्त्वं यस्य च प्रभावकारिता तदेव सत्यम् । प्राणतत्त्वस्य च लोके सत्ता प्रभावकारिता चेति तत्त्वमेतम् लोकगतं सत्यम् । अत्रापि प्राणतत्त्वस्य कश्चन विशेष इत्येतत्प्रेरितस्यार्थिकस्य सत्यस्य सर्वातिशायिता । इतो भिन्नस्य अध्यात्मतत्त्वस्य सत्यपि मानवकल्याणकरणार्हत्वे समाजे आवरणरूपेणैव स्थितिरिति आवृतवर्गेण अध्यात्मछद्मना अर्थलिप्साया एव पूर्तिप्रयास इति लोकानुभवगोचरम् । अध्यात्मतत्त्वसम्बन्धिनः कर्मसिद्धान्तस्यापि आवृतवर्गकृता व्याख्या अर्थबुद्धिप्रेरितेति सुधीभिराकलनीयम् । ज्ञानक्षेत्रेऽप्यस्यार्थतत्त्वप्रेरितस्य आवरणतत्त्वस्य प्रभाव इति तत्त्वोपन्यासस्य स्थाने ज्ञानाभासस्य विस्तारः पण्डिताभासानाञ्च स्वप्रभावक्षेत्रस्य विस्तारः ।

लोकेऽर्थस्योत्पादनं श्रमायत्तमितिश्रमिकवर्गस्यात्र प्रतिष्ठा विधेया । परं वर्गोऽयमनावृतोऽपरश्च सधन इत्येतद्वैषम्यम् । एतदेव वैषम्यं वर्गसंघर्षस्य बीजम् । संघर्षस्यास्य श्रमिकवर्गस्य विजये आवृतवर्गस्य चावरणोच्छेदे परिणतिरिति सत्यमेव जयते नानृतम् । भारतीपाठकानां कृते तत्त्वशतकमिदं क्रमशः प्राकाश्यते:—

श्रमात्मानं नरं नत्वा, राष्ट्रसंपत्तिवर्धनम् ।
विद्याधरप्रसादेन, तत्त्वालोकं करोम्यहम् ।। १ ।।

पदमर्थपरं शास्त्रे, लोके चास्यार्थरूपता ।
तत्त्वं पदं मतं यत्र, तत्र तत्त्वं प्रकाशते ।। २ ।।

तत्त्वमुपचितं पूर्वैः, अद्याभासस्य विस्तरः ।
आभासस्येयती लीला, तत्त्वं किं केन मीयते ।। ३ ।।

शोधस्य विविधा मार्गाः, ग्रन्था अपि नवा नवाः ।
अद्य ज्ञानस्य विस्फोटः, कथं त्वं तत्त्व ! खिद्यसे ।। ४ ।।

नासीज्जिज्ञासितं किञ्चित् ज्ञानस्य कथमुद्भवः ।
किञ्चात्र मौलिकं विद्वन्, शोधोऽयं किं न बुध्यते ।। ५ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्त्वमविदितं पूर्वम् लेखने च महात्वरा ।
लेखनमीदृशं नूनम् आडम्बरी न संशयः ॥ ६ ॥

पूर्वं तत्त्वं यदि ज्ञातम्, लेखनं तस्य पूर्वतः ।
सम्प्रति लेखनं तस्य, केवलं लेखवर्धनम् ॥ ७ ॥

तत्त्वविदो वयं प्रोक्ताः, वित्ते चित्ते तु सर्वदा ।
भ्रान्तिरत्रास्ति लोकस्य, तत्त्वमेतत्तु नोच्यते ॥ ८ ॥

वित्तस्य सरणिर्भिन्ना, तत्त्वं तत्र सुदुर्लभम् ।
तडागे मज्जतां मोहाद्, रत्नस्याधिगमः कुतः ॥ ९ ॥

तत्त्वमगाधमित्याहुः, समग्रमत्र मज्जति ।
तत्त्वस्याधिगमः कुत्र, स्वभावस्तु यथास्थितः ॥ १० ॥

रागद्वेषैर्वयं ग्रस्ताः, चित्तमतः समाकुलम् ।
अज्ञताया इयं भूमिः, तत्त्वस्य कथमुद्भवः ॥ ११ ॥

तत्त्वविदां धृतं रूपम्, वित्ते चित्ते च सर्वदा ।
क्षुद्रा जीवा मता एते, आवृतिः सिंहचर्मणः ॥ १२ ॥

यदि वित्तं मतं तत्त्वम्, आवृतिस्तत्र निष्फला ।
वित्तं तत्त्वं भवेन्नाम, आवृतेः कुत्र तत्त्वता ॥ १३ ॥

तत्त्वे न मे गतिः कापि, वाचि न चास्ति पाटवम् ।
आवृणोत्यावृतिस्तत्त्वम् वाचालं तत्करोति माम् ॥ १४ ॥

मौनं कामं परः बन्धुः, मौनं मे शरणं मतम् ।
तत्त्वे आव्रियमाणे तु, मौनं तस्यापि दुष्करम् ॥ १५ ॥

सर्पिण्या न तथा भीतिः, आवृतेः सा यथा मता ।
स्नेहेनोपागतो बालाम् दष्टस्तया च मर्मणि ॥ १६ ॥

ब्रह्म सत्यमिति प्रोक्तम्, लोक आवृतिरेव च ।
हेया या हि मता तत्र, अत्र सैवावृता स्थिता ॥ १७ ॥

आवृतिः परमः शत्रुः, स्वरूपमत्र लुप्यते ।
रूपे वयं वयं जाताः, तेऽत्र जाता वयं परे ॥ १८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुरूपं वा कुरूपं वा, रूपेणैव समन्वयः ।
आवृत्या लोप एतस्य, कः केन स्यात्समन्वयः ॥ १९ ॥

एते वयं वयञ्चैते, भावो यत्र परस्परम् ।
समष्टिरियमाख्याता, व्यष्टिरत्र विलीयते ॥ २० ॥

वराकास्ते इमे केऽपि, वयं तु वयमेव हि ।
भेदोऽयमावृतौ जातः, समष्टिस्तत्र कीदृशी ॥ २१ ॥

आवृत्याऽर्थस्य सिद्धिः स्यात्, एकस्य वा द्वयस्य वा ।
अर्थोऽयं मे मतोऽनर्थः, जनता यद्यनावृता ॥ २२ ॥

स्वरूपे स्थितं तत्त्वम् वेत्ति न तत्त्वमावृतेः ।
इत्यावृतिः शिखरासीना, तत्त्वं तले विषीदति ॥ २३ ॥

आवृतिर्वर्धते तावत्, यावत्तत्त्वस्य नोदयः ।
प्रबुद्धेऽनावृते तत्त्वे, आवृतेरचिरं लयः ॥ २४ ॥

तीर्थाटने कुतस्तत्त्वम् कुतो मन्दिरमूर्तिषु ।
प्रत्यक्षमस्ति तत्तत्त्वम् नर एव नरोत्तमः ॥ २५ ॥

परोक्षं यन्मतं तत्त्वम्, सिद्धा तस्य परोक्षता ।
संशयो दर्शने तस्य, प्रत्यक्षं किं न सेव्यते ॥ २६ ॥

प्रत्यक्षं जगतः सत्त्वम्, सत्त्वञ्च सत्यमुच्यते ।
प्रत्यक्षं यदि मिथ्या स्यात्, परोक्षे तर्हि का कथा ॥ २७ ॥

लोको मूलं हि सत्यस्य लोके सत्यं प्रतिष्ठितम् ।
लोकेऽपि यदि सन्देहः, सर्वत्र तर्हि संशयः ॥ २८ ॥

अत्रानेकानि तत्त्वानि, द्वयोस्तत्र प्रधानता ।
प्राणा हि प्रथमं तत्त्वम्, हृदयञ्चापरं मतम् ॥ २९ ॥

प्राणा मूलं हि लोकस्य, प्राणाश्चैतेऽर्थमास्थिताः ।
अर्थोन्मुखानि भूतानि, अर्थस्यातः परा स्थितिः ॥ ३० ॥

हृदिदं हि लता हृद्या, भावानां प्रसवो यतः ।
दृढास्तन्तव एते, तेन लोकस्य बन्धनम् ॥ ३१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बन्धनमेव सम्बन्धः, सम्बन्धा विविधा मताः ।
एतैर्लोकस्य लोकत्वम्, लोकः सम्बन्धबन्धनम् ।। ३२ ।।

हृल्लतायाः प्रसूतेषु, भावेषु योगमागते ।
शरीरं चैव बुद्धिश्च, शरीरेऽत्र विशेषता ।। ३३ ।।

साक्षात्कारः परो भावी, ज्ञातिः पूर्वं पुरस्कृता ।
सम्बन्धेन जितं लोके, ज्ञानमविकलं जितम् ।। ३४ ।।

परीक्षितानि नामानि, शिष्याः कुतः परीक्षिताः ।
जाते जितं त्वया लोके, जितं तद् गुरुगौरवम् ।। ३५ ।।

राष्ट्रमेकं महाक्षेत्रम्, क्षेत्राण्यत्र पदे पदे ।
क्षेत्रं जितं त्वया लोके, आश्रयो यत्तिरस्कृतः ।। ३६ ।।

एकैव नो मता माता, एकैव चास्ति संस्कृतिः ।
भाषे जितं त्वया लोके, सोदरा यद्विभेदिताः ।। ३७ ।।

अहं भाग्यस्य निर्माता, नतौ! नैषां कथं त्वरा ।
गुरुणा ते हताः शिष्याः, परीक्षा च वधस्थली ।। ३८ ।।

शिष्येभ्योऽद्य गता श्रद्धा, गुरोश्च गरिमा गतः ।
क्रमेणैवं गतं सर्वम्, केवलं शून्यता स्थिता ।। ३९ ।।

मयि दोषो मतस्तस्य, तस्मिंश्च स मतो मम ।
दोषः कस्येति किं वाच्यम्, व्यवस्था यत्र जर्जरा ।। ४० ।।

सीदति ऋजुता यत्र, आवृतिश्च प्रसीदति ।
सन्निपातः स उद्भूतः, श्वसनं यत्र संशये ।। ४१ ।।

सम्बन्धैराकुलं सर्वम्, व्यवस्था चापि जर्जरा ।
भावास्तेन जराजीर्णाः, अर्थस्तिष्ठति निर्जरः ।। ४२ ।।

जीवनं कर्म जीवानाम्, प्रकर्षः कर्मणः श्रमे ।
प्रकर्षोऽवश्यमाधेयः, येनैतत्स्यात्सुजीवनम् ।। ४३ ।।

कर्म गतिर्मता लोके, गतिमन्तश्च प्राणिनः ।
नरस्तच्छिखरारूढः गतेरेषा परा गतिः ।। ४४ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मतत्त्वं गुहालीनम्, ज्ञातं तदपि वायुना ।
इत्येष सततं वाति, कर्म धर्मः परो मतः ॥ ४५ ॥

विचित्रा कर्मणः शक्तिः, प्रभावस्यास्य का कथा ।
गतिश्चक्रेषु यानस्य, पान्था गन्तव्यमागताः ॥ ४६ ॥

स्वस्मिन् भवेत् परस्मिन् वा, नियतं कर्मणः फलम् ।
शोषितस्वेदसेकेन, फुल्ला धनिकवल्लरी ॥ ४७ ॥

आविष्कृतानि यन्त्राणि, लोकानां हितकाम्यया ।
पीडनं चालनं तेषाम् स्वयं स्याद् यदि विश्रमः ॥ ४८ ॥

यानं तु यानमेवास्ति, दृष्टं लोकेन वा न वा ।
लक्ष्यं तवास्ति किं पान्थ, प्रयाणं वा प्रदर्शनम् ॥ ४९ ॥

प्रदर्शनञ्च यानञ्च, द्वयमेकत्र दुर्लभम् ।
प्रदर्शने श्रमो यस्य, याने तस्यागतः क्लमः ॥ ५० ॥

याति नरो न वा याति, चिन्ता तवात्र कीदृशी ।
याति स दिशि कस्याम् चिन्त्यमेतन्मुहुर्मुहुः ॥ ५१ ॥

देहो यानं मतो लोके, हृदयञ्चात्र चालकम् ।
सम्बन्धैर्हृदये बद्धे, कुयानं तन्न संशयः ॥ ५२ ॥

पदं प्रियं मतं लोके, द्वारमर्थस्य तद्ध्रुवम् ।
अर्थः प्रियतमो लोके, पदेन तस्य संगमः ॥ ५३ ॥

पदं स्थानमिति प्रोक्तम्, स्थानस्य नियमे स्थितिः ।
तेन पदं पदं प्रोक्तम् तदभावेऽपदं मतम् ॥ ५४ ॥

नियमैर्धार्यते लोकः, सम्बन्धैश्च बध्यते ।
धारितस्य गतिर्जाता, बद्धस्य गमनं कुतः ॥ ५५ ॥

चिन्ताकुले जगत्यस्मिन्, पदचिन्ता गरीयसी ।
अस्य चलनमात्रेण, कम्पितं हृदयं मम ॥ ५६ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मलेरिया से सावधान

क्या आपके परिवार का कोई भी सदस्य बुखार से पीड़ित है ? इसकी उपेक्षा मत करिए । यह मलेरिया भी हो सकता है । जो एक बुरी बीमारी है । ये स्वस्थ व्यक्ति को दबोच लेता है तथा उसकी शारीरिक दुर्बलता और परेशानी का कारण बनता है । अक्सर समूचे गाँव शहर या अंचल इसकी पकड़ में आ जाते हैं ।

लक्षण

मलेरिया के लक्षण हैं :

- सर्दी और कंपकंपाहट के साथ एकदम तेज ज्वर जो आमतौर से कुछ घंटे ही रहता है ।
- तीव्र ताप और तेज सरदर्द ।
- इसके बाद बहुत पसीना बहना और अत्यधिक कमजोरी के साथ बुखार का कम होना ।

बचाव के उपाय

किसी भी प्रकार का बुखार होने पर शीघ्र ही खून की जांच जरूरी है । इसके बाद संभावित उपचार के लिए निर्धारित संख्या में क्लोरोक्विन की गोलियां खाएं यदि खून में मलेरिया के कीटाणु पाए जाएं तो मूल उपचार के लिए पाँच दिन तक मलेरिया रोधी दवा खाएं ।

तेज बुखार, बेहोशी या संधि की स्थिति में रोगी को शीघ्र ही प्राथमिक स्वास्थ्य केन्द्र, डिस्पेंसरी या अस्पताल में ले जाएं, जहां सभी को मुफ्त डाक्टरी सलाह और उपचार दिया जाता है ।



मलेरिया की रोकथाम के लिये

- गंदे पानी को अपने घर में अथवा आसपास जमा न होने दें । क्योंकि मलेरिया फैलाने वाले मच्छर इसी पानी में पनपते हैं । यदि ऐसा करना असम्भव हो तो उस पर मिट्टी का तेल छिड़कें ।
- समय-समय पर कीटनाशक दवाई छिड़कने वाले दलों को सहयोग दें । दूसरों को भी ऐसा करने को प्रेरित करें ।
- अपने घर में पूरी तरह से छिड़काव करवाएं । रसोईघर, पूजा का कमरा, गोदाम या पशुओं को बांधने की जगह इत्यादि में भी छिड़काव का ध्यान रखें ।
- छिड़काव करते समय खाने की वस्तुओं तथा चारे को ढक कर रखें ।

मच्छर और मानव का सम्पर्क न होने दें

राष्ट्रीय मलेरिया उन्मूलन कार्यक्रम

(स्वास्थ्य और परिवार कल्याण मंत्रालय)

22, शामनाथ मार्ग, दिल्ली-110054

डीएवीपी 80/428

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्व-वार्ता:—

आंगलराजकुमारस्य वाग्दानम्

(श्री विश्वदर्शी)

आंगलदेशस्य राजकुमारः चार्ल्सः यो हि प्रिन्स आफ वेल्स इत्याख्यायते, कतिपय-मासपूर्वं भारतयात्रायै समागतोऽभूत्। तदानीं हि सः कुमारः (अविवाहितः) आसीत्, सर्वत्र सेयं चर्चा च प्रसृताभूत् यत् "न जाने कां कुमारीं समुपस्थाययिष्यति विधिर्या आङ्गलसाम्राज्यस्य भाविनः सम्राजोऽस्य पट्टमहिषीपदमारोक्ष्यति।" तदा बहूनां देशानां राजकुमार्यः, अन्याश्च सौभाग्यकाङ्क्षिण्यः सुन्दर्यस्तेन सह विवाह सम्बन्धाय चर्चाधीना अभूवन् किन्तु तदिदमश्रूयत यद्राजकुमारः एकस्य शिक्षकस्य सुतया सह स्नेहपरः, मन्ये तया सह पाणिग्रहणस्यानुमतिस्तस्मै आङ्गल-सम्राज्या प्रदास्यते। किन्तु तदवधि न वाग्दानादि किंचिदपि कार्यमधिकृतरूपेण संपन्नमासीत्। भारते बम्बई–चित्रपटस्याभिनेत्र्या कुमारी पद्मिनी कोल्हापुरे इत्याख्यया यदा चुम्बनेन चार्ल्सस्य स्वागतं कृतमासीत् तदा कतिपयैः पत्रकारैः सेयं टिप्पणी कृताऽभूद्यन्मन्ये पद्मिनी अप्यस्याः संभावनायाः स्वप्नं पश्यति यत्कदाचित्साऽपि भाविपट्टमहिषीपदाय विचारारूढा भवेदिति।

किन्तु फरवरीमासस्यान्तिमेषु दिवसेषुआंगलसाम्राज्यस्य राजगृहात् "बकिंघम पैलेस" इत्याख्यात् "राजकुमारस्य वाग्दानं सम्पन्न"—मित्यधिकृता घोषणा प्रसारिता यया सर्वो-प्यूहापोहः समापितः। घोषणायां सूचितमस्ति यत्सम्राज्ञी (राजकुमारस्य माता, आङ्गल-सम्राज्ञी एलिजाबेथ) ड्यूकश्च (सम्राज्ञ्याः पतिः) सहर्षं घोषयतो यत् चार्ल्सस्य वाग्-दानं अर्लस्पेन्सरस्य, श्रीमत्या, शैन्ड किड इत्याख्यायाश्च सुतया लेडी डायनास्पेंसर इत्या-ख्यया सह संपन्न" मिति।

सेयं सुन्दरी एकोनविंशतिवर्षीया, प्रांशुशरीरा, नीलाक्षी, स्वर्णिमकेशवती चास्ति तत्पिता लन्दनस्य पिमलिको-प्रदेशे शिशुविद्यालयशिक्षकोऽभूत् किन्तु पितामहः चतुर्थजार्जस्य साम्राज्यकाले सामन्तोऽभूत्। राजकुमारश्चार्ल्सो द्वात्रिंशद्वर्षवयस्कोऽस्ति। विवाहोऽयं ग्रीष्मर्तावस्मिन्नेव संपद्यतेति संभाव्यते, यद्यपि निश्चिता तिथिर्नाद्यावधि घोषिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बेटे वाले ज़रा सोचें ...

जो लोग बेटियों के विवाह की कठिनाइयों को भोग चुके होते हैं, वही अपने बेटों के विवाह के अवसर पर बिल्कुल भूल जाते हैं कि हमें कितनी ठोकरें खानी पड़ी थी, जरा सी सहानुभूति नहीं प्रकट करते, बल्कि कन्या के विवाह में जो तावान उठाया था, उसे चक्रवृद्धि ब्याज के साथ बेटे के विवाह में वसूल करने पर कटिबद्ध हो जाते हैं। कितने ही माता-पिता इसी चिन्ता में घुल-घुलकर अकाल मृत्यु को प्राप्त हो जाते हैं, कोई सन्यास ग्रहण कर लेता है, कोई बूढ़े के गले कन्या को मढ़कर अपना गला छुड़ाता है, पात्र-कुपात्र के विचार करने का मौका कहाँ, ठेलमठेल है।

—प्रेमचन्द ('उद्धार' कहानी से)

... क्या यह सब आज भी सच नहीं ?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतव्याकरणप्रवेशिका

संख्यावाचक विशेषण

लेखकः श्रीविश्वनाथमिश्रः, बीकानेरः

पूर्वाऽनुवृत्तम्—

एक, द्वि, त्रि, और चतुर् इन चार संख्या वाचक शब्दों के रूप तीनों लिङ्गों में भिन्न-भिन्न होते हैं। यह बात पहले बताई जा चुकी है कि एक शब्द संख्यावाची के अतिरिक्त नाना अर्थों वाला है। उनमें जब यह संख्यावाची होता है तब यह नित्य एकवचनान्त होता है। उस समय इसके रूप इस प्रकार होते हैं—

एक

	पुंलिङ्ग	नपुंसकलिङ्गः	स्त्रीलिङ्ग
प्र.	एकः	एकम्	एका
द्वि.	एकम्	एकम्	एकाम्
तृ.	एकेन	शेष रूप पुंलिग की भांति	एकया
च.	एकस्मै		एकस्यै
पं.	एकस्मात्		एकस्याः
ष.	एकस्य		एकस्याः
स.	एकस्मिन्		एकस्याम्

द्वि शब्द (दो)

द्वि शब्द के इकार को विभक्ति लाने से अकार हो जाता है[1]। नित्य द्विवचनान्त होने के कारण पुंलिङ्ग में औ (प्रथमा और द्वितीया का द्विवचन) आने पर वृद्धि हो जाती है। तीन भ्याम् प्रत्ययों में 'सुपि च' सूत्र से दीर्घ हो जाता है और षष्ठी तथा सप्तमी के द्विवचन में अकार को "ओसि च" सूत्र से एकार करके "एचोऽयवायावः" सूत्र से अय् कर दिया जाता है। स्त्रीलिङ्ग में द्विशब्द के इकार को "त्यदादीनामः" सूत्र से अकार करने के बाद टाप् कर दिया जाता है। अब द्वा शब्द बन जाने पर उसके आगे औ विभक्ति को शी हो जाता है[2]। इसके बाद आकार और इकार के स्थान पर गुण एकार हो जाता है।

१. त्यदादीनामः २. औङ आपः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेष रूप पुंलिङ्ग की भांति ही होते हैं। नपुंसकलिङ्ग में भी औ विभक्ति को शी आदेश[1] और गुण एकादेश होता है। शेष रूप और प्रक्रिया पुंलिङ्ग की भांति ही होते हैं। इस प्रकार द्वि शब्द के रूप निम्नलिखित हैं—

	पुंलिङ्ग	नपुंसकलिङ्ग।	स्त्रीलिङ्ग
प्र.	द्वौ	द्वे	द्वे
द्वि.	द्वौ	द्वे	द्वे
तृ.	द्वाभ्याम्	शेषरूप पुंलिङ्ग के समान	शेषरूप पुंलिङ्ग के समान
च.	द्वाभ्याम्		
पं.	द्वाभ्याम्		
ष.	द्वयोः		
स.	द्वयोः		

त्रि शब्द को स्त्रीलिङ्ग में तिसृ आदेश[2] हो जाता है, इसलिए स्त्रीलिङ्ग में तिसृ शब्द का रूप चलता है। नपुंसकलिङ्ग में त्रि शब्द अपने मूल रूप में ही रहता है। जश् और शस् विभक्तियों को शि आदेश करके वहां नुम् और दीर्घ होता है। इसी प्रकार चतुर् शब्द का स्त्रीलिङ्ग में "चतसृ" ऐसा रूपान्तर हो जाता है। नित्यबहुवचनान्त होने के कारण इनके आगे बहुवचन विभक्तियां आती हैं। त्रि और चतुर शब्द के तीनों लिङ्गों के रूप इस प्रकार हैं।

	पुंलिङ्ग	स्त्रीलिङ्ग	पुंलिङ्ग	स्त्रीलिङ्ग
प्र०	त्रिः	तिस्रः	चत्वारः	चतस्रः
द्वि०	त्रीन्	तिस्रः	चतुरः	"
तृ०	त्रिभिः	तिसृभिः	चतुर्भिः	चतसृभिः
च०	त्रिभ्यः	तिसृभ्यः	चतुर्भ्यः	चतसृभ्यः
पं०	त्रिभ्यः	"	"	"
ष०	त्रयाणाम्	तिसृणाम्	चतुर्णाम्	चतसृणाम्
सं०	त्रिषु	तिसृषु	चतुर्षु	चतसृषु

१—नपुंसकाच्च २—त्रि चतुरोः स्त्रियां तिसृचतसृ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रि शब्द के नपुंसकलिङ्ग में प्रथमा और द्वितीया के बहुवचन में त्रीणि, रूप होते हैं। शेष रूप पुंलिङ्ग की भांति हैं। इसी प्रकार चतुर शब्द के नपुंसकलिङ्ग के प्रथमा तथा द्वितीया के बहुवचन में "चत्वारि, चत्वारि रूप होते हैं। इनके अतिरिक्त सारे रूप पुंलिङ्ग के समान होते हैं। संख्यावाचक शब्द विशेषण होते हैं इसलिये अपने विशेष्य के अनुसार इनके लिंग, विभक्तियां और वचन होते हैं। इस बात का ध्यान रखना चाहिये।

(क्रमशः)

जगद्गुरु भारत की मान्यता

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मति र्मम ॥

योगिराज श्रीकृष्ण

शुभकामनाओं सहित

श्री बजरंग दाल एवं तेल मिल

गोवर्धनपुरा, कोटा (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्ण जयंती वर्ष

आयुर्वेद सेवाश्रम लि.

जनसेवा के
५० वर्ष

हम
आभारी हैं



ऋषि मुनियों की
युगों युगों की शोध

सेवाश्रम का
गाय छाप

ब्राह्मी आँवला केश-तैल
और काला दन्त मन्जन

ब्राह्मी आँवला केश-तैल आधुनिक पद्धतिसे निर्मित केवल तैल ही नहीं एक आयुर्वेदिक सौंदर्य प्रसाधन है। तथा काला दन्त-मंजन केवल मंजन ही नहीं एक आयुर्वेदिक औषधि है।

आयुर्वेद सेवाश्रम लिमिटेड उदयपुर, वाराणसी, हैदराबाद

heros' AS-147

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



३५–मैंक हाँनाचूं [इण्डोनेशियादेशस्य श्रेष्ठकथा]

श्री "पद्म" शास्त्री

१२८ मुक्तानन्दनगर, गोपालपुरारोड, जयपुरम्–१५

एकदा वोहारियानामकः कश्चिन्नरो यात्रां कुर्वन् कूपपार्श्वमाजगाम। तत्र तेन भोजनं कृतम्। जलमानेतुं यावत्स कूपपार्श्वमागच्छति तावत्सः कूपाभ्यन्तरात् अजाशब्दमश्रृणोत्। यावत्स कूपे दृष्टिपातमकरोत्तावदजामेकामपश्यत्। शुष्कप्रायेऽस्मिन् कूपे यत्किञ्चिज्जलमास्ते। वोहारिया अजाश्रृंगे रज्जुमायोज्य बहिर्निष्कासनाय यत्नमकरोत्। तदैव कश्चित् कुनामा व्यवहारी तत्रागतः, यस्य पार्श्वे बहवश्चोष्ट्रा आसन्। स वोहारियामपृच्छत् अपि वर्तते पिपासानिवारणार्थमत्र जलम्? वोहारिया प्राहः कूपेऽस्मिन् यत्किञ्चिज्जलं विद्यते वस्तुतोऽयमजाकूपः। तत्समक्षमेव वोहारिया अजां बहिर्निष्कासितवान्। अजां दृष्ट्वा व्यवहारी आश्चर्यचकितः सञ्जातः।

एक बार वोहारिया नामक कोई पुरुष यात्रा करता हुआ कुए के पास पहुंचा। वहां उसने भोजन किया। जल लेने के लिए जब वह कुए के पास आता है तब उसने कुए के अन्दर से बकरी के मिमियाने का शब्द सुना। जब वह कुए में देखता है तब उसे एक बकरी दिखाई दी। सूखे हुए इस कुए में थोड़ा बहुत जल था। बोहारिया ने बकरी के सींग में रस्सी डालकर उसे बाहर निकालने का प्रयत्न किया। उसी समय कुनामा नामका कोई व्यापारी वहां आया जिसके पास बहुत से ऊँट थे। उसने वोहारिया से पूछा—प्यास बुझाने के लिए जल है? बोहारिया ने कहा—इस कुए में थोड़ा बहुत जल है, वास्तव में यह बकरी का कुआ है। वोहारिया ने उस व्यापारी के सामने ही उस बकरी को कुए से बाहर निकाला। बकरी को देख कर वोहारिया आश्चर्यचकित रह गया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुनामा प्राह–कथमस्मिन् कूपे अजाः सञ्जायन्ते कथञ्च भवता निष्कास्यन्ते ? वोहारिया प्राह–रात्रौ अजाश्रृंगं कूपेऽस्मिन् क्षिपामि प्रातरेका अजा निष्पद्यते, रज्जुना तामजां वहिर्निष्कासयामि । तच्छ्रुत्वा सुनामा चकितः सन् प्राह–यदि मत्याश्वेंऽपि एतादृशः कूपो भविता तर्हि……। किञ्चित्कालानन्तरं कुनामा ब्रूते यदि त्वं कूपमेनं मह्यं प्रदास्यसि तर्हि भवते प्रभूतमन्नं दास्यामि । अन्नेनाहं किं करिष्यामि–वोहारिया प्राह–एकस्मिन्वर्षे कूपादस्मात् ३६५ अजाः निःसरन्ति । व्यवहारी मनसि व्यचारयत्–यद्यहं षड्ुष्ट्रैः कूपमेनं क्रेष्यामि तर्ह्यपि न कापि हानिः । कुनामा ब्रूते, षडुष्ट्रान् गृहाण, कूपमेनं मह्यं प्रयच्छ। वोहारिया किमपि विचिन्तयन् प्राह–यदि तुभ्यं रोचते कूपोऽयं तर्हि गृहाण । कुनामा प्रहृष्टः सन् प्राह–तव कल्याणं विदधातु देवः । उष्ट्रान्नीत्वा वोहरिया यदा गन्तुमियेष तदा कुनामा तस्याभिधानमपृच्छत् स प्रत्यवदत् "मैंक हांनाचूं" । इत्युक्त्वा वोहरिया दक्षिणां दिशं प्रति सत्वरमेव प्रचचाल । वोहारिया स्ववास्तविकं नाम नोच्चार्य

कुनामा ने कहा—इस कुए से बकरियां कैसे उत्पन्न होतीं हैं और कैसे आप उन्हें बाहर निकालते हैं ? । वोहारिया कहने लगा—रात में बकरी का सींग इस कुए में डालता हूं तो प्रातःकाल एक बकरी उत्पन्न हो जाती है । रस्सी से उस बकरी को बाहर निकाल लेता हूं । यह सुनकर कुनामा नामक व्यापारी चकित होता हुआ कहने लगा यदि मेरे पास भी ऐसा कुआ होता हो....। कुछ समय बाद कुनामा ने कहा—यदि तू इस कुए को मुझे दे देगा तो मैं तुझे बहुत अधिक अन्न दूंगा । वोहारिया ने कहा—अन्न से मैं क्या करूंगा । इस कुए से एक वर्ष में ३६५ बकरियाँ निकलतीं हैं । व्यापारी ने मन में विचार किया—यदि मैं ६ ऊंटों के इस कुए को खरीद लूं तो भी कोई हानि न होगी । कुनामा ने कहा—६ ऊँट ले लो और मुझे यह कुआ दे दो । वोहारिया कुछ विचार करता हुआ कहने लगा—यदि तुझे यह कुआ अच्छा लगता है तो इसे ले लो । कुनामा प्रसन्न होता हुआ कहने लगा–भगवान तेरा कल्याण करे । ऊँटों को लेकर वोहारिया जब जाना चाहता था तब कुनामा ने उससे उसका नाम पूछा, वोहारिया ने उत्तर दिया—मेरा नाम " मैं कहां नाचूं " है । यह कहकर वोहारिया शीघ्र ही दक्षिण दिशा की ओर चल पड़ा । वोहारिया ने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"मैं कहां नाचूं" इत्यवदत्—व्यवहारी रहस्यमज्ञात्वैव मनसि प्रहृष्ट आसीत् ।

अपना वास्तविक नाम न बताकर "मैं कहां नाचूं" यह कहा था किन्तु व्यापारी इस रहस्य को नहीं जानता हुआ भी मन में प्रसन्न था ।

व्यवहारी सायन्तने शृङ्गमेकं कूपे निपातयामास । प्रातरुत्थाय यावत्सः कूपे पश्यति तावन्नेकामजां तत्र दृष्ट्वा व्यचारयत् किं मया कापि त्रुटि, कृता भवेत् । द्वितीये दिने सः वहूनि शृङ्गाण्यन्वेष्य कूपे न्यपातयत् परं न तस्मिन्नजाः । धूर्तेणानेन प्रवंचितोऽहं नूनमिति मत्वा स तमन्वेष्टुं ग्रामाद्ग्राममगच्छत् । एकं ग्राममुपेत्य सः प्राह—अपि दृष्टो भवद्भिःकश्चित् "मैंक हानाचूं" नामकः पुरुषः ? सर्वे प्रोचुः—भवानत्रैव नृत्यं प्रकरोतु । सर्वे जना वाद्यवादनतत्पराः सञ्जाताः । अन्यस्मिन् ग्रामेऽपि स तथैव उत्तरं श्रुत्वा विषण्णः सन् स्वगृहं प्रतिनिवृत्तः ।

व्यापारी ने साम को एक सींग कुए में डाला । प्रातःकाल उठकर जब उसने कुए में एक बकरी भी नहीं देखी तब वह विचार करने लगा कि मुझसे कोई त्रुटि हो गई होगी । दूसरे दिन उसने बहुत से सींग इकट्ठे किये और कुए में गिराये लेकिन उस कुए में बकरियां उत्पन्न न हुई । इस धूर्त ने मुझे निश्चित ठग लिया है, यह सोचकर उसे ढूंढ़ने के लिए वह एक गांव से दूसरे गांव में गया । एक गांव में पहुंच कर उसने कहा—क्या आप लोगों ने "मैं कहां नाचूं" नामक किसी पुरुष को यहां देखा है ? सभी ने कहा—आप यहां नाचें—सभी लोग बाजे बजाने लग गये । दूसरे गांव में उसे ऐसा ही उत्तर सुनने को मिला तो वह दुःखी होता हुआ अपने घर लौट आया ।

तस्य धूर्तस्याभिधानस्य वास्तविकमर्थमज्ञात्वा यावत्स निवर्तते तावन्मार्गमध्ये रक्षापुरुषैः स निग्रहीतः न्यायाधिपपार्श्वं प्रापितः । न्यायाधिपेन पृष्टः स सर्वं वृत्तान्तमश्रावयत् । गुप्तचरै र्न्यायाधिपः संसूचितो यत् वोहारियानामकः कश्चित् षड्ष्ट्रानादाय

उस धूर्त के वास्तविक नाम को नहीं जानता हुआ जब वह लौट रहा था तब रास्ते में उसे सिपाहियों ने पकड़ लिया एवं न्यायाधीश के पास पहुंचा दिया । न्यायाधीश द्वारा पूछे जाने पर उसने सारा वृत्तान्त कह सुनाया । गुप्तचरों ने न्यायाधीश को सूचना दी कि वोहारिया नामक कोई पुरुष

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रामेऽस्मिन् समायातोऽस्ति। न्यायाधिपो व्यचारयदयमेव स धूर्तः।

६ ऊँटों के साथ इस गांव में आया हुआ है। न्यायाधीश ने विचार किया किया कि यह वही धूर्त है।

न्यायाधिपः रक्षापुरुषान् सम्प्रेष्य तमाकारयत् यत् कश्चित् "मैं क्या करूं" नामकः पुरुषः त्वया सह मिलितुमिच्छति, त्वं शीघ्रं चल न्यायाधिपपार्श्वे। वोहरिया तत्क्षणमेव न्यायाधिपपार्श्वमागतः। न्यायाधिपस्तमपृच्छत् किं कार्यमस्ति भवतः? वोहारिया प्रत्यवदत् भवन्तः 'मैं क्या करूं' अस्मिन्सम्बन्धे किमपि जानन्ति?।

न्यायाधीश ने सिपाहियों को भेज कर बुलाया कि कोई "मैं क्या करूं" नामक पुरुष तुमसे मिलना चाहता है, तुम शीघ्र न्यायाधीश के पास चलो। वोहारिया उसी समय न्यायाधीश के पास आ गया। न्यायाधीश ने उसे पूछा—आपका क्या काम है? वोहारिया ने उत्तर दिया—आप " मैं क्या करूं" इस सम्बन्ध में कुछ जानते हैं?।

आम्, अहं सर्वं सम्यग् जानामि। त्वं शीघ्रमेव व्यवहारिणे उष्ट्रान् समर्प्य गृहं प्रतिनिवर्तस्व, अन्यथा कृष्णमन्दिरस्यातिथि र्भविता। वोहारिया व्यचारयदनेन न्यायाधिपेन सर्वं वृत्तं परिज्ञातम्। सः क्षमां याचित्वा स्वग्रामं प्रति चचाल। कुनामा च न्यायाधिपं धन्यवादान् समर्पयति। मार्गमध्ये स्थाने स्थाने कुनामां वीक्ष्य जनाः प्रोचुः अत्रैव नृत्यं प्रकरोतु (यहीं नाचो, यहीं नाचो)। अधुना व्यवहारी प्रहृष्ट आसीदुष्ट्रान् प्राप्य। वस्तुतः स नर्तितुमारेभे। सर्वे जनाः करतालिकानवादयन्।

हाँ, मैं सब कुछ अच्छी तरह जानता हूं। तुम शीघ्र ही व्यापारी को ऊँट सौंप कर अपने घर लौट जाओ अन्यथा कृष्णमन्दिर (कारावास) के मेहमान बनोगे। वोहारिया ने विचार किया—इस न्यायाधीश ने सब कुछ जान लिया है। वह क्षमा मांग कर अपने गांव की ओर चल पड़ा। कुनामा ने न्यायधीश को अनेकों धन्यवाद दिये। मार्ग में स्थान स्थान पर कुनामा को देखकर लोगों ने कहा—यहीं नाच करो, अब व्यापारी ऊँटों को पाकर प्रसन्न था। वह वास्तव में नाचने लग गया। सभी लोगों ने हाथों से तालियाँ बजाईं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाधिक प्रचलित ग्रंथ-रत्न

यह दवाओं के नुस्खों की एक किताब मात्र नहीं है. बल्कि विशुद्ध भारतीय जीवन-दर्शन है. जिसे आयुर्वेदशास्त्र के मर्मज्ञ और जीवन-जगत के अनुभवी वैद्यराज पं० रामनारायण शर्मा ने सर्वसाधारण के हितार्थ सीधी-सरल भाषा और सुबोध शैली में लिखा है। १४ संस्करणों में अबतक इसकी डेढ़ लाख से अधिक प्रतियाँ बिक चुकी हैं. जो इसकी उपयोगिता एवं लोकप्रियता का प्रत्यक्ष प्रमाण है। इस ग्रथ में आहार-विहार संयम-नियम और ऋतु-अनुकूल रहन-सहन के विवेचन के साथ-साथ निदान, चिकित्सा तथा पथ्यापथ्य आदि विषय खूब समझाकर लिखे गये हैं, जिससे आयुर्वेदशास्त्र के गूढ़ विषयों को साधारण-से-साधारण लोग भी खूब आसानी से समझ लेते हैं। सभी लोग इस ग्रंथ से लाभ उठा सकें, इसलिए लगभग पौने पाँच सौ पेज की सजिल्द पुस्तक का मूल्य भी बहुत कम यानी ६) मात्र रखा गया है।

आरोग्य प्रकाश

श्री वैद्यनाथ
आयुर्वेद भवन लि०

कलकत्ता · पटना · झाँसी
नागपुर · नैनी (इलाहाबाद)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारी-स्तम्भः

गृहकार्यें सर्वेषां सहयोगः श्रेयान्

डॉक्टर श्रीमती श्रीराजेश्वरीभट्टः
लालबहादुर शास्त्री कालेज, जयपुरम्

पुरुषः नारी च गृहस्थरथस्य चक्रद्वयम्। परिवारे सर्वेषां सदस्यानां सक्रिय सहयोगो न केवलं गृहसञ्चालनश्रममपाकरोति प्रत्युत समेषां चेतःसु अमन्दमानन्दञ्च जनयति। जननीजनकयोरिदमपि प्रधानं कर्तव्यं यत्तौ बाल्यकालादेवारभ्य स्वशिशून् गृहकार्ये प्रेरणा प्रदद्याताम् इदं प्रायशो जायते यत् प्रारम्भिककक्षासु बालिकाः बालकेभ्यः प्रबुद्धतराः। कारणं यद्यस्य विविच्येत चेत्तर्हि स्पष्टमिदं सम्पत्स्यते यत् तासु गृहकार्यं प्रति विशिष्टा अभिरुचिर्वर्तते। बाल्यादेव ताः गृहस्य कार्येषु निजमातृणां साहाय्यं विदधति। इदमपि सत्यं यद्भारतीया जनाः कामयन्ते यत्ताः सकलमपि कार्यजातं सौकर्येण कर्तुं प्रभवेयुः। तात्पर्यमिदमस्ति यद्बालिकाः विद्याध्ययनात्प्रागेव शनैः शनैः कार्येषु दक्षा जायन्ते। तासु उत्तरदायित्वस्य भावना समुदेति। परन्त्वस्मिन् समाजे पितेव पुत्रः गृहकार्येषु मातुः साहाय्यं न विधत्ते। एकतः माता कार्यव्यापृता दृश्यतेऽपरतश्च जनकः समाचारपत्राणामालोडनप्रत्यालोडने तत्परो दरीदृश्यते। पुत्रा अपि तथैव समाचरन्ति। किन्तु येषु गृहेषु जनकोऽपि जनन्याः कार्ये साहाय्यं विधत्ते तत्र जातानां पुत्रपुत्रीणामपि स्वाभाविकीयं प्रवृत्तिर्वर्त्स्यति येन शिशवोऽपि स्व-स्वकार्यं स्वयमेव सम्पादयिष्यन्ति। गृहस्य कार्येषु नार्येका प्रातःकालादारभ्य सायं पर्यन्तं विशेषतो व्यस्ता वर्तते। स्वभावेऽपितस्याः विपरीतः प्रभावः सम्भवति। यदि गृहस्वामी गृहे सहयोगं प्रददाति तर्हि अन्येऽपि परिवारस्य सदस्यास्तथैवाचरिष्यन्ति। श्रमस्य विभागेनानेन सर्वोऽपि परिवारः सुखमानन्दं च लप्स्यते।

गृहस्थी रूपी गाडी के स्त्री और पुरुष दो पहिये हैं। परिवार के सभी सदस्यों का घर के काम काज में सहयोग न केवल गृह सञ्चालन के काम को कम करता है प्रत्युत सभी के हृदयों में आनन्द की धारा बहाता है। माता पिता का यह प्रमुख कर्तव्य है कि वे अपने बच्चों को घर के काम काज में लगावें। प्रारम्भिक कक्षाओं में लड़कियां लड़कों से बढ़कर होती हैं इसका कारण यही है कि उनकी गृहकार्य में बचपन से ही अभिरुचि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

ते के न जानीमहे

डॉक्टर श्रीगङ्गाधरभट्टः
सह-आचार्य, संस्कृतविभागे, राजस्थानविश्वविद्यालयः, जयपुरम्

एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये,
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ॥
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये,
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ।

उत्तमा, मध्यमा अद्यमाश्चेति मनुजानां तिस्रः कोटयः श्रूयन्ते । अधमेभ्योऽप्यध-मानां का स्यात्कोटी किञ्चतेषामभिधानमिति केनापि न विदितम् । एके जनाः सत्पुरुषाः

रहती है । लड़कों को बचपन से माँ की सहायता करना सिखाया जाता है । यह कहा जाता है कि लड़की को यह करना चाहिये और यह करना आना चाहिये । अर्थात् विद्यालय में जाने से पहले ही उसे काम करने का अभ्यास हो जाता है उनमें उत्तरदायित्व की भावना जागती है । किन्तु भारतीय समाज में प्रायः पिता घर के काम काज में सहयोग नहीं देते उसी को देखकर लड़के भी कामकाज में हाथ नहीं बटाते । प्रायः यह देखा जाता है कि गृहस्वामिनी घर के काम में व्यस्त है और गृहस्वामी अखबार के पन्ने पलटते रहते हैं । यदि पिता भी घर के काम काज में रुचि लें तो सारा परिवार बांट कर काम को पूरा कर लेगा । बच्चों की स्वाभाविक प्रवृत्ति काम काज में बढ़ेगी । प्रातःकाल से लेकर रात्रि पर्यन्त कार्यों में व्यस्त गृहिणी थकान से चूर-चूर हो जाती है और कदाचित उसका स्वभाव भी चिढ़चिढ़ा हो जाता है । यदि परिवार के सभी सदस्य घर के काम का विभाजन कर लें तो श्रम विभाजन के साथ ही साथ घर आनन्द उमंग और सुख से भर जायगा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. 1379/51
R. J. No. 2617
Licence No. PP. 9.
Licence to Post
Without
Prepayment

कथ्यन्ते ये स्वार्थसाधनमपि परित्यज्य परेषां हितचिकीर्षव एव वर्तन्ते । स्वार्थः सिध्येत वा न वा परं परार्थस्य सिद्धिरवश्यमेव भवेत् । ते पुरुषा सामान्याः ये स्वार्थाविरोधेन परार्थं साधयन्ति । स्वार्थमपि ते साधयन्ति सहैव यदि परार्थोऽपि सिध्यते तर्हि तदपि साध्यम् । एषा च मध्यमजनानां कोटी । ये च स्वार्थसिद्धये परहितं विनाशयन्ति ते मनुष्याः राक्षसा इव अधमश्रेणीभाजः समाजस्य कण्टकाः । ये च जनाः स्वार्थसिद्धिं विनैव परहितं विनाशयन्ति ते मनुष्याः राक्षसा इव अधमश्रेणीभाजः समाजस्य कण्टकाः । ये च जनाः स्वार्थ सिद्धिं विनैव परहितं नाशयन्ति ते तु अधमाधमा राक्षसेभ्योऽपि पतिताः के ते इति वयं ज्ञातु ं न समर्थाः ।

समाज में मनुष्य की चार कोटियां बताई जाती है उनमें से उत्तम, मध्यम और अधम—ये श्रेणियाँ तो प्रसिद्ध हैं किन्तु एक चतुर्थ कोटि भी है उसे क्या नाम दिया जाय यह विचारातीत है । कुछ व्यक्ति दूसरे के हित साधन के लिए अपना स्वार्थ भी त्याग देते हैं । स्वार्थसिद्धि हो या न हो वे दूसरों का हित करने में तत्पर रहते हैं । वे उत्तम कोटी के व्यक्ति गिने जाते हैं । मध्यम श्रेणी के व्यक्ति वे होते हैं जो अपने स्वार्थ के विरुद्ध न होने पर परहित में सन्नद्ध रहते हैं । अपना स्वार्थ वे सिद्ध करते हैं तथापि साथ ही साथ परहित भी करते रहते हैं । अधम श्रेणी के वे व्यक्ति होते हैं जो अपने स्वार्थ सिद्धि के लिए दूसरों की हानि कर सकते हैं वे मनुष्य रूप में राक्षस कहे जाते हैं । परन्तु जो व्यक्ति अपनी स्वार्थ सिद्धि के बिना भी दूसरों का अहित करने में लगे रहते हैं वे किस प्रकार के प्राणी हैं । वे राक्षसों से भी निकृष्ट है और वे क्या हैं इसे कोई भी नहीं जान सकता ।

प्रकाशकः-संस्कृत प्रचार परिषद् राजस्थान,
पता—भारती भवन, बी. १५ न्यू कालोनी, जयपुर-३०२०१ । दूरभाष-७५४९६
राधेश्याम द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित । दूरभाष-६१७६७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृत-मासपत्रिकायाः

पुस्तकालय गुरुकुल कांगड़ी

श्री बद्रीनाथः



श्री द्वारका

जगन्नाथः

वर्षम् ३१
वैशाखः
अङ्कः ७
मईः
१९८१

रामेश्वरः

नरो न मृगो दिव्यो
योऽस्ति देवो विलक्षणः।
ण्य-कशिपोः कालं
नुमस्तं भक्त-वत्सलम्

—श्रीरामगोपालशास्त्री, जयपुरम्

वार्षिकमूल्यम् पञ्चदशमुद्राः १५.००
एकप्रतेः—सार्धैकं रूप्यकम् १.५०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आन्ध्र-उत्तरप्रदेश-
Digitized by Arya Samaj Foundation Chennai and eGangotri
बिहार-पञ्चनद-सर्वकारैः स्वीकृता

विषय-सूची

क्र.सं	विषयाः	निबन्धारः	पृष्ठ-संख्या
१.	मङ्गलम्	श्रीरामगोपालशास्त्री, जयपुरम्	२३५
२.	मासावतरणम्	” ” ”	२३५
३.	वेदानां महत्वम्	डॉ० चन्द्रकिशोरः गोस्वामी	२३६
४.	भक्त्या हरिः प्रीयते	वैद्यः रामस्वरूपशास्त्री, बम्बई	२३८
५.	आयुर्वेद स्तम्भः–	श्री बी० बी० नटराज शास्त्री त्रिचिरापल्ली	२४०
६.	सम्पादकीयम्	प्रधानसम्पादकः	२४३
७.	तत्त्वशतकम्	डा० ब्रह्मानन्दशर्मा	२४७
८.	प्राचीनभारते लेखनकला	श्रीभगवानसहायशर्मा जयपुरम्	२५१
९.	पुस्तक-समीक्षाः	प्रधानसम्पादकः	२५४
१०.	संस्कृतसमाचाराः	श्रीपद्मशास्त्री, जयपुरम्	२५५
११.	स्वर्गतानां, विद्याभूषण-पं०श्रीगणेश-रामशर्मणां सुरभारती सेवा	श्रीकृष्णचन्द्रशर्मा शोधच्छात्रः जयपुरम्	२५६
१२.	देशवार्ताः	श्रीमंगलप्रसाद गुप्तः, कानपुर	२५९
१३.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, जयपुरम्	२६१
१४.	नारी-स्तम्भः	श्रीमती राजेश्वरीभट्ट, जयपुरम्	२६६
१५.	सूक्ति-सुधा	डा० श्रीगङ्गाधरभट्टः, जयपुरम्	२६७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानसंरक्षकाः–
जगद्गुरुशङ्कराचार्य-
स्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः
कांचीकामकोटिपीठाधिपतयः

संस्थापकः
स्व. श्री उमाकान्तकेशव आप्टे
(बाबा साहब आप्टे)

प्रधान सम्पादकः
जगदीशशर्मा
साहित्याचार्यः

सम्पादकः
दीनानाथत्रिवेदी 'मधुपः'

सहसम्पादकः
रामगोपालशास्त्री जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

संरक्षकः
श्रीदेवीशङ्करतिवाड़ी
जयपुरम्

प्रबन्ध-सम्पादकः
श्रीगिरिराजशर्मा
भारती-भवनम्
बी १५, न्यू कालोनी
जयपुरम्–१
(राजस्थानम्)

वर्षम् ३१ | वैशाखः, विक्रमाब्दः, २०३८ [मईः, १९८१] | अङ्कः ७

मङ्गलम्

दिव्यां सुधामय-सुवीचि-समुल्लसन्तीं
गङ्गामघौघ-शमन-व्रतिनीं विशालाम् ।
द्वारे हरेरुपगतामति पावयन्तौ
श्रीमन्मुकुन्दचरणौ शरणं प्रपद्ये ।।

मासावतरणम्

यश्चन्दनेनाऽर्च्यते व्रजेशं
शीतोपचारैरितरैश्च दिव्यैः ।
अनोकहेषूद्गमयन् सुपत्रा–
ण्यायाति **वैशाख** इहातिमोदकृत् ।।

—श्रीरामगोपालशास्त्री, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदानां महत्वम्

डॉ० चन्द्रकिशोरः गोस्वामी

ओ३म् तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दाऽसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।। इति ।।

(यजु० ३१/७)

अनादिनिधना नित्या वाग् उत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।। इति ।।

(महा० भा० २३२/२४)

सृष्टेरादौ परमकारुणिकपरमेश्वरेण यथा प्राणिनां कल्याणार्थं अनेकविधवस्तूनि रचितानि तथैव जीवानाम् अभ्युदयार्थं संसारस्य कार्यकलापनिर्वाहार्थं च सर्वान्तर्यामिणा सर्वनियन्त्रा परमात्मना वेदस्य ज्ञानं प्रदत्तम् । इत्थं वेदाः सृष्टेराद्यानि ग्रन्थरत्नानि निश्चीयन्ते । इमे वेदा भारतीयसभ्यतायाः संस्कृतेश्चानर्घ्यनिधियुताः सन्ति । भारतवर्षे समाजे सर्वेऽपि धार्मिककर्मकलापे वेदाधारेणैव सम्पाद्यते भारतीयानां सांस्कृतिकजीवनस्य प्रत्यक्षतोऽप्रत्यक्षतो वा मूलं वेदवाङ्मय एव । अतएव धर्मशास्त्रस्य प्रणेत्रा मनुना सम्यग् निगदितम्–

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः

(२/७)

वेदशब्दः प्रधानरूपेण ज्ञानार्थकाद्विद्धातो घञ्प्रत्यये कृते सति निष्पद्यते । विद् विचारणे विद् सत्तायाम् विदृल् लाभे विद् चेतनाख्यानवासेषु इत्यन्येभ्यो धातुभ्योऽपि घञि कृते वेदशब्दो निष्पादयितुं शक्यते । एतेन सिध्यति वेदा यद् धर्मार्थकाममोक्षाख्य-पुरुषार्थचतुष्ट्यसंपादकाः ज्ञानालोकप्रज्वालकाः सदाचारसंचारकाः जीवनस्योन्नायकाश्च सन्ति । अनिर्वर्णनीयता वेदानाम् ।

वेदा भारतीयजनजीवनोपकारकाः सन्तीति विभाव्य सर्वाणि शास्त्राणि पुराणानि विद्याश्च तान् व्याख्यातुं प्रवृताः । वेदार्थावबोधार्थं तच्छन्दनिर्वचननिर्धारणाय निरुक्तं प्रवृत्तम् । पदसाधुत्वलक्षणं व्याकरणं वेदलोकोभयभाषाबोधार्थमवतीर्णम् । वेदेषु संभृतानां ज्योतिषिकाणां तत्त्वानामवबोधाय ज्योतिषशास्त्रं वेदाङ्गतया प्रथितम् । एवं छन्दःकल्पौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षारूपाणि प्रातिशाख्यानि चापि वेदविद्याव्याख्यानाय प्रवर्त्तितान्यभवन्। वेदप्रमाण-मङ्गीकुर्वतां षण्णां दर्शनानामास्तिकत्वमास्थीयते । एतस्मात् कारणाद् मनुना संकीर्तितम्—

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।। इति ।।

(मनुस्मृतौ १/२१)

वेदाः खलु राजनीतिधर्मनीतिरर्थनीतिर्गणितविद्या. नक्षत्रविद्या चेत्यादीनां सर्वासां विद्यानामाकरस्वरूपाः सन्ति । अत एव मनुनोक्तम्—

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः इति ।

(मनुस्मृतौ २/७)

सर्वशक्तिमतः परमात्मन ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्च प्रादुर्भूताः । यथा चोक्तं अथर्ववेदे—

यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्
सामानि यस्य लोमान्यथार्वाङ्गिरसो मुखम्
स्कम्भं तं ब्रूहि कतमः स्विदेव सः इति ।

(अथर्व० १०/७/२०)

अन्यत्र शतपथब्राह्मणे—

'एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः' इति ।।

(श०ब्रा० १४/५/४/१०)

मुण्डकोपनिषदि एवमाम्नायते—'ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः' इति ।

(मु०उ० १/१/५)

छान्दोग्योपनिषदि—'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्' इति ।

(छा० उ० ७/१/२)

एभिः प्रमाणैरवगम्यते यच्चत्वारो वेदाः सन्ति ।
ते च परमात्मनो निश्वासभूताः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्त्या हरिः प्रीयते

वैद्यः रामस्वरूपशास्त्री,
संपादकः बालसंस्कृतम्, बम्बई

एकस्मिन् ग्रामे माणिकः नाम कुलालः अवसत् । गौरी तस्य भार्या आसीत् । रामदासः तस्य सार्धवार्षिकः सुतः अभवत् । माणिकः घटान् कलशान् मणिकान् कंसान् शरावान् कुतूकादीनि च विविधानि मृत्तिकायाः भाण्डानि रचयति स्म । पुनः सः तानि भ्राष्ट्रे पक्त्वा समीपग्रामे स्वग्रामे च विक्रीय धनम् अर्जित्वा कुटुम्बस्य भरणम् अकरोत् ।

माणिकः, भगवतःभक्तः आसीत् स कर्माणि कुर्वाणः अपि खादन् पिबन् गच्छन् अपि च सदैव भगवतः श्रीकृष्णस्य नामानि अजपत् न स कदा अपि भगवतः नाम व्यस्मरत् । स अवकाशेषु मालां गृहीत्वा सुतराम् उच्चैः

वेदशब्देन कस्यचिद् एकस्य पुस्तकस्य ज्ञानं न भवति, यथा पुराणशब्देन कस्यचिदेकस्य ग्रन्थस्य बोधो न जायते । बाईबिलग्रन्थवद् बौद्धानां त्रिपिटकग्रन्थवद् वा वेदाः कस्मिश्चिद् विशिष्टसमये संगृहीतानां वचनानां संग्रहो नास्ति । वेदशब्देन विपुलवाङ्मयस्य बोधो भवति ।

वेदा अस्माकं जीवनेन सह संबद्धाः सन्तीति तेषामनिवार्यतां प्रातिपादयता संकीर्तितं मनुना—

शूद्रेण हि समं तावद् यावद् वेदे न जायते ।
अनभ्यासेन वेदानामाचारस्य च वर्जनात् ।
आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघासति ।। इति

(मनुस्मृतौ २/१७२)

अपि च—

सेनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति ।। इति

इत्थं सम्पूर्णभारतीयं जीवनं वेदं विना वेदप्रमाणं विना वा नावस्थातुं शक्नोति । यदिदं जगद् दृश्यते तन्मूलं वेदेषु समाम्नायते महर्षिभिः । अत एव वेदनिन्दा न सोढव्या । यो वेदं निन्दति स नास्तिकः । एतावता वेदमाहात्म्यं न तिरोहितं भवति विद्याधनानां विपश्चिताम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वरेण श्रीरामस्य नामानि अजपत् । स नित्यं-जीविकार्थे यतमानः अपि क्षणमपि भगवतः स्मरणं ध्यानं कीर्तनं च नामुञ्चत् । स नित्यं श्रीकृष्णस्य भगवतः श्रीरामस्य च लीलाः संस्मृत्य संस्मृत्य बहुधा हसति रोदिति गायति नृत्यति स्म च अनेकदा भजनलीनः स भोजनं पानं वसनं चापि व्यस्मरत् स तु अनिशम्, श्रीकृष्णगोविन्दहरे ! मुरारे ! श्रीनाथ ! नारायण ! वासुदेव ! इत्यादीनि भगवतः नामानि जपन् आसीत् । दरिद्रः अपि स दान्तः शान्तः सन्तुष्टः सुखी च अभवत् ।

एकस्मिन् दिने माणिकः भाण्डानि कर्तुं मृत्तिकां मृन्मानः तारस्वरेण भगवतो नामानि च गायन् सर्वथा विस्मृतान्यविषयः स्वशरीरम् आत्मानं चापि विस्मृतवान् । तस्य भार्या कूपात् जलम् आनीय मृत्तिकाराशिम् असिञ्चत् । एतस्मिन् अन्तरे रममाणः तस्य शिशुःपुत्रः समेत्य पादयोः तम् अगृहीत् । स तु नितान्तं विस्मृतबाह्यविषयः न अवेदीत् तम् । तस्य लत्ताप्रहारेण शिशुः पङ्के अपतत् । स बालः उच्चैः अरोदीत् । परन्तु उच्चैः करताली वादयन् तारस्वरेण गायन् च न अशृणोत् स स्वस्य सुतस्य क्रन्दनम् । स तु मृत्तिकया साकं शिशुम् अपि स्वसुतं मृद्नातुं प्रवृत्तः आसीत् ।

अस्मिन् अन्तरे तस्य भार्या गौरी पुनः जलम् आदाय तत्र आगच्छत् । श्रीकृष्णासक्तचेतसं पुत्रं च पादाभ्यां मृदा मृन्मानं वीक्ष्य पुत्रस्य मरणात् भीता सा आक्रोशमकरोत् । तस्याः आक्रोशः पत्युः ध्यानम् अभनक् । सः पादयोः तले पतितं पङ्के निमग्नं सुतम् अवलोक्य भीतः भूमौ अपतत् करुणया अरोदीत् । सः पुनः पुनः पश्चात्तापम् अकरोत् । पुनश्च उत्थाय, सः भार्यासाहाय्येन पङ्के निमग्नं-सुतम् उद्धृत्य प्रेम्णा समालिङ्ग्य बहुधा अलालयत् । तस्य पत्नी रुदन्ती आसीत् । स विलन्तीं तां समाश्वास्य, भगवान् परमः दयालुः, स भक्तानां रक्षकः, स तु सर्वत्र वर्तते, सर्वं च पश्यति 'इति अवादीत् ।

माणिकस्तु हरिजनोऽभवत् । स तु सर्वं विहाय हरिमेव चिन्तयति स्म । हरौ तस्य सुदृढःविश्वासः आसीत् । स भगवतः नामभिः जलम् अभिमन्त्र्य पुत्रस्य मुखे असिञ्चत् । भगवतः कृपया तस्य पुत्रः जीवितः अभवत् । ततः तौ दम्पती परमया श्रद्धया भगवतः पूजनभजनं ध्यानं च अकुर्वाताम् । इयं च तदा आकाशे ध्वनिरासीत् ।

न दानं न तपो नेज्या
न शौचं न व्रतानि च ।
प्रीयतेऽमलया भक्त्या
हरिरन्यद् विडम्बनम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद-स्तम्भः—

आयुर्वेदीयं आत्मस्वरूपम्

वी० बी० नटराज शास्त्री, त्रिचिरापल्ली

पूर्वाऽनुवृत्तम्—

आत्मनस्तत्त्वविशेषान् भूयः उपदिदिक्षुः, तत्रादौ बोद्धव्यान् सामान्यन्यायान् आह आचार्यः—

"नैकः प्रवर्त्तते कर्त्तुं
भूतात्मा नाश्नुते फलम् ।
संयोगाद् वर्त्तते सर्वं
तमृते नास्ति किञ्चन ।।
न ह्येको वर्त्तते भावो
वर्त्तते नाप्यहेतुकः ।
शीघ्रगत्वात् स्वभावात्तु
भावो न व्यतिवर्त्तते ।।"

अयं भावः—भूतात्मा पञ्चमहाभूत संयुक्तः जीवात्मा एकादशकरणैः विना, स्वयं न प्रभवति किमपि कर्त्तुं यतः कर्म तत्फलं वा सर्वं करणैः संयोगादेव प्रवर्त्तते तस्य, इति व्यवस्थितमेतत् । ननु स्वयं ज्ञानवतोऽपि आत्मनः, कस्माद्धेतोः करणैः संयोगादेव प्रवृत्तिर्भवतीत्यत्र, सर्वेषां भावानां कर्मणां निष्पत्तौ नियतं अनपवादं न्यायमाह—नहीति—कार्यरूपः भावः पदार्थः, एको न वर्त्तते, किन्तु संयोगादेव वर्त्तते। एवं कारणं विनाऽपि कार्यरूपो भावः नैव सम्भवति संयोगरूपकारणजन्य एव भवति । उत्पत्ति विषये अयं न कुत्रापि व्यभिचरति, स्वभावात्, न हि स्वभावः पर्यनुयोगं अर्हति ।।

"न ह्येको वर्त्तते भावो वर्त्तते नाप्यहेतुकः" इति न्यायस्य श्रवणानुपदं जात संशयस्य शिष्यस्य प्रश्नः—स आत्मा नित्यः किम् ? उत अनित्यः ? इति । संशयबीजं तावत् — परमात्मजीवात्मानौ उभावपि भावरूपावेव । "अहेतुको भावो न वर्त्तते" इति न्यायेन भावरूपस्य परमात्मनोऽपि हेतुजत्वं अङ्गीकार्यं भाति । तथा अङ्गीकारे परमात्मनः सादित्वं अनित्यत्वं च दुष्परिहरम् । अनङ्गीकारे "भावः सर्वः हेतुमान्" इति न्यायस्य अव्याप्तिदोषः इति । आचार्यः परिहरति प्रश्नम्—

"अनादिः पुरुषो नित्यो
विपरीतस्तु हेतुजः ।
सदकारणवन् नित्यं
दृष्टं हेतुजमन्यथा ।।"

अवधीयतां इदं यत् सर्वे न्यायाः ऐकान्त्येन सर्वत्र सञ्चारयितुं न युज्यन्ते । "नह्येको वर्त्तते भावो वर्त्तते नाप्यहेतुकः" इति न्याय·

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तावत् यः पदार्थः अभूत्वा उत्पद्यते, तमेव अधिकृत्य प्रवृत्तः, न नित्यपदार्थमधिकृत्य ।

न्यायान्तरेणैव आत्मनो नित्यत्वं सिद्धयति । तद्यथा—यत् सत् वस्तु अकारण-वत्-कारणरहितं अस्ति, तत् नित्यं-अविनाशि भवति । एवं यत् वस्तु सदपि कारणवत्—हेतुजं भवति, तत् सर्वं अन्यथा—विनाशि भवति इति च अन्वयव्यतिरेकाभ्यां दृष्टं तत्त्वपरीक्षकैः । अनेन निरपवादन्यायेन यः केवलश्चेतनाधातुः परमात्मा स अकारणः, तस्मात् अनादिः नित्यः आद्यन्तरहितः काल-देशवस्तुभिः अपरिच्छिन्नः । यस्तु कर्मजः पुरुषः जीवात्मासंज्ञकः स विपरीतः—सादिः अनित्यः नश्वरः स्वकृतकर्मस्वरूपकारण-वत्त्वात् इति च सिद्धम् ।

ननु अकारणत्वात् परमात्मनो नित्यत्वं इति हेतुः, अकारणवतोऽपि प्रागभावस्य अनित्यत्त्वात् सव्यभिचारः इति शङ्कचम्, प्रागभावस्य अभावरूपत्वात् परमात्मनो भाव-रूपत्वात् । एवं, हेतुजत्वात् जीवात्मनः इति हेतोः, हेतुजन्यस्य प्रध्वंसस्य नित्यत्वात् व्यभिचारशंका निरस्ता भवति, प्रध्वंसस्य भावरूपत्वात् जीवात्मनः अभावरूपत्वात् । परमात्मजीवात्मनोः निर्गुणसगुणत्वं, तेन भावाभावत्त्वं च प्रोक्तपूर्वम् ॥

जीवात्मनो लिङ्गं बुभुत्सुः शिष्यः पृच्छति—"किं लिङ्गं पुरुषस्य च ? इति । विशिष्य आत्मलिङ्गजिज्ञासाकारणं ताव-दिदम्—परमात्मा नित्यो निर्गुणो नीरूपः, अतस्स अलिङ्गः, लिङ्गज्ञानप्रसक्तिरेव नास्ति । अविद्योपहितो जीवात्मा अनित्यः शरीरी, अतस्तेन लिङ्गवता भवितव्यं, येन तस्य सत्ता ज्ञायेत । स्थूलशरीरे अणुशः सूक्ष्म शस्त्रैः विशसितेऽपि न केनापि इन्द्रियेण ज्ञायते शरीरिणः पुरुषस्य सत्ता । यद्यप्युच्यते वेदा-न्त-दर्शनेषु हृत्पुण्डरीकगतो दहराकाशी जीवात्मनः उपलब्धि—स्थानमिति । तथाऽपि आप्रपदचूडं अन्तर्बहिश्च त्वग्रक्तादिधानून् विना वस्त्वन्तरं किमपि नोपलक्ष्यते अति-शक्तिमदणुवीक्षणयन्त्रसहायेनापि । विद्युत्-किरणानां (X-Rays) शरीरान्तरनुप्रवेशेन अत्यन्तसूक्ष्माणुद्रव्यप्रतिकृतयो (Photo) दृश्यन्तेऽपि, आत्मा नैव लक्ष्यते शरीरेणापि । इत्थं रूपरहितं तमात्मानं कथं नु जानीम ? इति ।

गुरुः शमयति—

"प्राणापानौ निमेषाद्या।
जीवनं मनसो गतिः ।
इन्द्रियान्तरसञ्चार।
प्रेरणं धारणं च यत् ॥

देशान्तरगतिः स्वप्ने
पञ्चत्वग्रहणं तथा ।
दृष्टस्य दक्षिणेनाक्ष्णा
सव्येनावगमस्तथा ॥

इच्छा द्वेषः सुखं दुःखं
प्रयत्नश्चेतना धृतिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुद्धिः स्मृतिरहङ्कारो
लिङ्गानि परमात्मनः ।।
इति चरकः ।।

इह जीवात्मनः इति वक्तव्ये परमात्मनः इति प्रयोगः जीवात्मपरमात्मनोः परमार्थतः अभिन्नत्वात् औपचारिकः इति स्मर्त्तव्यम् ।

सुश्रुतश्चाह—

"तस्य (जीवात्मनः) सुखदुःखे इच्छाद्वेषौ प्रयत्नः प्राणापानौ उन्मेषनिमेषौ बुद्धिः मनः संकल्पः विचारणा स्मृतिः विज्ञानं अद्धचवसायः विषयोपलब्धिश्च गुणाः" इति ।

अयमर्थः—प्राणापानौ उच्छ्वासनिश्वासौ । उच्छ्वसितस्य वायोः प्राण इति, निश्वसितवायोः अपान इति योगरुढी संज्ञा, उच्छ्वसननिश्वसनकर्मणोः शरीरे क्रमेण प्राणापानवायुभ्यां क्रियमाणत्वात् । अपानवायोः बहिर्निष्क्रमणस्वभावादेव अधोनाभिगतः अपानः, विण्मूत्रगर्भशुशोणितानि अधोनिष्क्रामयति । गत्यर्थस्य अन् धातोः 'अप' उपसर्गयोगेन अपानिति अधोगच्छति नैरन्तर्येण इति अपानशब्दस्य अर्थं एव अपानवायोः शारीरं कर्म प्रतिपादयति । अनेन अन्ये वायुभेदा व्याख्याताः कर्मविशेषाश्च ।

जीवनं—शरीरेन्द्रिय सत्वात्मसंयोगात्मकं आयुः । पञ्चत्वं नाम मरणम् । अर्थात् जीवात्मनः पृथिव्यादिपञ्चभूतमयस्थूलशरीरात् वियोगः । शरीर वियोगोऽपि जीवात्मनो लिङ्गेषु अन्यतमं भवति लक्षणया । मृतशरीरे अवशिष्यमाणं पञ्चत्वं षष्ठधातोः जीवात् वियुक्तत्वं लक्षयति स्पष्टमिति ज्ञेयम् । अन्ये लिङ्गवाचकाः शब्दाः व्याख्याताः ।।

एतानि प्राणापानादीनि लिङ्गानि कस्मात् आत्मसत्तां निरूपयन्ति इति पामराणामपि सुवेदं प्रत्यक्षप्रमाणं प्रदर्शयति आचार्यः—

"यस्मात् समुपलभ्यन्ते
लिङ्गान्येतानि जीवतः ।
न मृतस्यात्मलिङ्गानि
तस्मादाहुर्महर्षयः ।।
शरीरं हि गते तस्मिन् (जीवे)
शून्यागारमचेतनम् ।
पञ्चभूतावशेषत्वात्
पञ्चत्वं गतमुच्यते ।।"

अक्षरार्थः स्पष्टः । तात्पर्यं—एतेषां प्राणापानादिलिङ्गानां समेषां जीवत्पुरुषे एव सत्वात्, एकस्यापि लिङ्गस्य अन्यत्र क्वापि अभावाच्च अन्वयव्यतिरेकाभ्यां एतानि अव्यभिचारीणि आत्मलिङ्गानि भवन्ति । किञ्चेहेदं बोद्धव्यम्—उक्तानि लिङ्गानि कर्मफलभोगार्थं गृहीतस्थूलदेहगतस्य आत्मन एव, न तु स्थूलदेहान् निष्क्रान्तस्य आत्मनः । तस्य सूक्ष्मशरीरगस्य अत्यन्तं सूक्ष्मतमत्वात् तस्य सत्वं आगमैकबोद्धच पुनर्भवात् अनुमानगम्यं च ।। परमात्मनो निर्लिङ्गत्वं अग्रे वक्ष्यते इति ।। (क्रमशः)

❖ ❖ ❖

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरितां प्रवाह इवानादिकालादनवरतं प्रवर्तमानोऽयं वत्सरोपक्रमः प्रतिवर्षं वर्षासु जलौघ इव नवतामादधानो रामणीयकेन स्वकीयेन सर्वान् स्थावरान् जंगमांश्च जीवान् समुत्साहेन संधुक्षयन् विविधवर्णवद्भिर्वासोऽलंकारैर्नानाविधरागरञ्जितैः पत्रलेखादिभिश्च प्रियतमां प्रकृतिं चित्रयता फलपुष्पविशेषानादाय ऋतुराजेन धर्मशास्त्रानुसारं नवागन्तुकोऽयमभ्यनन्द्यत । अयं हि वत्सरोऽन्येषां संवत्सर इव नोद्वेगजनकः प्रत्युत सर्वेषामाह्लादयिता । ऋतुराजोऽपि सुगन्धवद्भिर्विविधैः सुमनोभिश्चेतनानचेतनांश्च सुरभीकुर्वन् नवजीवनं सञ्चारयति । अतएवायं वत्सरप्रारम्भो मधुमास एवोपयुक्तः । इयमेव हि भारतीया पद्धतिर्वैदिककालादेव प्रसृता श्रुतिप्रमाणैश्च प्रतिपादिता अयञ्च वसन्तः शुक्लयजुर्वेदीयसंहितास्त्रयोदशाध्याये "मधुश्चमाधवश्च वासन्तिकावृतू" (१३ । २५) इत्यनेन मन्त्रेण चैत्रमासादेवारब्धः । मासैरेव च संवत्सरोऽपि प्रवर्तते । स च शुक्लयजुर्वेदसंहिताया द्वाविंशाध्याये मधुमासादारभ्य तपस्याय स्वाहा इत्यन्तया कण्डिकया फाल्गुनान्तः प्रदिष्टः । "मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय, स्वाहा तपसे स्वाहा तपस्याय स्वाहा ꣳ हसस्पतये स्वाहा ।।" (२२ । ३१) ऋतूनामुपक्रमक्रमश्च यजुःसंहिताया एकविंशाध्याये "वसन्तेन ऋतुना देवा वसतस्मिवृताः स्तुता । २३ । इत्यारभ्य शैशिरेण ऋतुना देवास्त्रयस्त्रिꣳ शेऽक्रमः मृताः स्तुताः । सत्येन रेवताः क्षत्रꣳ हविरिन्द्रे वयोदधुः ।। २८ ।। एतदन्तैर्मन्त्रैः षण्णां ऋतूनां क्रमः प्रदर्शितः । अत्र सर्वप्रथमं वसन्तस्यैवोपात्तद्वयोर्मासयो ऋतुरेकः षट्सु मुख्यतमोऽयमेव । युग्ममासस्यतु रेकः प्रजायते निर्दिष्ट–एवञ्च चैत्र मासादेव ऋत्वारम्भः । चरमत–मधुश्चमाधवश्चेत्यादिना । अयमेव चैत्रिको मासारम्भकः सन् सम्वत्सरस्यापि मूलप्रवर्तकः ।

पुरुषसूक्ते पुरुषस्य निर्दिष्टे विराट्स्वरूपप्रतिपादके "वसन्तोऽस्यासीदाज्यमि" त्यस्मिन् मंत्रे आध्यात्मिकपक्षे देवोत्पत्तिविरहे मानसिकयज्ञे वसन्त एवाज्यत्वेन निरूपितः आज्यं च पोषकं तत्त्वम्, देवाश्च अग्निमुखा वै देवा इति श्रुत्या अग्निमुखेनैवाज्यमाददाना आयुषा समेधन्ते अघ्न्य स्थानीयत्वात् वसन्तस्य सर्वेऽपि वसन्ते हृष्टाः पुष्टाश्च जायन्ते । लोके

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसन्त एव यज्ञसम्पादकानां सर्वेषामोषधीनामपि प्रादुर्भावयिता अतएवायं संवत्सरप्रवर्तको ब्राह्मणस्याग्न्याधानकालोऽपि । वसन्ते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्य शरदि च वैश्यस्त्रयाणामेव वर्णानां त्रिष्वेवर्तुषु पर्यायतोऽग्न्याधानविधानम् । तत्रैव संहिता-अष्टादशाध्याये यजमानो यज्ञं कुर्वन्नग्निं प्रार्थयते—

"व्रतं च म ऋतवश्च मे संवत्सरश्च मेऽहोरात्रे ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ।। (१८/२३) इति कण्डिकया यज्ञपुरुषद्वारात्मनः कृते ऋत्वादीन् कामयते ।

ऋतुभिस्संपद्यमानो वसन्तादारब्धश्चायं संवत्सरः कल्पादौ यथाक्रमं ब्रह्मणा सृज्यते । तथा च श्रुतिः—

"ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत ततो रात्र्यजायत, ततः समुद्रोऽर्णवः समुद्रादर्णवादधिसंवत्सरोऽजायत····· ····· ·····धाता यथापूर्वमकल्पयत् ।"

पौराणिकैर्वचनैरपि विवृतमुपरितनमेव । तदुक्तं ब्रह्मपुराणे—

चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ।।
तद्दिनादेव कृतवान् कालस्य गणनामपि ।।

भविष्यपुराणे च—

चैत्रे मासि महाबाहो
पुण्या या प्रतिपत् परा ।
अस्यां वै निम्बपत्राणि
प्राश्य संशृणुयां तिथिम् ।।

ज्योतिषशास्त्रे लोकव्यवहारेऽपि मासेऽस्मिन्नैवसंवत्सरप्रवृत्तेर्दर्शनादयमेव कालो यत्सरारम्भस्य मुख्यतया विचारसरण्यापि समीचीनः प्रतिभाति । अतो भारतीयैस्सर्वैर्निर्निबन्धतया सर्वोऽपि व्यवहारोऽनेनैव प्रारब्धव्यः । स्वतंत्रभारते गौणत्वमापन्नचरस्यापि शकसंवत्सरस्य पुनः प्रवर्तनं अहमहमिकया कृतम् । राष्ट्रियपञ्चांगमपि शकसंवत्सरमादायैव साम्प्रतिकेन शासनसूत्रेण प्रचाल्यमानमास्ते । सोऽपि संवत्सर इदमीयमाससितपक्षादितिथितः प्रवर्तते । न ह्यत्र कस्यापि विमतिः । उभयथापि निदानमिदमेव संवत्सरस्य । अतो भारतीयैःख्रिष्टाब्दमान्यताग्रहं विहाय स्वतंत्रतायाः सार्थकता यथापद्येत तथैव प्रयतितव्यम् । सर्वविधोऽपि व्यवहारो भाविनो बालाश्चैतद्द्वारैव प्रचालनीयाः ।

जातेऽपि भारते स्वतन्त्रे गान्धिमहोदयानामाशासीद्या सा महर्घता-निर्धनता-वृत्तिविरहितानुशासनहीनता-स्वार्थपरायणता-दाम्भिकतस्करताप्रभृतिभिर्दुराशतया परिणताः । यदि च स्वातन्त्र्यप्राप्तेरनन्तरं ये गुणास्तै र्निर्दिष्टाः कर्त्तव्यपरायणताप्रामाणिकता सज्जनता त्यागवृत्तिर्देशभक्तिः सेवावृत्तिश्च देशोन्नतिकारकास्तेऽनुदिनं पालिताः स्युस्तदावश्यमेव तदीप्सितं सिद्धं स्यात् जनता च प्रसन्नतामापन्ना सर्वथा निर्दुष्टा स्यात् ।

सर्वमेव तावत् कालसापेक्षं जागतिकं वस्तु वर्तते । तत्र चक्रारपंक्तिरिवोच्चावचता सर्वेषामपि देशानां जाजायते । द्वितीयविश्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युद्धे ध्वंसविशेषाणि नगराणीव सर्वथा सपत्नैर्विध्वस्ताः फ्रांसजापानपश्चिमजर्मनींग्लैण्डादिदेशाः स्वकीयान् देशान् कर्त्तव्यपरायणतादेशभक्तिसमाश्रयणेन विश्वस्मिन् विश्वे समृद्धान् बलशालिनश्चाचरीक्रियन्त । अविद्यमानचरोऽपि इजरायलदेशः साम्प्रतमेतावान् बलीयानभवद् यन्नामश्रवणेनाखिला अप्यरबदेशा विक्लवीभवन्ति । कारणमिदमाभात्येतस्य यत्तत्रत्या नागरिकाः समयस्यात्मशक्तेश्च समर्पणं समाचरन्त्येव पुनरपि स्त्रियो बाला वृद्धाश्च स्वकीयं कर्त्तव्यं मन्वानाः सैनिकशिक्षामात्मन्यासं स्वीकुर्वाणाः स्वदेशस्य रक्षायै बद्धपरिकराः सन्ति, कथमपि न ततो विजुगुप्सन्ते ।

अवर्तत स कोऽपि कालो, यत्र भारतं वर्षमिदं सर्वान् देशान् शिक्षयन्मानवतां धर्मं संस्कृतिञ्च जगद्गुरुतामभजत । धर्मस्तत्र मुख्यतमं साधनम् । धर्मप्रधानेऽस्माकं देशे—

न राज्यं न च राजासीत्,
न दण्डो न दाण्डिकः ।
धर्मेणैव प्रजाः सर्वाः
रक्षन्ति स्म परस्परम् ।।

एवंविधायां स्थितौ वर्तमानायामेव पुनरपि बलीयस्त्वमापद्येत । किन्तु विघटमानप्रवृत्तिषु सत्सु जनेषु स्वार्थान्धतया गुरुगौरवसमाश्लिष्टमपीदं ह्रासोन्मुखमजायत । अस्मिन्नेवानेहसि प्रतीक्षमाणावसरे वैदेशिकैश्छिद्रान्वेषणपरैः पारतन्त्र्यपाशनिगडितं कर्त्तुं सन्नद्धैरभूयत । चिररात्राय निगडनवेदनामनुभूय कथमपि जातस्वातन्त्र्योऽयं देशो न तादृशीमवस्थामापेदे यादृशीं जापानदेशप्रभृतयः । कारणमस्य संघटनात्मिकायाः शक्तेरभावो देशभक्तेर्जुगुप्सात्मोत्सर्गभावनाविरहश्च ।

भारतं तदैव भारतं स्याद् यदा पुरेव सर्वोऽपि समाजो नेतॄन् विना राजनीतिसमाश्रयणे स्वकीयं नैर्घृण्यमालम्बेत । चरित्रं जनस्योन्नायकं भवति, अतएव स्मृतिकारैरुक्तम्—
'स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" इति । चरित्रशिक्षया बालका अप्युन्नतिं लभन्ते, युवानो वृद्धा अपि प्राप्तचरित्रा एव पूज्यन्ते । वैयक्तिकचरित्रसमावेशेनैव राष्ट्रियचरित्रमपि सुदृढं निष्पन्नं भवितुं शक्नोति द्रढिमानमुपगते च चारित्र्ये स्वत एव राष्ट्रमुन्नतिशीलं भवितुं शक्नोति । राष्ट्रहितमपि समाविष्टमत्रैव भवति । लोककल्याणं कांक्षद्भिः नूतनवर्षारम्भे निखिलैर्भारतीयैर्ध्येयमेदद् यदस्माभिराश्रयेषु सिंहादिभिरिव विरोधभावनां परित्यज्य स्वस्य राष्ट्रस्योत्थाने प्रवर्तितव्यमैकमत्येन ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद साहित्य की अमूल्य भेंट

वैद्य सहचर

लेखक—पं० विश्वनाथ द्विवेदी

वैद्य बन्धुओ,

चिकित्सा पद्धति को आगे बढ़ाने के लिए एक ही मार्ग है, और वह है—चिकित्सा शास्त्र के योगों पर पुनः नये सिरे से अन्वेषण कर उन्हें इस रूप में रख देना कि प्रत्येक साक्षर पुरुष उनको एक निश्चित रूप में प्रयोग कर समुचित लाभ उठा सके।

'**वैद्यसहचर**' ऐसे ही रहस्य का भण्डार है। इसमें श्री ललित-हरि आयुर्वेदिक कालेज, पीलीभीत में प्रयुक्त होने वाले ५० वर्षों के सुपरीक्षित और अव्यर्थ योगों का भी संग्रह है।

प्रस्तुत पुस्तक का उद्देश्य साधारण वैद्य को चिकित्सा मार्ग में सफल चिकित्सक बनाना है। सन्तोष का विषय है कि वैद्य समाज ने इसे अपनाया। इसके ६ संस्करण हो चुके हैं, यह इसकी उपयोगिता का स्पष्ट प्रमाण है।

पं० विश्वनाथ जी द्विवेदी ने इसके नये संस्करण को अधिक उपयोगी बना कर श्री बैद्यनाथ आयुर्वेद भवन लिमिटेड के निर्देशक वैद्यराज पं० रामनारायणजी शर्मा को प्रकाशित करने को दिया। ३४५ पृष्ठ की वैज्ञानिक पुस्तक का मूल्य ६–५० रु० मात्र है। बैद्यनाथ दवाओं के विक्रेताओं के पास भी यह पुस्तक मिलती है।

प्रकाशक,

श्री बैद्यनाथ आयुर्वेद भवन लिमिटेड,

गेट नाग रोड, नागपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्त्वशतकम्

डा० ब्रह्मानन्दशर्मा

पूर्वाऽनुवृत्तम्—

युक्तिर्देवी मया ध्याता, प्रभवश्च प्रसादिताः ।
व्रजने यापितः कालः, पदं तपांस्यपेक्षते ॥ ५७ ॥

विचलनं ममालोक्य, चलनं विस्मयमागतम् ।
सुदुष्करा पदप्राप्तिः, विशेषोऽतोऽवलम्बितः ॥ ५८ ॥

स्थाने स्थितिः परित्यक्ता, स्थितिः सा चरणे प्रभोः ।
कर्माकिञ्चित्करं लोके, प्रभुकृपा बलीयसी ॥ ५९ ॥

कर्मणा पदसम्बन्धः, यातः सोऽपि संशयम् ।
कर्म मौनं गतं लोके, सम्बन्धानां महाध्वनिः ॥ ६० ॥

मदीयोऽयं त्वदीयोऽयम्, ईयानामुपरि स्थितिः ।
यातो यस्य दिनं यातम्, वराकः स रसातले ॥ ६१ ॥

बलवान्मे मतो भावः, अर्थस्तु बलवत्तरः ।
भावाकुले जगत्यस्मिन्, अर्थ एवावशिष्यते ॥ ६२ ॥

गच्छतीति जगत्प्रोक्तम् गतौ नाविरतिः कदा ।
हेतुना गुरुणा भाव्यम्, उदरमत्र कारणम् ॥ ६३ ॥

अर्थस्यास्य श्रमो मूलम्, श्रमे सर्वं प्रतिष्ठितम् ।
श्रमोऽयं जगदाधारः श्रमो धर्मः परो मतः ॥ ६४ ॥

पुष्पं यत्र फलं तत्र, प्रकृतौ गतिरीदृशी ।
श्रमोऽत्र धनमन्यत्र, तेन लोके व्यतिक्रमः ॥ ६५ ॥

पादपो वारिणा सिक्तः, वराकेण फलाशया ।
फलमन्यत्र संलग्नम्, अश्रूणि चास्य नेत्रयोः ॥ ६६ ॥

प्रासादो निर्मितः शैत्ये, विनिद्रेण श्रमात्मना ।
कपोताः शेरते शून्ये, निर्माताऽनावृतो बहिः ॥ ६७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आवृतः पटुरावृत्याम्, अनावृतस्तु सागरः ।
तज्जलेन स्वमावृत्य, रत्नराशिः समुद्धृतः ॥ ६८ ॥

नायमध्यात्मवादो हि, आभासोऽयमिति स्थितम् ।
आभासमेनमाश्रित्य, धनिकैर्धनसंग्रहः ॥ ६९ ॥

पूर्वमुपार्जितं पुण्यम्, अर्थोऽयमिह तत्फलम् ।
अर्थस्य जडता सिद्धा, पुण्यं जडत्वमागतम् ॥ ७० ॥

अपूर्वः पादपः पुण्यम्, आत्मा यस्योद्गमस्थली ।
अर्थं फलं जडं सूते, भेदोऽयं हेतुकार्ययोः ॥ ७१ ॥

राष्ट्रं येन सुराष्ट्रं स्यात्, येन धरा वसुन्धरा ।
तस्यापि चेन्मतं पापम्, पापमेवास्तु नश्चिरम् ॥ ७२ ॥

चरत्यहर्निश कर्म, शेते भूमौ च सर्वदा ।
एतद्यदि तपो नास्ति, तपः किं भवतां मतम् ॥ ७३ ॥

आवृतः कर्मवादोऽयम्, आवृतिश्चार्थ एव हि ।
अर्थस्तत्र मतोऽनर्थः, सरणिश्चार्थमाश्रिता ॥ ७४ ॥

अन्नागाराणि पूर्णानि, अत्रोदरस्य रिक्तता ।
कोषे जडेऽपि ते व्यग्राः, कारुण्यं किमतः परम् ॥ ७५ ॥

प्रासादास्तस्य सौवर्णाः, कुड्यं नास्यास्ति सैकतम् ।
वशालेषु न हि स्थानम्, हृदि स्थानस्य का कथा ॥ ७६ ॥

महारण्यं मतं शून्यम्, नीडं तत्रापि पक्षिणे ।
जनाकुले जगत्यस्मिन्, शून्याः शून्यस्य सम्पदः ॥ ७७ ॥

दीनबन्धुर्हृदि ध्यातः' अर्थवर्धनकाम्यया ।
वन्धोर्ये बान्धवा दीनाः, ते च पदैः प्रताडिताः ॥ ७८ ॥

मूर्तये भोजनं दत्तम्, वाच्यं किञ्चिन्न तन्मया ।
इहास्ति मुखरा मूर्तिः सा च भोज्यानि याचते ॥ ७९ ॥

चलन्नास्ते क्व विश्रामः, भोज्यं तदपि दुर्लभम् ।
अचलतोऽरुचिर्भोज्ये, अर्थमतो निषेवते ॥ ८० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदरं तृप्येदन्नेन, स्वल्पेन वाऽधिकेन वा ।
यस्याहं वृद्धिमायातम्, तृप्तिस्तस्य कीदृशी ॥ ८१ ॥
अहमेवास्मि के एते, यूयमपि न केचन ।
अहंभावे प्ररूढेऽस्मिन्, लोकभावस्य का स्थितिः ॥ ८२ ॥
अन्नस्य कणिका नास्ति, विपत्तीनां परम्परा ।
एतासां तैः समं भोगः, भोजोऽयं परमं बलम् ॥ ८३ ॥
वराकाः शोषिताः सर्वे, शोषणं बलनाशनम् ।
शोषणे समाः सर्वे, निर्बलानामिदं बलम् ॥ ८४ ॥
सुखेषु ये समा जाताः, समता तत्र नामतः ।
दुःखेषु ये समा जाताः, ते समा नात्र संशयः ॥ ८५ ॥
आर्तानामार्तनादो यः, अर्तीनां स निर्गमः ।
लघुहृदि कुतः स्थानम्, वाणीरूपेण निर्गताः ॥ ८६ ॥
उद्गता आर्तनादेऽस्मिन् सततमश्रुबिन्दवः ।
अत्यार्द्रा गुखश्चैव, तेन जाता जनार्द्रता ॥ ८७ ॥
करुणनादमाकर्ण्य कृष्णः कृष्णामुपागत ।
द्रवितो यत्र लोकेशः, लोकानां तत्र का कथा ॥ ८८ ॥
पीडा पीडा समा जाता, समे च योगमर्हतः ।
योगे योगे क्रमेणैवम्, विश्वपीडाः समन्विताः ॥ ८९ ॥
लेखनी क्व कवेर्याता, वाणी च विरता कथम् ।
कारुण्यस्य कथाऽनन्ता, अश्रूणीह महामसी ॥ ९० ॥
व्यथावाणी प्रवृत्ता मे, शोषणे सा स्वभावजा ।
कण्टकैर्हृदये विद्धे, क्रन्दनं करुणं स्वतः ॥ ९१ ॥
आदौ रुदितमाद्येन, ग्राव्णा रुदितमुत्तरे ।
आनन्दो रोदिति ब्रह्म इष्टं किं ते मतं विधे ॥ ९२ ॥
आर्तानामर्तयः सन्ति, शोषणञ्चात्र कारणम् ।
शोषणाद्रोषणं जातम्, रोषणमर्तिसंगतम् ॥ ९३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शीतमपि जलं याति, अग्नियोगेन वाष्पताम् ।
रोषणस्यास्य योगेन, द्रुतिर्गच्छति दीप्तताम् ।। ९४ ।।

दीप्तानां स्वरो भिन्नः, भेदं चैषां गतिर्गता ।
आर्तनादो य उद्भूतः, स यातः शंखनादताम् ।। ९५ ।।

नाद एष महानादः, संघर्षे तुमुलध्वनिः ।
अनुनादा गता वृद्धिम् कण्ठे रुद्धाः प्रतिस्वराः ।। ९६ ।।

विपद्भिः समता तेषाम् अभावाद् बहुसंख्यता ।
एका कलियुगे शक्तिः, जनतन्त्रेऽपरा मता ।। ९७ ।।

आवृतानां धने वृद्धिः, संख्या तु तत्र हीयते ।
धनमनन्ततां याति, संख्या च याति शून्यताम् ।। ९८ ।।

मोहपङ्के वयं मग्नाः तत्त्वं परमगोचरम् ।
आवरणे वयं लग्नाः, तत्त्वमत्र प्रकाशते ।। ९९ ।।

मोहस्य दुष्करो भंगः, आवरणं विनश्वरम् ।
तत्त्वस्यास्य ध्रुवा व्याप्तिः, परं तु परमेव हि ।। १०० ।।

मुफ्त ! मुफ्त !! मुफ्त !!!

सफेद दाग

अगर आप सफेद दाग या किसी प्रकार के चर्म रोगों से परेशान हैं तो चिन्ता न करें। आप हमारे यहां से दो पाकेट लगाने की विजय बूटी मुफ्त मंगाकर केवल ५ दिनों में लाभ प्राप्त करें। रोग विवरण लिखें।

सफेद बाल

मैं अधिक प्रशंसा करना नहीं चाहता, हमारे आयुर्वेदिक "केश कान्ति" तेल से बालों का पकना रुक कर सफेद बाल काले हो जाते हैं। मूल्य १०) तीनशीशी २७) रु०।
हिन्द आयुर्वेद भवन, (B. H. 579) पो० कतरी सराय (गया)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचीनभारते लेखनकला

भगवानसहायशर्मा
शोधच्छात्रः-राजस्थान-विश्वविद्यालये, जयपुरम्

लेखनकलाया उद्गमः—

अस्मिन् संसारे विभिन्नविदुषां मतानुसारेण सम्पदायाः संस्कृतेश्च विकासाय साधनं लिखितं काव्यं साहित्यं वा वर्तते। अस्मिन् संदर्भे अस्माकं कृते एतत् आवश्यकं वर्तते यत् अस्या लेखनकलायाः प्राचीनकाले वैदिककाले वा तथा मध्यकाले कीदृशी स्थितिः आसीत् अस्मिन् विषयेऽपि अनुसंधानं भवेत्। एतदपि सुनिश्चतं विद्यते यत् यदा लेखनकला सुरक्षितं सुमुन्नतं च विद्यते तदा एव लोके विज्ञानस्य प्रगतिः मानवसमाजस्य लाभाय भविष्यति। अस्माकम् समक्षे कापि बाधा समस्या वा न आगमिष्यति।

वैदिककाले लेखनकलायाः स्थितिः—

वैदिकसाहित्यस्य एकम् अभिधानम् "श्रुतिः" अस्ति, तदा शिक्षाप्रणाली गुरु-शिष्यमध्ये संवादरूपेण एव अभवत्। अनेन प्रकारेण छात्राः गुरोः शिक्षां कंठगतां कृत्वा दर्दु रवत् उच्चारणं अकुर्वन्। अतः साहित्ये कंठगतविद्यायाः महत्वम् अभवत्। अतः कतिपयविद्वांसः अमन्यन्त यत् वैदिककाले लेखनकलायाः अविर्भावः न संजातः। तदानीं तु लिपिबद्धकार्यं न अभवत्। किंतु एतत् मतं समाचीनं न वर्तते। वयं केवलं एतदेव कथयितुम् समर्थाः यद् तदा वैदिक काले नराः ज्ञानप्राप्तिविषये अत्यधिक समुत्सुकाः आसन्।

मध्यकालिकी स्थितिः—

वैदिककालस्य पश्चात् स्मृति-उपजीव्य-काले लेखनकलायाः स्थितिः सुदृढा आसीत्। अस्मिन् समये सुप्रसिद्धाः कवयः राज्याश्रिताः आसन्। ते स्वमहत्त्वस्य परिचयं स्वरचनाभिः प्रापच्छन्। नृपाणां समक्षं विद्वांसः स्वकाव्य कृतिं श्रावयित्वा प्रीताः अभवन्। कवयः स्वजीविकोपार्जनाय काव्यं-कलां विधाय समुचितां धनराशिं प्राप्नुवन्ति स्म।

तस्मिन् समये खलु लेखनकलां सर्वोत्कृष्टां मन्यन्ते स्म। समाजे वैदिककालापेक्षया अनेकानां लिपीनां प्रयोगः अभवत्।

वर्तमानकालीन-व्यवस्था—

वर्तमानकालस्य तु दशा एव विचित्रा जायते। अद्य खलु जीवनस्य प्रत्येके क्षेत्रे जना उन्नतिम् अकुर्वन्। अतः निस्सन्देहरूपेण वर्तमाना व्यवस्था सर्वोत्कृष्टा विद्यते। अद्यत्वे तु लेखनकला नराणां कृते जीविकोपार्जनस्य प्रमुखं साधनं मन्यते। यथा जलं विना मत्स्यस्य जीवनं क्षणमात्रं अपि न वर्तते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैवाऽस्मिन् कालेऽपि लेखनकलां विना छात्राणां लिपिकानां तथा अन्येषां जनानां जीवनं सुचारुरूपेण न जायते। सत्यमिदं यत् अस्मिन् काले लेखनकला सिंहवत् नृपवत् वा महत्वपूर्णा अस्ति।

अस्याशयोऽपि स्पष्टमेव यत् अद्यत्वे लेखन कलायाः महत्वं भूरि भूरि जायते (परिवर्धते) एव।

लिपिः—

प्राचीनकाले भारतीयाः आर्याः अशोक लिपेः ब्राह्मीलिपे वाः प्रयोगम् अकुर्वन्। अशोकस्य शिलालेखेषु ब्रह्मीलिपिः प्राप्यते। कथ्यते यत् एषा लिपिः ताण्डवनृत्यलीनस्य महेशस्य डमरोः चतुर्दशसूत्ररूपे प्रादुर्भूता। अपरे विद्वांसः मन्यन्ते यत् एषा लिपिः सिंधु सभ्यताकालेऽपि विद्यमाना आसीत्। ईस्वी सनस्य अष्ट्म्यां शताब्द्यां देवनागरी लिपेः जन्म अभवत्। केचन जना वदन्ति यत् या देवानां लिपिः आसीत्, सा देवनागरी इत्युच्यते।

अस्यां भाषायां देवानां स्तुतिः अर्चना वा अभवत् अतः एषा देवनागरी लिपि कथ्यते। कालांतरे विकासं प्राप्य एषा एव लिपिः हिन्दीभाषायास्वरूपे समागच्छत्। वर्तमाने भारतवर्षे हिन्दीभाषा राष्ट्रभाषा-रूपेण शोभते। अतः वयं सत्यरूपेण एवं कथयितुं शक्नुमः यत् देवनागरी भाषा हिन्दी-भाषाया जननी वर्तते।

लेखनकलायाः साधनम्ः—

भारतवर्षे प्राचीनकाले लेखनकलायाः साधनानि बहूनि आसन्, यथा—ताड़पत्रम्, भूर्जपत्रम्, कार्पासम्, चर्म, शिलालेखम्, काष्ठम्, प्रस्तरम्, स्वर्णरजतादि धातवः। वर्तमान काले तु अस्या एव दशायाः विकासो-ऽभवत्। पत्रं मसियुक्ता लेखनी च सर्वत्र एव सुलभा अस्ति।

उपसंहार—

एकतः वयं कथयितुम् शक्नुमः यत् प्राचीनकाले एषा व्यवस्था उत्कृष्टा आसीत्। किन्तु अस्या दशायाः वर्तमानकाले यादृशः विकासो जायते स तु आश्चर्यजनकः अस्ति। यदा वयं प्राचीनं शिल्पं पश्यामः तदा स्वा-भाविकरूपेण प्रसन्ना भवामः।

वर्तमानकाले प्राप्तस्य शिल्पस्य विशे-षता विविधा एव अस्ति। इति शम्।

क्षत्रियो राजको यस्य
चाण्डालस्य विशेषतः।
कथं सदसि भोक्तारो
हविस्तस्य सुरर्षयः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्ण जयंती वर्ष
आयुर्वेद सेवाश्रम लि.

जनसेवा के
५० वर्ष

हम
आभारी हैं



ऋषि मुनियों की
युगों युगों की शोध

सेवाश्रम का
गाय छाप



ब्राह्मी आँवला केश-तैल
और काला दन्त मन्जन

ब्राह्मी आँवला केश-तैल आधुनिक
पद्धतिसे निर्मित केवल तैल ही नहीं
एक आयुर्वेदिक सौंदर्य प्रसाधन है।
तथा काला दन्त-मंजन केवल मंजन ही
नहीं एक आयुर्वेदिक औषधि है।

heros' AS-147

आयुर्वेद सेवाश्रम लिमिटेड उदयपुर, वाराणसी, हैदराबाद

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तक-समीक्षाः–

प्रधानसम्पादकः

पुस्तकनाम बंगलादेशोदयम्
प्राप्तिस्थानम् भारतीयविद्याप्रकाशनम्
१ यू०बी० जवाहरनगरम्
बँगलो रोड दिल्ली–७
मूल्यम् ३०/–

कवयः समाजस्य देशस्य तात्कालिकपरिस्थित्या प्रतीकात्मतया जनान्परिचाययन्तो जीवन्त इव यशः शरीरेण लोकमुपदिशन्ति। भाविनो जनानुभयविधा सन्धुक्षितुकामेन श्रीरामकृष्णशर्ममहोदयेन दृश्यकाव्यमिदन्निबद्धं संस्कृतभाषया। काव्येऽस्मिन्नचिरकाल-प्रवृत्ततया लोकप्रसिद्धस्यैकस्यप्रत्युत्तरैकोनविंशतिशततमेशवीयवर्षजातस्य बङ्गजनमुक्ति-सङ्ग्रामस्य तदाश्लिष्टभारतपाकदेशसङ्घर्षस्य च हृदयहारिवर्णनं कस्य न चेतश्चमत्करोति। कालिदासादिवद्रचयित्रा प्रस्तावनायां परम्परायानिर्वाहो विहितः स्वनामधेय-मात्रोपादानेन। अश्वघोषवण्णिजन्तसामान्यभूतप्रयोगैर्यत्रतत्र यङन्तप्रयोगमुखेन शब्द-शास्त्रनदीष्णता प्राचीकटचत। निर्मात्राऽत्र पूर्ववङ्गीयानां पश्चिमपाकस्थानदेशजाना-ञ्चार्थिकराजनीतिकसामाजिकादि विविधसमस्यानां चित्रणमुपस्थापितं सूक्ष्मेक्षिकया समासेन। नाटकस्यैकलक्ष्ये सत्यपि प्रधानतयाऽवान्तरलक्ष्याणि प्रासङ्गिकतया स्वत एव समापतन्ति तेष्वनीकजीवनस्य चित्रणमन्यतमं वरीवर्ति प्रस्तुतनाटके यदिदानीन्तन-काव्यकृतिषु प्रायश उपेक्षितं भवति। विरोधिषु न मे द्वेषः पक्षपातो न शासने इति सिद्धान्तस्य षष्ठाङ्कस्य द्वितीयदृश्ये विष्कम्भकद्वितीयभागे चास्यैवान्यत्रापि यत्र तत्र पूर्णतया निर्वाहो विदधता तात्कालिकभारतीयस्थितेः सर्वाङ्गीणं चित्रमुपन्यस्तम्। स्वकीयो दृढनिर्णयश्चापि प्रतिपादितः। नाटकीया भाषा साधारणजनसंवेद्या समाजस्य मनोहारिणी तदन्यथात्वे अभिनेयस्य रचयितुः प्रयोजनफल्गुतैवापतेत्सर्वसमक्षमुद्विग्नता च लोकानां जाजायेत। अत्रत्या भाषा सरला नाटकोपयोगिनी पञ्चनदजनोच्चारिता पंजाबी-भाषेव वाङ्गोच्चारिता च बंगालीभाषेव प्रतिभासते। रूपकस्यास्य भूमिकालेखको डा. श्री सत्यव्रतशास्त्रिमहाभागः स्वकीयानुद्गारानदसीयविषये प्रतिपादयति यत्काव्य-रत्नमिदमाधुनिकसंस्कृतसाहित्यिककृतिषु विविधवैशिष्ठ्यदृष्ठ्या वैरल्यमावहति। संस्कृतपुस्तकालयेषु शिक्षणालयेषु विदुषां ग्रन्थागारेषु च सङ्ग्राह्यकोटिसमावेश्यतया रचयित्रायासो न मोघतामापादनीय उत्साहोऽपि वर्धनीयश्चेत्यैव काङ्क्षति भारतीपरीवारः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसमाचाराः

□ श्री "पद्म" शास्त्री
मुक्तानन्दनगर,
गोपालपुरा रोड़;
जयपुर-१५

भारतीय-भाषाणां सेतुः संस्कृतम्

भारतीय-भाषा-परिषदः तत्वावधाने (कालिकातानगरे) २१-४-८१ दिनाङ्के डा० श्रीधरभास्करवर्णेकरमहोदयानां "संस्कृतं भारतीयवाङ्मयस्य भारतीयभाषाणाञ्च जननी" विषये प्रेरणाप्रदं ज्ञानपूरितञ्च भाषणं श्रुत्वा विभिन्नभाषाभाषिणो मन्त्रमुग्धाः सञ्जाताः। श्रीवर्णेकरमहोदयेन कथितं यत्—संस्कृतभाषा भारतस्य प्राचीनतमा भाषा वर्तते। अस्या भाषायाः लेखकाः पाठकाश्च काश्मीरात् कन्याकुमारीं अटकात्कटकं यावत् प्रसृताः वर्तन्ते। भारतीयभाषासु ८०% प्रतिशतं शब्दाः संस्कृतभाषाया एव मिलन्ति। प्रत्येका-भारतीयभाषा साहित्यविधासु तथा न परिपूर्णा यथा संस्कृतभाषा।

विचारगोष्ठ्यां श्रीवैजापुरकरमहोदयैरपि स्वविचाराः प्रकटिताः,-तैः कथितं साम्प्रतं भारते संस्कृतस्य स्थिति र्न परितोषकरा। विविधेषु विश्वविद्यालयेषु स्नातकोत्तर कक्षासु छात्राणां न्यूनता वर्तते। संस्कृतं प्रति कतिपयजनानामियं भ्रान्ता धारणा तदस्यां भाषायां केवलं धर्म-सम्प्रदायसंबद्धं साहित्यं वर्तते। वस्तुतः संस्कृतस्य व्यापकता द्रष्टुं शक्यते यत्-मराठीभाषाया ज्ञानेश्वरस्य, हिन्दीभाषायाः तुलसीदासस्य बंगभाषाया रवीन्द्रनाथस्य, पंजाबीभाषाया गुरुगोविन्दसिंहस्य साहित्ये-काव्यसंरचनासु च संस्कृतशब्दानां वाहुल्यं वर्तते। परमद्य देशस्य शासकाः संस्कृतस्य महत्त्वमजानन्तो राष्ट्रस्यास्मितां नाशयितुं बद्धपरिकराः दृश्यन्ते।

भारतीय-भाषा-परिषदियं शीघ्रमेव हिन्दीभाषायां चतुः खण्डेषु "संस्कृतसाहित्य कोशः" प्रकाशयितुमुत्सुका। कोशस्य प्रधानसम्पादकाः श्री.भा.वर्णेकरमहोदयाः वर्तन्ते। कोशप्रकाशनस्यास्य प्रारम्भिकीं योजनां निर्मातुमत्र समुपागता विभिन्नभाषाभाषिणो विद्वांसः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गतानां, विद्याभूषण-पं० श्रीगणेशरामशर्मणां सुरभारती सेवा

श्रीकृष्णचन्द्रशर्मा शोधच्छात्रः
संस्कृतविभागे, राजस्थानविश्वविद्यालयः, जयपुरम्

वीरप्रसूता राजस्थानभूमिः समये-समये अनेकान्नृपान् महापुरुषान्सुरभारतीसमुपासकान्समुत्पाद्य लोककल्याणस्य मार्गं प्रशस्तमकरोत्। अस्यां पुण्यभूम्यां यत्र महाराणाप्रताप-फर्जन्देदौलत मिर्जाराजमानसिंह-प्रथम हिन्दू सम्राट् पृथ्वीराजचौहानसदृशाः विश्वविख्याताः नरेशाः समुत्पन्ना बभूवुः तत्र वीणापाण्याः भगवत्याः सरस्वत्याः समुपासकः महाकविः माघसदृशा अनेकशः देदीप्यमाननक्षत्राणां संस्कृतसाहित्ये प्रादुर्भावः जातः। तस्मिन्नेव परम्परायां संस्कृतं संस्कृतिश्चैव श्रेयसे समुपास्यतामित्युक्तेः प्रबल समर्थकानां वेद-दर्शन-आयुर्वेद-ज्योतिष-अलंकारशास्त्रेत्यादि विविधविद्यापारंगतानां, आधुनिकगद्यकारेषु प्रतिनिधि-भूतानां, साहित्य सर्जकानां, डूंगरपुरवास्तव्यानां, वीणापाण्याः भगवत्याः सरस्वत्याः समुपासकानां स्वर्गतानां विद्याभूषण पं० गणेशरामशर्मणां नाम को न जानाति सुरभारतीसमुपासकः साहित्यरसिकः। श्रीमतां पंचद्राविड़, ब्राह्मणश्रेष्ठानां राज्यपंडितपदवीभाजां श्री कोदरलालशर्ममहाभागानां गृहे अष्टाधिकैकोनविंशतितारिकायां जनिरभूत्। बाल्यकालादेव सर्वविधसुलभसाधनैः सर्वसौख्येन श्रीमतांस्वभाव-उद्दण्डो जातः। अष्टमवर्षस्यावस्थायां एते ज्योतिर्विद्सान्निध्ये ज्योतिषशास्त्रस्याऽऽध्ययनार्थं संप्रेषिताः तु एतेषां तत्र सम्यग्रूपेण अध्ययनं न चचाल। सुखसुविधायाराधिक्येन तेषामध्ययनक्रमः पितृस्वषागृहेऽपि सुचारुरूपेण न जातम्। परिणयानन्तरं राज्यशासनात् छात्रवर्त्ति लब्ध्वा जयपुरीये महाराजसंस्कृतकालेजे उच्चशिक्षाप्राप्त्यर्थं प्रविष्टो जातः। तत्र तैः महाभागैः संस्कृतहिन्दीसाहित्यस्य ज्योतिषशास्त्रस्य चाध्ययनं सम्यग् कृतम्। अपरा काशीति ख्याते जयपुरनगरे तेभ्यः महामहोपाध्याय श्रीमधुसूदन ओझा-सर्वशास्त्रपारङ्गत महामहोपाध्याय श्रीदुर्गाप्रसाद द्विवेदी-आयुर्वेदमार्तण्ड श्रीलक्ष्मीराम स्वामी-वैयाकरणप्रवर श्रीवीरेश्वर शास्त्री-ज्योतिषाचार्य श्रीदुर्गादत्तशर्मा—कविशिरोमणि भट्ट श्रीमथुरानाथशास्त्रीत्यादि महाभागानां श्रीचरणानां सुलभसान्निध्यं प्राप्तमभूत्।

अनेन प्रकारेण विविधशास्त्रविचक्षणविदुषामनुग्रहेण स्वल्पकाले एव ज्योतिषव्याकरण आयुर्वेद-साहित्य - तन्त्रमन्त्रेत्यादि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्राणामध्ययनं कृत्वा पूर्णविदग्धता समासादिता। पारिवारिकपरिस्थितिवशात्, कौटुम्बिकभारवशाच्च, सैः डूंगरपुरनगर-स्थित–महारावल–माध्यमिक – पाठशालायां अध्यापकपदं स्वीकृतम्। अष्टविंशत्यधिकै कोनविंशतिशततमख्रिष्टाब्दात् अष्टचत्वारिंशदधिक एकोनविंशतिशततमे ईसवीयपर्यन्तं तैः समस्तराज्यकार्याणां सम्पादनं सुचारुरूपेण विहितम्। १९४७ तमे वर्षे तेषां पूज्यपितृचरणा श्रीकोदरलालशर्ममहाभागा अपि गोलोकपथिकां जाता। स्वाधीनता प्राप्त्यनन्तरं तेषां राज्याश्रयमपि समाप्तम्, एवञ्च राजेन्द्रइण्टरकालेजाख्ये झालावाड़-स्थितमहाविद्यालये हिन्दी-संस्कृताध्यापक-रूपे स्थानान्तरं कृतं राज्यसर्वकारेण। तत्राष्टादशवर्षपर्यन्तं अध्यापनकार्यं कृत्वा षष्ठ-षष्ठ्यधिक एकोनविंशतिशततमे वर्षे जुलाई-मासस्य प्रथम तारिकायां राज्यसेवातः-विश्रामग्रहणं कृतम्।

तत्कालात् वीणापाण्याः भगवत्याः सरस्वत्याः समुपासमानाः संस्कृतवाङ्मयस्य सर्वासु विधासु स्वरचनाभिः वृद्धिं प्रकुर्वताः सुरभारतीः प्रति स्वजीवनं समर्पयता ७२तमे वर्षे ईसवीये १९८० वर्षे जनवरीमासस्य सप्तदशतारिकायां सुरलोकपथिकाः जाता। ईसवीये १९२७ तमवर्षात् १९८० वर्षं यावत् चतुः पञ्चाशत् वर्षपर्यन्तं देववाण्याः स्तवनं विहितम् तैः। जीवनपर्यन्तं तेषा मभिव्यक्तिमाध्यमः देववाणी संस्कृतमासीत्। देववाण्या अतिरिक्तं इमे महाभागाः हिन्दी-गुजराती - बंग - उर्दू - आंग्ल - मराठीत्यादि भाषाणां अत्यन्तश्रेष्ठज्ञाता आसीत्।

स्वजीवने श्रीशर्ममहाभागैः वाङ्मयस्य सर्वासु विधासु रचनाः कृताः। तेषां लेखिन्याः प्रसारः कविता - कहानी - लेख - उपन्यासादि-साहित्यस्यविधासु सर्वत्र समरूपेण दरीदृश्यते। अद्यावधि तेषां प्रकाशिता प्रकाशितानां रचनानां संकलनं क्रियेत्तर्हि सहस्रपृष्ठानां वृहदाकारप्रबन्धो भवितुं शक्यते।

तेषां वैदुष्यं परिलक्ष्य नैकशः साहित्य-समाजसेवीभिः संस्थाभिः मानद-उपाधिभिः स्वर्णपदकैश्च सम्मानं कृतम्। प्राप्तोपाधि-ष्वधोलिखिता उल्लेखनीयाः—

१. बाबा ज्ञानानन्दस्य संस्थायाः "भारतधर्म-महामंडलेन" ईसवीये १९५०-५१ तमे ख्रिष्टाब्दे "विद्याभूषण" इत्युपाधिना सम्मानं विहितम्।
२. सर्वश्रेष्ठलेखनेन प्रभावितो भूत्वा "अखिल भारतीय संस्कृत साहित्य सम्मेलन कमलानगर-देहलीतः" एकादशाधिक द्विसहस्रतमे विक्रमाब्दे 'स्वर्णपदकेन' सम्मानितम्।
३. नेहरुमहाभागानां प्रेरणया डॉ. राधा कृष्णन् महाभागानां तत्त्वावधाने षोडश भाषाणां एकैकसमित्याः गठनमभूत्, तत्र संस्कृतसमितिद्वारा एषा प्रसिद्धा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'वन्दे सुरभारती' कविता भारतीपत्रिकायां प्रकाशिता जाता।

श्री शर्ममहाभागानां रचनानां विवरणमधोलिखितप्रकारेण प्रस्तोतुं शक्यते-

१—आशिः कुसुमाञ्जलिः–१०० श्लोकानां पुस्तिका (१९३९ तमे वर्षे निष्काम प्रेस मेरठतः प्रकाशितः)

२—देवी स्तुतिः (दुर्गासप्तशत्याः चतुर्थाध्यायस्य हिन्दीरूपान्तरम्) (१९४० तमे वर्षे निष्काम प्रेस मेरठतः प्रकाशिता)

३—सुशीलोद्वाहमंगलम्–लाक्ष्मणीप्रशस्तिः–१०० श्लोकाः सार्थाः (१९४१ तमे वर्षे निष्काम प्रेस मेरठतः प्रकाशितम्)

४—मोहनाभ्युदयम् (सन्यासी) रावराज्ञः राजगुरोः अभिनन्दनस्यावसरे (१९४१ तमे वर्षे निष्काम प्रेस मेरठतः प्रकाशितम्)

५—लक्ष्मणाभ्युदयम् (काव्य) हिन्दीव्याख्योपेतम् (१९४५ तमे वर्षे निष्काम प्रेस मेरठतः प्रकाशितम्)

६—श्रीमहारावलरजतजयन्ती—अभिनन्दन ग्रंथस्य त्रियभाषासु सम्पादनं विहितम् (हिन्दी, संस्कृत, अंग्रेजी) (१९५० तमे वर्षे इण्डियन प्रेस इलाहाबादात् प्रकाशितम्) (क्रमशः)

जगद्गुरु भारत की मान्यता

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मति र्मम ।।

योगिराज श्रीकृष्ण

शुभकामनाओं सहित

श्री बजरंग दाल एवं तेल मिल

गोवर्धनपुरा, कोटा (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशवार्ता–

मंगलप्रसाद गुप्तः,
६६/१८१ कछियाना,
कानपुर । २०८००१

असमासमविवाद-समीक्षा

असमराज्यव्याप्तायाः विषमसमस्यायाः समाधाने तद्राज्यमन्त्रिमण्डलस्य पराजिते, तत्रत्य राज्यपालमहोदयस्य अध्यादेशेन विधानसभायाः स्थगनस्य, आयव्ययलेखापत्रस्य स्वीकृतेः च किमप्यौचित्यं न दरीदृश्यते, यदि किंचिदपि औचित्यमभविष्यत् अवश्यमेव तद्राज्यपालमहोदयेन प्रकाशितमभविष्यत् ।

स्वपक्षदलदृष्टचा एतत्प्रश्नविषये विचारका नूनं कथयिष्यन्ति यदध्यादेशस्य षण्मासावधौ सत्तारूढ़दलस्य पुनः संघटनाय प्रयत्नः सम्विधास्यते । प्रयत्नस्यास्य विरोधोऽपि भविष्यति, संघर्षोऽपि भवितुमर्हति । सर्वस्यास्य कः परिणामो भविष्यति ? इति चिन्तनीयं,–यद्यस्मिन्कार्यविधौ पक्षपरिवर्तनभ्रष्टाचारयोरेव महत्त्वमवर्तत, तर्हि नेदं देशस्य प्रदेशस्य वा कल्याणाय भविष्यति, न च इन्दिराकांग्रेसदलस्य हिताय भविष्यति ।

एवं सति तथ्यद्वयोः विवादोऽवश्यमेव समुद्गमिष्यति,–इत्यनुभूयते च, यच्छ्रीमती इन्दिरामहोदया स्वदलाभ्यन्तरे वाह्ये चोभयत्र स्वनेतृत्वप्रभावप्रदर्शने असाफल्यमलभत । अनेनेति प्रतीयते यत्तस्याः संघजना अपि सोत्साहममु समर्थयितु नेच्छन्ति । अपितु नेतृत्वपरिवर्तनमिच्छन्ति । किन्त्वस्मै प्रयोजनाय ते केन्द्रनेतृमण्डलस्य स्वीकृतिं नाप्नुवन्ति, अतो यदि केन्द्रीयनेतृमण्डलस्य इयमेव नीतिर्वर्तते तदा असमप्रदेशे महासभाया (कांग्रेसस्य) अवशिष्टोऽपि प्रभावो विनङ्क्ष्यति इति प्रथमस्तथ्यः ।

यदि श्रीमती इन्दिरामहोदयया सह असमराज्यराज्यपालमहोदयमुख्यामात्यमहोदयइन्दिरामहासभायाश्च तत्रत्य नेतारो मिलित्वाऽपि प्रयत्नं कुर्वन्तः, असमस्याहिंसात्मकमान्दोलनं निग्रहीतु नाशक्नुवन् । यद्यस्मिन् प्रयत्ने इमे महानुभावाः किञ्चिदपि साफल्यमवेदिष्यन् तर्हि प्रतिपक्षजनाः अवश्यमेव इमान् अभ्यनन्दिष्यन्, सहानुभूतिञ्च प्रदर्शयन्तः श्रेयोऽपि प्राददिष्यन् ।

अतो विद्यमानपरिस्थितौ श्रीमती इन्दिरामहाभागायाः इदं कर्तव्यं भवेत्, यत्स्वकीयायां कार्यप्रणाल्यां एवंविधपरिवर्तनमानयेत् येन प्रत्येकवर्गे आस्थाविश्वासनिष्ठानां जागरणमभ्यजायत । तदेव असमविषमविवादनिर्णयः समस्यायाः समाधानं च सम्भविष्यति इति द्वितीयस्तथ्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिक्लेशेन ये अर्थाः धर्मस्यातिक्रमेण वा ।
अरेर्वा प्रणिपातेन मा स्म तेषु मनः कृथाः ।।

—विदुर नीति

जो धन अत्यन्त क्लेश उठाने से, धर्म का उल्लंघन करने से अथवा शत्रु के सामने सिर झुकाने से प्राप्त होता हो, उसमें आप मन न लगाइए ।

संतन को कहाँ सीकरी❀ सो काम ।
आवत-जात पन्हैया टूटी, बिसर गयो हरिनाम ।।
जिनको मुंह देखे दुःख उपजत, तिनको करिबै परी सलाम ।।

—संत कुम्भनदास

❀ सीकरी-आगरा के निकट तत्कालीन मुगल राजधानी

एकं शास्त्रं देवकीपुत्रगीतमेको देवो देवकीपुत्र एव ।
मन्त्रोऽप्येकस्तस्य नामानि यानि-कर्माप्येकं तस्य देवस्य सेवा ।

अर्थात् (१) भगवान देवकी नन्दन कृष्ण द्वारा गाई गीता ही मुख्य शास्त्र है । (२) वही देवकी नन्दन भगवान कृष्ण एकमात्र देव हैं (३) उनके जितने नाम हैं वे ही मुख्य मन्त्र हैं (४) उनकी सेवा ही एक मात्र कर्म है ।

—महाप्रभु वल्लभाचार्य

आसिन्धुः सिन्धुपर्यन्ता-यस्य भारतभूमिका ।
पुण्यभूः, पितृभूश्चैव-स वै हिन्दुरिति स्मृतः ।।

—वीर सावरकर

सिन्धु महानद से लेकर सागर पर्यन्त इस भारत की भूमि को जो व्यक्ति अपनी पुण्यभूमि और पितृभूमि स्वीकार करता है, वही "हिन्दू" है ।

"पर उपदेश कुशल बहुतेरे,
जे आचरहिं ते नर न घनेरे"

—गोस्वामी तुलसीदासजी

वह मुसाफिर क्या जिसे कुछ शूल ही पथ से थका दें ?
हौसला वह क्या जिसे कुछ मुश्किलें पीछे हटा दें ?

—अज्ञात

पंजाबी चन्दू हलवाई करांचीवाला

कार्यालयः—१८५, बालकेश्वर रोड, तीनबत्ती, बम्बई—४०००0६

स्थापना—१८९६ शाखायें :— तारका पताः—'चन्दूमेवा'

(१) जवेरी बाजार (२) ग्रान्टरोड (३) कोलावा (४) दादरा (५) वरली नका (६) सायन सर्कल (७) ठाकुरद्वार (८) सूर्योदयस्टोर्स, चर्चगेट (९) घाटकोपर (पश्चिम) (१०) लिंकिंग रोड, (११) रेलवे स्टेशन के सामने, सांताक्रुज (पश्चिम)

कारखाना :—चन्दू भवन, ग्रान्टरोड, बम्बई-४०००७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगिनी लघुकथा

३६–नारिकेल-कृषिः [फिजीद्वीपस्य श्रेष्ठकथा]

श्री "पद्म" शास्त्री
१२८ मुक्तानन्दनगर, गोपालपुरारोड, जयपुरम्-१५

एकदा कैलासवासी भगवान् शिवश्चाम्बया पार्वत्या सह समुद्रयात्रां कुर्वन् लोमोलोमोद्वीपमनुप्राप्तः। द्वावेव द्वीपतटे विहरन्तावास्ताम्। द्वीपेऽस्मिन् कश्चिदनाथो युवको न्यवसत् तिमोदीनामकः। सोऽतीव निर्धनश्चासीत्। समुद्रात्मत्स्यानानीय पर्वतेभ्यः कन्दमूलफलान्यादाय स स्वोदरं प्रपूरयति स्म। तिमोदी गभीरे समुद्रे महता कौशलेन नावमचालयत्। फिजीद्वीपस्य नैकोऽपि नाविको नावसञ्चालने तत्समः। एकदा केनचिद् धनिकनाविकेन सह तत्परिचयः सञ्जातः। धनिकनाविकोऽपि गर्वान्वितस्तिमोदीनाविकं पराजेतुं चिचेष्ट। तेन कथितम्—अस्माद्वीपात्स्वनावा सार्द्धं वीतीलेबूद्वीपं यः पूर्वं प्राप्स्यति स एव विजेता गण्यते चान्यथा विजयिने स्वहस्तौ अघमर्णरूपे स्थापयित्वा दशनावः प्रदातव्याः। द्वावेव

एक बार कैलाशवासी शिव मातापार्वती के साथ समुद्रयात्रा करते हुए लोमोलोमो द्वीप में पहुँचे। वे दोनों द्वीप के किनारे घूम रहे थे। इस द्वीप में तिमोदी नामक एक अनाथ युवक रहता था। वह बहुत ही निर्धन था। समुद्र से मछलियां पकड़कर तथा पर्वतों से कन्दमूल फल लाकर वह अपना पेट भरता था। तिमोदी गहरे समुद्र में बड़ी कुशलता से अपनी नाव चलाता था। फिजी द्वीप का एक भी नाविक उसके समान नाव नहीं चला सकता था। एक बार किसी धनी नाविक के साथ उसका परिचय हुआ। अभिमानी धनी नाविक तिमोदी को पराजित करना चाहता था। उसने कहा—अपनी नाव के साथ, इस द्वीप से वीतीलेवू द्वीप तक जो पहले पहुँच जायेगा उसे विजेता गिना जायेगा। जो हारेगा उसे अपने हाथ जीतने वाले के पास अमानत के रूप में रखने होंगे और दस नावें देनी होंगी। उन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्कृते दिवसं कालञ्च निर्धारितवन्तौ ।

निश्चिते दिवसे नाविकौ स्वस्वनावं संयोज्य विजययात्रां प्रारभताम् । किञ्चित्कालानन्तरं सागरे झटिति महावातः प्राचकटत् । दैवदुर्विपाकात् सागरे झटिति महावातः प्राचकटत् । दैवदुर्विपाकात् तिमोदीयुवकस्य नौः समुद्रजले न्यमज्जयत् । यावत्स नावं पुनः संयोजयति तावद्धनिकनाविकः सुदूरं प्रायात् विजयी च बभूव । पराजितस्तिमोदी पूर्वंप्रतिज्ञातं सर्वं स्वीचकार । चिन्ताग्रस्तस्तिमोदी गृहान्निर्गतः । हस्ताभ्यां विना मत्स्यानपि ग्रहीतुं स नाशक्नोत् कन्दमूलफलान्यप्यानेतुम् । बुभुक्षितस्य तस्य चत्वारि दिनानि व्यतीतानि । पञ्चमे दिनेऽपि स अरण्यरोदनमिव कुर्वन्नितस्ततो विचचार । अधुना स चलितुमपि न शशाक । एकस्य वृक्षस्याधः समुपविश्य प्रोच्चैः रोदितुमारब्धः ।

इतो द्वीपतटे विहरन्तौ चार्द्धनारीश्वरौ तदरण्यमनुप्राप्तौ । कस्यापि रोदनध्वनिमाकर्ण्य पार्वती शिवं तत्र गन्तुमप्रार्थयत् किन्तु भगवान् भूतनाथ अनाथस्य करुणरोदनेनापि न द्रवी-

दोनों ने इसके लिए दिन तथा समय भी निश्चित कर लिया ।

निश्चित दिन आने पर दोनों नाविकों ने अपनी अपनी नाव के साथ विजय यात्रा आरम्भ कर दी । कुछ समय बाद समुद्र में शीघ्र ही आंधी आ गई । बुरे भाग्य के कारण तिमोदी की नाव समुद्र के जल में डूब गई । जब वह नाव को पुनः जोड़ता है तब तक धनी नाविक बहुत दूर निकल जाता है और विजयी हो जाता है । हार कर तिमोदी ने पहले की सभी शर्तें स्वीकार कर लीं । चिन्ता में डूबा हुआ तिमोदी घर से निकल पड़ा । अब वह हाथों के बिना मछलियां भी नहीं पकड़ सकता था और कन्दमूल फल भी नहीं ला सकता था । भूख से तड़पते उसे ४ दिन हो गये । पांचवें दिन भी वह अरण्यरोदन सा करता हुआ इधर उधर घूम रहा था । अब वह चल भी नहीं सकता था । वह किसी वृक्ष के नीचे बैठ कर ऊँचे स्वर में रो रहा था ।

इधर द्वीप के किनारे घूमते हुए शिव-पार्वती भी उस वन में पहुँचे । किसी की रोने की आवाज सुनकर पार्वती ने शिव को वहां चलने को कहा किन्तु भगवान् शिव अनाथ के करुण-रोदन से भी द्रवित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूतः। पुनः पुनः करुणारोदनध्वनिं निशम्य द्रवीभूता पार्वती महताग्रहेण शिवं तत्र प्रापयामास यत्र तिमोदी रुरोद। तिमोदीदशां विलोक्य भूतनाथः प्रोवाच—वत्स क्व गतौ तव हस्तौ, कथञ्च विलपसि? तिमोदी सर्वां घटनामश्रावयत्।

नहीं हुए। बार बार रोने की आवाज सुनकर पार्वती द्रवित हुई और आग्रह-पूर्वक शिव को वहां ले गई जहां तिमोदी रो रहा था। तिमोदी की हालत देखकर शिव ने कहा वत्स! तुम्हारे हाथ कहां गये और तुम क्यों विलाप कर रहे हो?। तिमोदी ने सारी घटना शिव को सुनाई।

सर्वं वृत्तान्तजातं निशम्य शिवोऽपि करुणावशाच्चकम्पे। शिवः स्वमायया तत्र झञ्झावातेन फलान्याविरकरोत्, भूमौ स्वपादप्रहारमात्रेण जलधारां विस्फोरयामास। निर्मलां शीतलां जलधारां विविधफलानि च विलोक्य तिमोदी हर्षान्ननर्त शिवं प्रति स्वभावभक्तिश्च प्रादर्शयत्।

सारा वृत्तान्त सुनकर शिव भी करुणावश काँप उठे। शिव ने अपनी माया से आँधी चलाकर वहां बहुत से फल प्रकट कर दिये, जमीन में पैर मारने से जलधारा उत्पन्न कर दी। निर्मल, शीतल-जलधारा तथा अनेक प्रकार के फलों को देखकर तिमोदी हर्ष से नाच उठा। शिव के प्रति उसने भावभक्ति प्रदर्शित की।

अर्द्धनारीश्वरौ तस्मान्निर्गतौ परं तिमोदी तस्य वृक्षस्याधः शिवस्य भक्तिं प्रकुर्वन् समाधिस्थः सञ्जातः। किञ्चित्कालान्तरं पार्वत्या सह शिवः पुन स्तदरण्यमागतः। वृक्षाधस्ताद् ध्यानमग्नं तिमोदीञ्चापश्यत्। स्वदर्शनेन भगवान् शिवः स्वभक्तं तिमोदीं कृतार्थमकरोत्। शिवो भक्तं तिमोदीं प्रत्यबोधयत् यत् त्वं ईदृग् फलानां कृषिं कुरु येषु जलं फलमपि सहैव उत्पद्येत। आश्चर्यचकितः तिमोदी भगवन्तं पप्र-

शिव-पार्वती वहां से निकल पड़े परन्तु तिमोदी उस वृक्ष के नीचे शिव की भक्ति करता हुआ समाधिस्थ हो गया। कुछ समय बाद पार्वती के साथ शिव भी उस जंगल में पहुँचे और उन्होंने वृक्ष के नीचे ध्यानमग्न-तिमोदी को देखा। शिव ने दर्शन देकर भक्त-तिमोदी को कृतार्थ कर दिया। शिव ने अपने भक्त तिमोदी को आदेश दिया कि तुम ऐसे फलों की खेती करो जिनमें जल तथा फल साथ ही उत्पन्न हों। आश्चर्य में पड़े हुए तिमोदी ने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्छ–विभोः ! किन्नाम तस्य वृक्षस्य ? हस्ताभ्यां वृषभाभ्यां च विना कथमहं तेषां वृक्षाणां कृषिं कर्तुं समर्थो–भविता ? ।

आशुतोषः शिवः–चिन्तां मा कुरु वत्स ! सर्वं सुष्ठु भविष्यति, इति कथयित्वा पार्वत्या सह शिवस्तु चान्त-र्दधौ । शिवः कैलासमनुप्राप्य स्वसुतं गणनायकं-गणेशमादिदेश, वत्स ! ग-च्छ केरलप्रदेशं, तस्मान्नारिकेलफलं नीत्वा, फिजीद्वीपस्थं भक्तप्रवरं तिमोदीं नारिकेलकृषिविषये निर्दिश्य शीघ्रं समागच्छ ।

"आज्ञा भवदीया शिरोधार्या" इत्युक्त्वा पितरं प्रणम्य गणपति स्त-स्यां दिशि प्रतस्थे यत्र तिमोदी तपस्त-प्तुमारभत । विनयान्वितस्तिमोदी ग-णेशं पौनःपुन्येन नमश्चक्रे । शिवपुत्रो गणेशः तिमोदीं नारिकेलफलवपनवि-धिमुपदिश्य स्वकैलासधाम्नि प्रत्याज-गाम । तिमोदी एकस्मान्नारिकेलफला-दनेकानि फलानि समुत्पादयाञ्चकार । शनैः शनैः प्रशान्तमहासागरस्य सर्वेषु द्वीपेषु फलस्यास्य कृषी वितस्तार । तिमोदी फलानि विक्रीय विक्रीय पृथुलं धनमपि समुपार्जयामास । तेन धनेन

भगवान को पूछा–भगवन् ! उस वृक्ष का नाम क्या है । हाथ और बैलों के बिना मैं उन वृक्षों की खेती कैसे कर सकता हूं ? ।

आशुतोष शिव ने कहा–वत्स ! चिन्ता मत करो, सब ठीक हो जायेगा । ऐसा कह कर शिव-पार्वती अन्तर्ध्यान हो गये । शिव ने कैलाश पहुँच कर अपने पुत्र गणेश को आदेश दिया कि हे पुत्र ! केरल प्रदेश में जाओ, वहां से नारियल का फल लेकर, फिजी द्वीप में रहने वाले भक्तप्रवर-तिमोदी को नारियल के कृषि के बारे में निर्देश देकर शीघ्र यहां आ जाओ ।

"आपकी आज्ञा शिरोधार्य है" ऐसा कहकर पिता को प्रणाम करके गणेश उस दिशा की ओर चल पड़े जहां तिमोदी तपस्या कर रहा था । नम्रता से युक्त तिमोदी ने गणेश जी को बार बार नमस्कार किया । शिव के पुत्र गणेश ने तिमोदी को नारियल बोने की विधि बतलाई और कैलाश की ओर लौट पड़े । तिमोदी ने एक नारियल के फल से अनेक नारियल पैदा किये । धीरे-धीरे प्रशान्त-महासागर के सभी द्वीपों में इस फल की खेती का विस्तार किया । तिमोदी ने नारियल के फल बेचकर बहुत धन भी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स धनिकनाविकस्य नावः प्रत्यावर्तयत्। विवाहञ्च कृत्वा सुखेन स्वकालं यापयामास।

कमाया। उस धन से उसने धनी-नाविक की नावें भी लौटा दीं। अपना विवाह भी किया तथा सुखपूर्वक रहने लगा।

कथ्यते तत् शिवः त्रिनेत्रधारी वर्तते। अनेनैव नारिकेलफलेष्वपि त्रीणि नेत्राणि भवन्ति तथा शिवशिरसि जटावत् फलेऽस्मिन् सटाः समुत्पद्यन्ते। गणपतिः कर्कटमारुह्य तिमोदी समीपं गतश्चास्मात्कारणात् सर्वेषु कर्कटपृष्ठेषु गणेशस्य प्रतिमूर्ति विराजते, इति फिजीद्वीपवासिनां विश्वासः।

यह कहा जाता है कि शिव के तीन नेत्र हैं इसीलिए तो नारियल के भी तीन नेत्र होते हैं तथा शिव के सिर की जटाओं की तरह नारियल में भी जटाएँ होती हैं। गणेश जी केकड़े में बैठकर तिमोदी के पास गये थे इस कारण सभी केकड़ों की पीठ पर गणेश जी की मूर्ति विराजमान है-फिजी द्वीप वालों का ऐसा विश्वास है।

अरुणा उद्योग

माइन आनर्स, रेंजिग कोन्ट्रेक्टर्स ट्रांसपोर्ट्स

वैंकर्स एण्ड कमीशन एजेन्ट्स

दूरभाष : ७३६२६

ग्राम अरुण उद्योग

हैड आफिस :

श्री राम भवन

किशनपोल बाजार, जयपुर–१

ब्रांच आफिस :

गांधी मार्ग, भद्रक (उडीसा)

स्टेशन मार्ग के सामने, जे० के० रोड़

(उडीसा)

वर्किंग एट :

बाउला क्रोमाइट माइन्स एट : धानपुर जैपुर, जिला के उनझर (उडीसा)

केथपाल क्रोमाइट लाइन्स एट: बिरसल जिला धेनकानाल (उडीसा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारी-स्तम्भः

विलक्षणप्रतिभासमन्विता नेत्रहीना-विदुषी

डा० उषा भालेरावमहाभागा

डॉक्टर श्रीमती श्रीराजेश्वरीभट्टः

लालबहादुर शास्त्री कालेज, जयपुरम्

संयुक्तराष्ट्रसंघेन घोषितोऽयं १९८१ तमो वर्षो विकलाङ्गवर्षः। अस्येदमुद्देश्यं यत् विश्वस्य विकलाङ्गानां हितं भवेत्। भारते विकलाङ्गानां संख्या कोटिद्वयमिता वर्तते तेष्वपि नेत्रहीनानां संख्या अशीतिलक्षाधिका विद्यते।

उज्जयिन्याः सेवानिवृत्ताचार्यस्य श्रीभालेरावमहाभागस्य प्रतिभासम्पन्नायाः सुपुत्र्याः कुमारी उषायाश्चित्रं चरितञ्चानायासमेवास्माकं ध्यानमावर्जयति। स्व प्रतिभायाः बलेन उषा भालेरावमहाभागया संगीतविषयमवलम्ब्य एम. ए. परीक्षा समुत्तीर्णा। समाजशास्त्रेऽपि एम. ए. परीक्षां सा प्रथमश्रेण्यामुदतीतरत्। भारतस्य नेत्रहीनमहिलासु सा प्रथमं स्थानं भजते यया पी. एच. डी. उपाधिरपि लब्धः। को नाम न जानाति यदन्ताराष्ट्रीयमहिलावर्षे यूगोस्लावियादेशस्य राजधान्यां बैलग्रेडनाम्निनगरे डॉ० उषा भालेराव भारतीयमहिलानां प्रतिनिधित्वञ्चकार।

१९४० ईसवीये मध्यप्रदेशस्य शानापुरनाम्नि प्रान्ते उषा जनिमलभत। उषा यदा सार्धैकवर्षीया आसीत् तदा ट्रैकोमा नामकनेत्ररोगेण ग्रस्ता समुचितोपचारं विना नेत्रज्योतिषा व्ययुज्यत। बाल्यादेव उषा सुन्दरी, चञ्चला चासीत्। अध्ययने क्रीडासु च तस्या अभिरुचिरवर्तत। सहोदराणां मुखात् श्रुत्वा विविधाः कथाः, श्लोकान् गणितादि विषयस्य प्रश्नान् सा सहजतया आत्मसादकरोत्। उषाया जनकेन श्री भालेरावमहोदयेना सन्नवर्तिनि एकस्मिन् विद्यालये तस्यै प्रवेशः दापितः। किन्तु भाग्यस्य वैपरीत्यतया सा विद्यालयान्निष्कासिता तत्रत्यप्रधानाध्यापकेन।

गृहे सा सवयस्याभिः सह क्रीडितुमैच्छत् ताभिश्च सह वार्तालापं कर्तुमियेष परमन्धत्वस्याभिशापात् सा यथाकथञ्चित् कालयापनं व्यधात्। भालेरावमहोदयेन स्वयं ब्रेललिप्या अध्ययनं कृतम् तां च शिक्षितामकरोत्। क्रमशः सा माध्यमिक परीक्षा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

स्वभावोऽयं महात्मनाम्

डॉक्टर श्रीगङ्गाधरभट्टः
सह-आचार्य, संस्कृतविभागे, राजस्थानविश्वविद्यालयः, जयपुरम्

(१)

परुषञ्च न भाषन्ते सदा सन्तो द्विजप्रियाः ।
न्यायोपेता गुणोपेता सर्वलोक-हितैषिणः ।

महाभारत वनपर्व अ० २०७ श्लोक ८५

आत्मज्ञान में लीन ब्राह्मण जिन्हें प्रिय हैं ऐसे सज्जन पुरुष कभी कठोर वाणी का प्रयोग नहीं करते। वे सदा न्याय से युक्त, गुण गण मण्डित एवं समस्त लोक के हित साधन में निरत रहते हैं।

मुत्तीर्णवती। माधवमहाविद्यालये च नियमितरूपेणाध्ययनं कृत्वा बी. ए. परीक्षां सा समुदतीतरत्। तदनन्तरं सान्ध्यशालासु संगीतविषयकं ज्ञानन्तया लब्धम्। एवं क्रमेण सा प्रयागस्थसंगीतसमित्या समायोजितायां संगीतविषये एम. ए. परीक्षायां साफल्यमधिगतवती। समाजशास्त्रे एम. ए. परीक्षां पी. एच. डी. उपाधिञ्च सा प्राप्तवती। पी. एच. डी. उपाधये तस्याः शोधविषय आसीत्—'मध्यप्रदेशस्य प्रमुखनगरीय नेत्रहीनानां समस्या-एकं सर्वेक्षणम्" । उषायामदम्य उत्साहो वर्तते स्फूर्तिश्च सर्वतः ओतप्रोता। सा किमपि कार्यं कर्तुं वाञ्छति। एतावता श्रमेणापि सा न किमप्यर्जितवती। पितुराश्रयवर्तिनी सा स्वीयं जीवनं यापयति।

तस्याः शोध-प्रबन्धस्य सर्वैरेव प्रशंसा क्रियते। तस्याः प्रतिभायाश्च सर्वत्र चर्चा-विधीयते। नारीसमाजस्य महदिदं गौरवं यत्सत्यपि अन्धत्वे सा ज्ञानस्य क्षेत्रे चमत्कृतिं विहितवती।

प्रशस्यो भालेरावस्तस्याः पिता सा च प्रशंसामर्हति सर्वतोभावेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. 1379/51
R. J. No. 2617
Licence No. PP. 9.
Licence to Post
Without
Prepayment

(२)

विवेकः सह सम्पत्त्या विनयो विद्यया सह ।
प्रभुत्वं प्रभवोपेतं चिह्नमेतन्महात्मनाम् ।

सुभाषितरत्नभाण्डागार

धन धान्य सम्पत्ति के साथ विवेकशीलता, विद्या के साथ विनम्रता एवं विनय और प्रभता के साथ परहित चिन्तन-ये महात्माओं के लक्षण हैं ।

(३)

न स्मरन्त्यपराद्धानि स्मरन्ति सुकृतान्यपि ।
असम्भिन्नार्य—मर्यादाः साधवः पुरुषोत्तमाः ।

महाभारत आदिपर्व अ. १२ श्लो० २

सज्जन लोग अपराधों का स्मरण न कर दूसरों के द्वारा किये गये उपकारों का ही स्मरण करते हैं । वे कभी मर्यादा का उल्लंघन नहीं करते तथा पुरुषों में उत्तम स्वभाव वाले होते हैं । अन्य व्यक्तियों द्वारा किये हुए अपकारों को वे भुला देते हैं परन्तु उनके द्वारा किये हुए उपकार वे कभी नहीं भूलते ।

(४)

वित्ते त्यागः क्षमा शक्तौ दुःखे दैन्यविहीनता ।
निर्दम्भता सदाचारे स्वभावोऽयं महात्मनाम् ।

धन होने पर त्याग, सामर्थ्य में क्षमा, दुःख में दीनता का अभाव, सदाचार में छल-छिद्र-कपट न रखना—यह महात्माओं का स्वभाव होता है । उनका धन दान देने के लिए होता है पराक्रम रक्षा करने के लिए तथा क्षमा करने के लिए होता है । दुःख की अवस्था में वे कभी दीन नहीं होते और व्यवहार में दम्भ अथवा अहंकार नहीं दिखाई देता । □ □ □

प्रकाशकः—संस्कृत प्रचार परिषद् राजस्थान,
पता—भारती भवन, बी. १५ न्यू कालोनी, जयपुर-३०२००१ । दूरभाष-७५४९६
राधेश्याम द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित । दूरभाष-६१७६७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृत-मासपत्रिकाया



स्तकालय
काँगड़ी

वर्षम् ३१

ज्येष्ठः

अङ्कः ८

जूनः

१९८१

तिकं चेतयन् चित्रं
रणे भीम इवापरः ।
हाराणा प्रतापोऽयं
देशभक्तः प्रणम्यताम् ॥

—श्रीरामगोपालशास्त्री, जयपुरम्

वार्षिकमूल्यम् पञ्चदशमुद्राः १५.०

एकप्रतेः—सार्धैकं रूप्यकम् १.५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आन्ध्र-उत्तरप्रदेश-
बिहार-पञ्चनद-सर्वकारैः स्वीकृता

विषय-सूची

क्र.सं	विषयाः	निबन्धारः	पृष्ठ-संख्या
१.	मङ्गलम्	श्रीरामगोपालशास्त्री, जयपुरम्	२७१
२.	मासावतरणम्	" " "	२७१
३.	सम्पादकीयम्	प्रधानसम्पादकः	२७२
४.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, जयपुरम्	२७५
५.	स्वर्गतानां, विद्याभूषण-पं०श्रीगणेश-रामशर्मणां सुरभारती सेवा	श्रीकृष्णचन्द्रशर्मा शोधच्छात्रः जयपुरम्	२८३
६.	संघगीता	ले० श्रीश्रीधरभास्करवर्णकरः नागपुरम्	२९१
७.	सूक्ति-सुधा	डा० श्रीगङ्गाधरभट्टः, जयपुरम्	३०४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानसंरक्षका:–
जगद्गुरुशङ्कराचार्य-
स्वामिश्रीजयेन्द्रसरस्वतीमहाभागा:
कांचीकामकोटिपीठाधिपतय:

संस्थापक:
स्व. श्री उमाकान्तकेशव आप्टे
(बाबा साहब आप्टे)
प्रधान सम्पादक:
जगदीशशर्मा
साहित्याचार्य:
सम्पादक:
दीनानाथत्रिवेदी 'मधुप:'
सहसम्पादक:
रामगोपालशास्त्री जपुयरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

संरक्षक:
श्रीदेवीशङ्करतिवाड़ी
जयपुरम्
प्रबन्ध-सम्पादक:
श्रीगिरिराजशर्मा
भारती-भवनम्
बी १५, न्यू कालोनी
जयपुरम्–१
(राजस्थानम्)

वर्षम् ३१ | ज्येष्ठ:, विक्रमाब्द:, २०३८ [जून:, १९८१] | अङ्क: ८

मङ्गलम्

इन्दीवराणि कुमुदानि मिथ: क्षिपन्तौ
सौरी-प्रवाह-जल-केलि-कला-प्रवीणौ ।
पीयूष–सिन्धु-गत-मत्त-मराल-लीलौ
श्रीमन्मुकुन्दचरणौ शरणं प्रपद्ये ।।

मासावतरणम्

प्रत्यग्रै मृदुलै: सुगन्धभरितै वृन्दादलै र्वासिते
नाना-पुष्प-समन्विते सुविमले तोयेऽतिशीते शुभे ।
राधाकृष्ण-युगस्वरूपमनघं सर्वेश्वरं पूजयन्
ज्येष्ठोऽयं वृषगामि-मित्र-महितस्त्वायाति लोकेऽधुना ।।

—श्रीरामगोपालशास्त्री, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निजभुजवलप्रतापावनमितापरिमितबलवन्निखिलनृपतिमण्डलेन भरतेन जम्बूद्वीपस्य नवमांशमात्मसात्कृत्य क्षणभङ्गुरेणापि शरीरेण यशःशरीरस्थैर्यचिकीर्षया स्वनामधेयेन प्रतिष्ठापितं भारतं वर्षम्। अस्मिन्हि भरतखण्डे कलात्मतया केचन केचिच्चांशरूपेण कतिचन विभूतिमत्तयाऽसमवतीर्णाः समये समये सत्वाः। तदीयकर्मभिरेवापूर्वैर्वीरसूरियं भरतभूरद्यापि कस्य न विदितचरमेतदस्यामेव वीरप्रसविन्यां भूमौ वीर्यावतार इव बाप्पारावल स्तत्प्रतिमश्चासाधारणशौर्यशालो राणासङ्ग्रामसिंहोऽपि विश्वम्भरामेनामलञ्चकार। 'कारणगुणा हि कार्यगुणानारभन्त, इति न्यायमनुसृत्यैतदन्ववाये मूर्तिमानपरः प्रताप इव महाराणाप्रतापोऽपि तेजसा जाज्वल्यमानो वीरतैकास्पदं प्रादुरभूत्। जनुश्चास्य महाभागस्य चत्वारिंशदुत्तरपञ्चदशशत–तमे ख्रिष्टाब्दे मईमासस्य नवम्यां तारिकायामजायत।

आसन्नसहस्राब्दीतः परतन्त्रपाशनिगडितएतस्मिन्भारते वर्षे परतन्त्रतायाः श्यामिकाङ्का आरोपिता भवेयुर्नाम परन्न कदापि पारतन्त्र्यामङ्गीकृतमात्मनो देशस्य च हृदयेन भारतीयै। वैदेशिको टाडमहाशयः स्वलिखिते 'राजस्थान का इतिहास', नामके पुस्तके लिखति यद् ग्रीसनामके देशे कश्चिदेकस्थर्मोपल्ली वीरोऽवर्तिष्ट परं भरतभूभागस्य प्रतिकणमनेकशो व्याप्तिर्विद्यते। यत्र बलिभिर्भूपालैराहुतीकृत्य वर्ष्माणि भारतीयतायाः पराकाष्ठा प्रकटिता। किञ्च स्वराष्ट्रस्य धर्मस्यात्मपौरुषस्य च पताकाऽनवरतं दोधूयमानैवास्फूर्यत। देशेऽमुष्मिन्कति नैवंविधा आदर्शा अभूवन्येऽनेकशताब्दीपर्यन्तं भाविपुरुषेभ्यः स्फुरणां दातुं पारयन्ति। महाराणाप्रतापस्य चरित्रमेतादृशमेव महदुज्ज्वलं स्फूर्तिप्रदञ्चास्ति। प्रतापशब्दः स्वयमेवात्मनि तेजः शौर्यं पराक्रममुष्णतामुज्वलताञ्च समावेश्य तिष्ठति। प्रतापेन सर्वार्थसमवेतं जीवनं यापयित्वाऽऽत्मनोन्वर्थकत्वेन सह जनसमक्षम्महानादर्शः समुपस्थापितः। अनुपमतेजस्वितया मेदपाटस्य द्वितीयो भास्वानिव वाभासतैषः।

उदयसिंहे प्रतापपितरि पुरन्दरपुरातिथिभूते राज्यसिंहासनमेकमात्रतदुत्तराधिकारितयाऽध्यारोहतायमेव। राज्यसिंहासनारोहणानन्तरं पञ्चविंशतिवर्षाणि यावदसूनधारयत्। एतावति स्वल्पीयसि जीवनकाले द्वादशात्मकोर्धभागोऽस्य मुगलैः सार्धमाक्रमणप्रत्याक्रमणयोरेव व्यतीयाय। अवशिष्टश्चार्धांशो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवनस्य मुगलानामाक्रमणाभावाच्छान्तिसमय इति वक्तुं शक्यते। प्रतापोऽस्मिन्नप्यनेहसि न सुखमाससादापितु मेदपाटधरायाः प्रत्येकं कणमपि स्वाधीनं कर्तुं मियेष, अत एव समायातेऽवसरे गुरिल्लायोधनपद्धतिमालम्ब्य मुगलान्हतोत्साहान्विधाय तैः सह स्वभूमिप्रत्यावर्तन-क्रमो यावज्जीवं प्राचलदेतस्य पञ्चाशीत्यधिकपञ्चदशशताब्द्यामकबरः श्रान्तिं समाश्रित्य मेदपाटवसुन्धराक्रमणान्न्यवर्तत यथैव तथैव प्रतापेन युद्धविक्लवाः प्रसन्नाः प्रजा दिदृक्षुणोत्तरदायित्वमात्तं सहृदयप्रजापालकस्य दायित्वमपि निर्व्यूढम्। अल्पीयांस एव जना जानन्तीदं यद् राणामहोदयस्य मरणकालेऽपि तावती सर्वाऽपि धरणी हस्तगतावर्तत यावती तदीयराज्याभिषेकसमये प्राप्तास्त। विचार्यैव सम्राडकबरः शरणागतस्य मानसिंहस्य नेतृत्वे विशालां स्ववाहिनीं सुसज्जितां प्रतापं जीवग्राहमभिगृह्य गतासुं वाऽनेतुं सङ्कल्पेन साकं प्राहिणोद्धल्दीघाटीनामकस्थाने। जातु राजपुत्ररक्तमन्योन्यमनुमरदेकीभूय सरव्यभावन्नेयादितिमनसि शङ्कोदये सति स स्ववीरसेनापतिमासफखानं मानसिंहेन सार्धं सम्प्रैषयत्। अकबरानीके वारणेषु शतघ्नीषु चतुर्गुणितसंख्याधिकसैनिकेषु वर्तमानेष्वपि न मानसिंहो न चासफखानः सम्राजः सङ्कल्पं पूरयितुमपारयताम्।

अकबरेण सम्मानितो लब्धप्रशस्तिश्चेतिहासकारः "अलबदायुनी, महोदयः स्व ग्रा-

मस्यास्याक्षिगतं यद्वृत्तमलिखत् तत्रोररीकृतमेतद्यत्प्रतापचम्वा आक्रमणमियद्बलवद्यदकबरवरूथिनी छिन्नभिन्ना भूत्वाऽविसंहतिरिव प्रपलायत।

प्रतापाकबरयोर्मध्यभवः सङ्घर्षो न व्यक्तिद्वयस्यापितु द्वयोर्मनोवृत्योः। एकतस्तु साम्राज्यविस्ताराकाङ्क्षी प्रलोभनेन बलाद्धर्मान्तरेण शक्त्या च देशेऽस्मिन्स्वाधिराज्यस्थापनमहत्वेच्छाप्रतीकोऽकबरोऽपरतश्च स्वदेशधर्मसंस्कृतीनां समस्तहिन्दूसमाजस्य रक्षायाः कठोरव्रती प्राणोत्सर्गी वीरवरः प्रतापः।

अमरात्मा गणेशशङ्करो विद्यार्थी स्वसमाचारपत्रस्य (प्रतापस्य) प्रवेशाङ्के लिखिते सम्पादकीये स्वेऽलिखन्महाराणाप्रतापो निस्संशयमेको महान्पुरुषोऽविद्यत। भारतीयेतिहासस्य कस्मिन् रत्न इयत्याभा वर्तते? स्वातन्त्र्याय केनैतावती कठोरपरीक्षा दत्ता? जनन्यै जन्मभूम्यै कस्तपोऽतप्यतैतावत्? प्रतापोऽस्माकं देशस्य प्रतापः। जातेर्नः प्रतापः। दृढताया उदारतायाश्च प्रतापः। न त्वं केवलं त्वदीयं यशः कीर्तिश्च ते। यावदयं देशो यदवधि च संसारे दृढतायाः स्वतन्त्रताया उदारतायाश्चादरस्तदवधि वयमेवाखिलञ्जगदपि त्वां सादरं द्रक्ष्यति। संसारस्य कस्मिन्नपि देशे त्वमभविष्यस्तर्हि तव पूजाभविष्यत् नाम्ने च ते जना आत्मबलिमदास्यन्। प्रतापिनस्तस्यामरवीरस्य स्मृतौ नंनम्यामहे वयं विनयेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



३७-मानवतायाः परिचयः [पाकिस्तानदेशस्य श्रेष्ठकथा]

श्री "पद्म" शास्त्री
१२८ मुक्तानन्दनगर, गोपालपुरारोड, जयपुरम्–१५

सिन्धप्रान्तस्य सक्खरनामके नगरे धनिकश्चैको न्यवसत्। तस्य पार्श्वे बहवः प्रासादाः सेवार्थं भृत्याश्चासन्। तज्जीवने कस्यापि वस्तुनो न्यूनता नासीत्। अश्वमारुह्य स प्रासादात्प्रासादं व्यचरत्। एकदा रात्रौ यदा स प्रासादपार्श्वे पर्यटन्नास्ते तदा समागच्छन्तं वृद्धमेकं ददर्श। वृद्धस्य वस्त्राणि जर्जरितानि शिरसि च भारः। धनिकं विलोक्यासौ भारं भुवि न्यपातयत् प्रणमन्प्रोवाच, श्रीमन्? परिश्रान्तोऽस्मि। यदि भवदाज्ञा भवेत्तर्हि रात्रावत्रैव विश्रमिष्ये। धनिकः प्राह–नेयं धर्मशाला, यदि भवान् मम किमपि वस्तु चोरयिष्यति तर्हि? इति श्रुत्वा वृद्धश्चाश्चर्यचकितः स्वभारं शिरसि निधाय तस्मात्प्रचलितः।

सिन्ध प्रान्त के सक्खर-नामक नगर में एक धनी पुरुष रहता था। उसके पास बहुत से महल तथा सेवा के लिए नौकर थे। उसके जीवन में किसी भी चीज की कमी न थी। वह घोड़े पर बैठकर एक महल से दूसरे महल में जाता था। रात्री में जब वह अपने महल के पास घूम रहा था तब उसने अपनी ओर आते हुए एक वृद्ध को देखा। उस वृद्ध के वस्त्र फटे–पुराने थे तथा शिर पर बोझ था। धनी पुरुष को देखकर इसने अपना बोझ पृथ्वी पर डाला एवं प्रणाम करता हुआ कहने लगा श्रीमन्! मैं थक गया हूं, यदि आपकी आज्ञा हो तो यहीं विश्राम कर लूं उस धनी पुरुष ने कहा, यह धर्मशाला नहीं है, आप मेरी कोई चीज चुरा लो तो? यह सुनकर वह वृद्ध चकित रह गया, अपना बोझ शिर पर रखकर वहां से चल पड़ा।

अन्धकारावृता रजनी, आकाशे मेघा गर्जन्ति, यदा कदा जलबिन्दवोऽ-

रात अंधेरी थी, आकाश में बादल गरज रहे थे, जब कभी जल की बूंदें भी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पि निपतन्ति, झंझावातस्यापि संदेहः परिश्रान्तश्चायं वृद्धः । किञ्चित्कालानन्तरं धारासम्पातैः जलवर्षणं प्रारभत किन्तु वृद्धः प्रचलन्नास्ते ।

बहूनि दिनानि व्यतीतानि । एकदा धनिकः स्वमित्रैः सेवकैश्च सह वने निर्गतश्चाखेटार्थम् । अश्वमारुह्य स मृगमन्वधावत् कृतेऽपि प्रयत्ने हरिणं ग्रहीतुं न शशाक । मार्गं विस्मृत्य भीषणे वने बभ्राम । भ्रमतस्तस्य चान्धकारावृता रजनी समायाता, झंझावातः प्रारभत, न कोऽपि तत्रासीत् यस्तस्य साहाय्यमकरिष्यत् । परिश्रान्तश्चायमश्वादवतीर्य वृक्षाधः समुपविष्टः । वृक्षोऽपि न्यपतत्, भीतश्चाश्व इतस्ततो ह्यधावत् ।

किञ्चित्कालानन्तरं वर्षा प्रशान्ता, नभो निर्मलञ्चाभवत् । द्विसहस्ररूप्यकैः क्रीतश्चायमश्वोऽपि दृष्टिपथं नागतो धनिकस्य, केनायं धनिको गृहं यायात् । इत्थं दुःखसन्तप्ते धनिके दूरादेको नरः समागतः, प्रहसन् प्रणमन् धनिकं प्रोवाच—कथं भवान् भृशं प्रतप्तः ? । धनिकोऽपि सर्वां कथामश्रावयत् । दयालुरसौ धनिकं स्वोटजमानयत् । सः प्रोवाच अत्राहं स्ववृद्धपितरौ सार्धं निवसामि भवानपि भोजनं कृत्वा

गिरने लगतीं, आँधी आने का भी भय था, वह वृद्ध थक चुका था । कुछ समय बाद मूसलाधार वर्षा होने लगी किन्तु वह वृद्ध चलता जा रहा था ।

बहुत दिन व्यतीत हुए । एक बार वह धनिक अपने मित्रों तथा सेवकों के साथ शिकार खेलने के लिए निकल पड़ा । घोड़े पर बैठकर वह मृग के पीछे भागा । प्रयत्न करने पर भी वह हरिण को न पकड़ सका । रास्ता भूल कर वह घने वन में भटकने लगा । घूमते-घूमते अंधेरी रात हो गई, आंधी आने लगी, वहाँ कोई न था जो उसकी सहायता कर सके । थका हुआ वह घोड़े से उतर कर वृक्ष के नीचे बैठ गया । आंधी से पेड़ गिर गया । घोड़ा भी डरकर इधर उधर भाग गया ।

कुछ समय बाद वर्षा शान्त हुई । आकाश साफ हो गया, दो हजार रुपयों में खरीदा हुआ घोड़ा भी अब धनिक को नहीं दिखाई दिया, जिस पर बैठकर वह घर चला जावे । इस प्रकार जब वह धनिक दुःखों से सन्तप्त हो रहा था तब दूर से एक आदमी आता हुआ दिखाई दिया । उसने हँसते हुए, प्रणाम करते हुए कहा—आप बहुत अधिक दुःखी क्यों हैं । धनिक ने अपनी सारी कथा सुनाई । यह दयालु पुरुष धनिक को अपनी झोपड़ी में ले गया । उसने कहा-यहां मैं अपने वृद्ध

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्रम्यताम् । धनिकः प्राह–ममाश्वस्य किं भविता ? दयालुरयं प्रोवाच–प्रभाते सञ्जाते सति तवाश्वमपि चान्वेषयिष्यामि तव सहायकानपि । धनिकः प्रसन्नश्चाभवत् । दयालुरयं धनिकं दुग्धमपाययत् चकितो धनिकः पप्रच्छ–किमिदम् ? दयालुः प्राह–अजादुग्धमेतत् । तव पार्श्वे कति अजा विद्यन्ते ? एकैव, तर्हि भवन्तो न पिबन्ति किं दुग्धम् ? दयालुः प्रत्यवदत्–मम पिता अद्य मां प्रत्युवाच यद्दुग्धमद्य केवलमतिथये प्रदेयम् । अहं मम पितुश्चैकलः पुत्रः ।

धनिकेन कथितं, सत्यं भवान् देवता–इति प्रवदन् धनिकः प्रसुप्तः । तस्मिन्प्रसुप्ते दयालुरसौ चाग्निज्वालां प्रज्वाल्य अश्वमन्वेष्टुं निर्गतः । प्रभाते सति अश्वमन्वेष्यानयत्स्वोटजपार्श्वे । मात्रा दृष्टं यन्मम सुतः प्राघुणिकस्याश्वमानयत् सा चाश्वसेवायां संलग्ना । प्रभाते धनिकेन दृष्टं यत्तस्य हयश्चणकभक्षणे लग्नः स्वगृहं गन्तुकामश्चायं प्रोवाच–अहं तव पित्रा मिलितुमिच्छामि, तद्दर्शनानन्तरमेवाहं गमिष्ये । पिता प्रत्युवाच शोभनं भवेद्यदि नाहं तेन सह मिलिष्यामि–नाहमतिथेरनादरं प्रकरो-

माता-पिता के साथ रहता हूं । आप भोजन करके विश्राम कीजिए : धनिक ने कहा, –मेरे घोड़े का क्या होगा ? इस दयालु पुरुष ने कहा, सुबह होने पर तुम्हारे घोड़े को भी ढूंढ़ लाऊँगा तथा नौकरों को भी । धनिक बड़ा प्रसन्न हुआ । इस पुरुष ने धनिक को दूध पिलाया । धनिक ने चकित होकर पूछा यह क्या है ? पुरुष ने कहा यह बकरी का दूध है । तुम्हारे पास कितनी बकरियां हैं । उसने कहा एक ही है । क्या आप लोग दूध नहीं पीते हैं ? दयालु पुरुष ने उत्तर दिया मेरे पिता ने आज मुझे कहा है आज दूध अतिथि को देना । मैं अपने पिता का एक ही पुत्र हूं ।

धनिक ने कहा आप वास्तव में देवता हैं ऐसा कह कर वह सो गया । उसके सो जाने पर यह दयालु पुरुष मशाल जलाकर उसके घोड़े को ढूंढ़ने निकल पड़ा । जब माता ने देखा कि मेरा पुत्र अतिथि के घोडे को ढूँढ़कर ले आया है तब वह भी घोड़े की सेवा में लग गई । प्रातः काल धनिक ने देखा कि उसका घोड़ा चना खाने में लगा है । अपने घर जाने की इच्छा वाले इस धनिक ने कहा मैं तुम्हारे पिता से मिलना चाहता हूं । उसके दर्शन करके ही मैं घर जाऊँगा । पिता ने उत्तर दिया अच्छा होता यदि मैं उससे नहीं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मि, मन्मनसि अतिथिसत्कारस्य भावो विद्यते । पुत्रः प्रोवाच–नाहं वेत्तुमशकं कथमनादरेऽपि चादरभावः ? तर्हि किं कथयानि प्राघुणिकम् ? । पिता प्रोवाच–कथय यन्मम पिता वृद्धो रुजातुरो बहिरागन्तुं न शक्नोति–इति ।

पुत्रः पितुः सन्देशमतिथये प्रोक्तवान् तच्छ्रुत्वा धनिकेन कथितं–पवित्रेऽस्मिन् तीर्थे अतिथिसेवापरायणस्य, महात्मनस्तव पितु र्दशनमकृत्वा कथं गृहं गमिष्यामि ? यस्य समग्रोऽपि परीवारश्चातिथिसेवापरायणः । तव पितु र्दर्शनेन मम जीवनं सफलं भविष्यति । अतिथेरत्याग्रहेण पिता स्वोटजाद् बहिरागतः ।

धनिकेन दृष्टं यदयं स एव वृद्धो यः शिरसि काष्ठभारं निक्षिप्य पूर्वं मत्प्रासादपार्श्वमापेदे । मया निर्भर्त्सितश्चायं तस्मान्निष्कासितः । वृद्धेनानेन मानवतायाः परिचयं दत्वा नितरामुपकृतोऽस्मि । भृशं लज्जितं धनिकं विलोक्य पिता प्रोवाच–अत एवाहमुटजान्न निर्गन्तुमैच्छं यद्भवान् पूर्वघटितघटनां संस्मृत्य लज्जितो भविष्यति ।

मिलता । मैं अतिथि का अनादर नहीं कर रहा हूं । मेरे वचनों में अतिथि सत्कार का भाव है । पुत्र ने कहा मैं नहीं जान सका कि अनादर में भी आदरभाव कैसे छिपा हुआ है ? अब मैं उस अतिथि को क्या उत्तर दूंगा ? पिता ने कहा—कहना कि मेरा पिता वृद्ध है एवं बाहर नहीं आ सकता ।

पुत्र ने पिता का सन्देश अतिथि को सुनाया । यह सुनकर धनिक ने कहा इस पवित्र तीर्थ में, अतिथि सेवा में लगे हुए, महात्मा–तुम्हारे पिता के दर्शन किये बिना मैं कैसे घर जाऊँ ? जिसका सारा परिवार ही अतिथि सेवा में लगा हुआ है । तुम्हारे पिता के दर्शन से मेरा जीवन सफल होगा । अतिथि के अधिक आग्रह करने पर पिता झोपड़ी से बाहर निकला ।

धनिक ने देखा कि यह तो वही बुड्ढा है जो शिर पर बोझ रखकर पहले मेरे महल के पास आया था । मैंने फटकार कर इसे निकाल दिया था । इस वृद्ध ने मानवता का परिचय देकर मुझ पर बहुत उपकार किया है । धनिक को बहुत अधिक लज्जित देखकर पिता ने कहा मैं इसीलिए झोपड़ी से नहीं निकलना चाहता था कि आप पहले की घटना को स्मरण कर लज्जित होंगे । लेकिन आपके

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं भवतामाग्रहेणाहं निर्गतोऽस्मि क्षम्यताम् भवान्।

साक्षाद्देवोऽस्ति भवानिति कथयित्वा धनिकस्तस्य चरणयो र्लुलोठ, नयनयोः पश्चात्तापाश्रूणि च मुमोच। स मनसि व्यचिन्तयत्–मत्प्रासादाल्लक्षगुणमधिकं महत्त्वमस्ति वृद्धस्यास्योटजस्य, यत्र साक्षात् मानवताया निवासो वर्तते।

आग्रह से मैं झोपड़ी से निकला हूं। आप मुझे क्षमा करें।

आप साक्षात् देवता हैं यह कहकर धनिक उसके पैरों में गिर गया, आँखों से पश्चात्ताप के आँसू गिरा रहा था। उसने मन में विचार किया। मेरे महल से इसकी झोपड़ी का लाख गुना अधिक महत्त्व है जहाँ साक्षात् मानवता का निवास है।

अरुणा उद्योग

माइन आनर्स, रेंजिग कोन्ट्रेक्टर्स ट्रांसपोर्ट्स

वैंकर्स एण्ड कमीशन एजेन्ट्स

दूरभाष : ७३६२६

ग्राम अरुण उद्योग

हैड आफिस :
श्री राम भवन
किशनपोल बाजार, जयपुर–१

ब्रांच आफिस :
गांधी मार्ग, भद्रक (उडीसा)
स्टेशन मार्ग के सामने, जे० के० रोड़
(उडीसा)

वकिंग एट :

बाउला क्रोमाइट माइन्स एट : धानपुर जैपुर, जिला के उनझर (उडीसा)

केथपाल क्रोमाइट लाइन्स एट: बिरसल जिला धेनकानाल (उडीसा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसिन्धुः सिन्धुपर्यन्ता-यस्य भारतभूमिका ।
पुण्यभूः, पितृभूश्चैव-स वै हिन्दुरिति स्मृतः ॥

—वीर सावरकर

सिन्धु महानद से लेकर सागर पर्यन्त इस भारत की भूमि को जो व्यक्ति अपनी पुण्यभूमि और पितृभूमि स्वीकार करता है, वही "हिन्दू" है ।

"पर उपदेश कुशल बहुतेरे,
जे आचरहिं ते नर न घनेरे" —गोस्वामी तुलसीदासजी

वह मुसाफिर क्या जिसे कुछ शूल ही पथ से थका दें ?
हौसला वह क्या जिसे कुछ मुश्किलें पीछे हटा दें ? —अज्ञात

पंजाबी चन्दू हलवाई करांचीवाला

कार्यालयः—१८५, बालकेश्वर रोड, तीनबत्ती, बम्बई–४००००६

स्थापना—१८९६ शाखायें :— तारका पताः—'चन्दूसेवा'

(१) जवेरी बाजार (२) ग्रान्टरोड (३) कोलावा (४) दादरा (५) वरली नका (६) सायन सर्कल (७) ठाकुरद्वार (८) सूर्योदयस्टोर्स, चर्चगेट (९) घाटकोपर (पश्चिम) (१०) लिंकिंग रोड, (११) रेलवे स्टेशन के सामने, सांताक्रुज (पश्चिम)

कारखाना :—चन्दू भवन, ग्रान्टरोड, बम्बई–४०००७

भारती के कतिपय प्रकाशन

१.	अम्बिकासूक्तम् संस्कृत हिन्दी टीका सहित	मूल्य २.५०
२.	गल्पकल्पलतिका (बालोपयोगिनी)	,, १.५०
३.	गोलनवाङ्कुरः (खगोलवर्णनम्)	,, २.००
४.	आयुर्वेदविशेषांकः	,, ५.००
५.	आरोग्याङ्कः	,, ५.००
६.	बालोपदेशमणिमाला (हिन्दी अनुवाद सहित)	,, ३.००
७.	सूक्तिसुधा (हिन्दी अनुवाद सहित)	,, २.००
८.	मातृस्तवनं (हिन्दीपद्यानुवाद सहित)	,, २.००
९.	आध्यात्मिकशिवायनम् (हिन्दीगद्यानुवादसहित)	,, ५.००
१०.	श्रीगुरुजीस्मृत्यङ्कः	५.००
११.	दुर्गासप्तशतीसर्वस्वम् (हिन्दीपद्यानुवाद सहित)	,, ५.००
१२.	भारतभक्तिस्तोत्रम् (हिन्दीगद्यानुवाद सहित)	,, १०.००
१३.	लघुकथासंग्रह (हिन्दीगद्यानुवाद सहित)	,, ५.००
१४.	शिवराज्योदयम् प्रथमखण्डः (सारसंक्षेपसहितः)	,, २०.००

व्यवस्थापक

भारती-संस्कृत-मासिक, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद साहित्य की अमूल्य भेंट

वैद्य सहचर

लेखक—पं० विश्वनाथ द्विवेदी

वैद्य बन्धुओ,

चिकित्सा पद्धति को आगे बढ़ाने के लिए एक ही मार्ग है, और वह है—चिकित्सा शास्त्र के योगों पर पुनः नये सिरे से अन्वेषण कर उन्हें इस रूप में रख देना कि प्रत्येक साक्षर पुरुष उनको एक निश्चित रूप में प्रयोग कर समुचित लाभ उठा सके।

'वैद्यसहचर' ऐसे ही रहस्य का भण्डार है। इसमें श्री ललित-हरि आयुर्वेदिक कालेज, पीलीभीत में प्रयुक्त होने वाले ५० वर्षों के सुपरीक्षित और अव्यर्थ योगों का भी संग्रह है।

प्रस्तुत पुस्तक का उद्देश्य साधारण वैद्य को चिकित्सा मार्ग में सफल चिकित्सक बनाना है। सन्तोष का विषय है कि वैद्य समाज ने इसे अपनाया। इसके ६ संस्करण हो चुके हैं, यह इसकी उपयोगिता का स्पष्ट प्रमाण है।

पं० विश्वनाथ जी द्विवेदी ने इसके नये संस्करण को अधिक उपयोगी बना कर श्री बैद्यनाथ आयुर्वेद भवन लिमिटेड के निर्देशक वैद्यराज पं० रामनारायणजी शर्मा को प्रकाशित करने को दिया। ३४५ पृष्ठ की वैज्ञानिक पुस्तक का मूल्य १०) रुपये मात्र है। बैद्यनाथ दवाओं के विक्रेताओं के पास भी यह पुस्तक मिलती है।

प्रकाशक,

श्री बैद्यनाथ आयुर्वेद भवन लिमिटेड,

गेट नाग रोड, नागपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एगमार्क

पैक की गई वस्तुओं
की शुद्धता एवं उत्तमता
की गारंटी होने पर
ही भारत सरकार द्वारा
एगमार्क दिया जाता है।

विश्वास पूर्वक खरीदारी करें
एगमार्क पर भरोसा रखें

घी, मक्खन, खाने के तेल, शहद, दालों, मसालों
आदि जैसी वस्तुओं को एगमार्क का लेबल
केवल बड़ी-बड़ी प्रयोगशालाओं में भली-भांति
से कई परीक्षणों के बाद ही दिया जाता है।

शुद्धता के लिए पूर्व
जाँच की जाती है
क्वालिटी के लिए श्रेणी
निश्चित की जाती है

हमेशा 'एगमार्क' वस्तुएं
ही खरीदें

परचून की दुकानों और जनरल स्टोरों पर उपलब्ध हैं।

डीएवीपी 80/508

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"महामूर्खसम्मेलनम्" (व. १८/७) इत्यादि लेखाः प्रमाणस्वरूपे उपस्थापयितुं शक्यन्ते ।

श्रीशर्ममहाभागेन चतुस्त्रिंशत्कथा अपि विरचिताः । तासु कथासु "सिद्धो रासायनिकः, वक्रदर्शनो हनूमद्भक्तः, शठे शाठ्यम्, गर्दभपुरे नापिताचार्यस्य प्रतिष्ठानम्, स्वाभिमानः, अकिञ्चनस्यौदार्यम्, हास्यपरवशो राजकुमारः, त्रयस्तमाखुव्यसनिनः, भातृस्नेहः, वीरपरीक्षा, भाग्यं पुरुषार्थश्च, श्रमदेवी, एकावाणी सत्या, पराधीना अतिथिदेवाः, पूर्वाग्रहः, स्पर्धा-भोजनभट्टानां सुहृद्गोष्ठी, मूढ़चिकित्सा, धूर्तपुरोहितः, विधानभङ्ग" इत्यादि विंशतिकथानां संकलनं साहित्य अकादमी उदयपुरतः 'संस्कृत-कथा-कुञ्जम्" इति नामके संकलने प्रकाशितम् । शेषाः कथाः विभिन्न पत्रपत्रिकादिसु प्रकाशिताः जाताः ।

एतासु वर्णनप्रधानकथासु सामाजिकी कथानां बाहुल्यं वर्तते । लेखकेन कथासु सामाजिक—दुष्प्रथानामपि चित्रणं कृतम् । यथा 'मूढ़चिकित्सा' इतिनाम्नी कथायां रमाकान्त इत्याख्य आई० सी० एस० अधिकारीः सहसा रुग्णोऽभवत्, रुग्णीभूतस्य तस्य पितृभ्यामुपचारः कृतः । तस्य माध्यमेन लेखकेन-सामाजिकान्धविश्वासस्य चित्रणं कृतम् । यथा रमाकान्तस्य स्वमातर प्रति कथनेन स्पष्टीभवति ।

"मातः ! किमर्थं यूयं सर्वे वृथा ताम्यथ ? अपव्ययं च कुरुथ ? नाहं प्रेताविष्टोऽस्मि । न च् काप्यन्या तादृशी व्यन्तरबाधा मम जातास्ति । अहं तु ज्वरेण पीडितोऽस्मि । कालपरिणामिनो हि भवन्ति रोगाः । तद्यूयं मा वृथा चिन्तातुरा भवत । धैर्यमवलम्ब्य शांतचितै भूंयताम् ! स्वल्पैरेवाहोभिरहंस्वस्थो भविष्यामि ।"

—(मूढचिकित्सा पृ० १६३)

अनेन प्रकारेण धूर्तपुरोहितः कथायां धूर्तपुरोहितस्याऽऽडम्बरस्य वर्णन कृतम् । तथव भोजनभट्टानां सुहृद्गोष्ठी, शठेशाठ्यम्, अकिञ्चनस्यौदार्यम् भ्रातृस्नेहः, विधानभङ्गः इत्यादयः सामाजिकी कथा सन्ति । एकस्मिन्दिवसे एका वाणी सत्या भवति इत्याभाणकं परिलक्ष्य एका वाणी सत्या इत्याख्या कथा विरचिता । आसु कथासु लेखकेन कथानकस्यानुरूपं प्रसंगानुकूलं वर्णनं कृतम् । वक्रदर्शनो हनूमद्भक्तः नाम्नीति कथायां वानरैः परिवृतस्य वक्रदर्शनसन्यासिनः भयानुभवस्य चित्रणं सजीवं वर्तते । यथा—

"रिक्तहस्तोऽसौ महात्मा हनूमद्भक्तो वक्रदर्शनोऽकस्मात् वानरयूथैः परिवृत्तो भीतभीतस्त्रस्तो विक्लवोऽनिष्टशङ्कातङ्काकुलः कम्पायमानसर्वाङ्गो यावत् स्वकीयां तामिमां "विपत्परम्परावृतां स्थितिमवबुद्धयति, तत्प्रतीकारं वोपायान्तरमात्मरक्षार्थमनुचिन्तयति, तावदेव ते सर्वेऽपि च वानरास्तमाक्रमितुमिव चेष्टमाना स्ततसमीपमाजग्मुः । इदानीं 'वक्रदर्शनो' हा हतोऽस्मि ! म्रियमाणोऽस्मि!!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९—नीतिकथाः त्रयः
२०—विविधा निबन्धाः द्विषष्टिसंख्यकाः

अनेन प्रकारेण इयं संख्या अशीत्यधिकशतद्वयं भवति केचन निबन्धा अप्रकाशिताश्च ।

तेषां महाभागानां रचना—कौशलोऽतीव चमत्कार्यासीत् साहित्यस्य सर्वासु विधास्वऽप्रतिहतगति आसीत् । तस्य काचित् कविता, गजलगीति एवञ्च अर्द्ध शताधिकनिबन्धाः जयपुरतः प्रकाश्यमानायां "भारती" संस्कृत मासिकपत्रिकायां प्रकाशिता बभूवुः । तेषां निबन्धाः काव्यानि स्तोत्रेत्यादयः भारतवर्षस्य विभिन्नेषु स्थानेषु प्रकाश्यमानासु पत्र पत्रिकादिसु प्रकाशिताः जाताः । तासु पत्रिकासु प्रमुखरूपेण निम्नलिखिताः सन्ति । यथा—

सुप्रभातम्, सूर्योदयः, सस्कृतरत्नाकरः शारदा भारती भारतवाणी दिव्यज्योति, गाण्डीवम्, गुरुकुलपत्रिका, विश्वसंस्कृतम्, गुञ्जारवः संस्कृतसाहित्यसम्मेलनं, सुधाबिन्दु, संस्कृतभवितव्यम्, संगमनी, मधुरवाणी, संस्कृतसाकेत, मंजूषा, विद्यालयपत्रिका, मधुमती, स्वरमंगला इत्यादयः ।

एषां महाभागानां काव्यशक्ति परिलक्ष्य ईसवीये १९५३ तमे ख्रिष्टाब्दे राष्ट्रपति सर्वपल्ली डॉ. राधाकृष्णन् महाभागेन, "वन्दे सुरभारतीम्" इतिनाम्नी कविता केन्द्रीय सर्वकारेण प्रकाश्यमाने षोडशभारतीय भाषासु कवितासंग्रहे प्रकाशिता । तस्याः कवितायाः पद्यमेकं प्रस्तूयते—[1]

"वन्दे वर्ण-शब्द-वाक्य-
छन्दोबद्ध सत्प्रबन्ध
गद्यगीति काव्यामृत
शृङ्गार-प्रभावतीम् ।
शैलीगुण गुम्फिताम-
लङ्कृति चमत्कृतिकां:
गम्भीरार्थ-गौरव
स्फुरन्ती प्रतिभावतीम् ।।
कल्याणमनल्पकल्पना-
तरङ्गकल्लोलिनीं
कविकुलकीर्तिलतां
ललितकलावतीम् ।
भव्यभद्रभावरसानन्द
घनकादम्बिनीः
वन्दे सर्वशुक्लामिष्टदेवीं
सुरभारतीम् ।।१।।"

अनेन प्रकारेण पद्यत्रयात्मिका इयं कविता वर्तते । कवेः रचना कौशलं भाषायामुपरि अधिकारः भावप्रवीणता अस्यां प्रकटीभवति ।

श्रीशर्ममहाभागेन अभिनव--छन्दसां प्रयोगं विहितः यथा हिन्द्यां भवति घनाक्षरी

१—राजस्थानस्य कवयः (चतुर्थोभागः) राजस्थान साहित्य अकादमी संगम उदयपुरतः ईसवीये १९६५ तमे वर्षे प्रकाशिता: १२ तम पृष्ठे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छन्दः तथैव "जवाहरजयन्त्यां" घनाक्षरी छन्दे वर्णनं कृतम् । यथा—

"तिलक जयन्ती स्वान्तरङ्ग
स्फुरत्तेजोमयीः
गान्धेः सा स्वराज्यसिद्धि
सम्पद्वै जयन्तीयम् !
विद्यावर्द्धिनी च महा-
मनसो जयन्ती मुदे;
क्रान्तिकारिणी सुभाष-
चन्द्रस्योल्लसन्तीयम् ! !
विश्वकवेश्चित्तरञ्ज-
नस्य दयानन्दस्य च
काव्यश्रियं न्यायं सार्य
संस्कृतिर्दिशन्तीयम् !!!
कूटनये वल्लभस्य विज्ञानेऽथ जागदीशी;
सार्वभौमशांतये जवाहरजयन्तीयम् ।।?।।[1]

अनेन प्रकारेण 'गजलगीति' रूपेण नानाविधाभिनवप्रयोगानां प्रारंभः कृतः। यथा अभिनवछन्दसां प्रयोगः कृतस्तथैव प्राचीनछन्दसामनुकरणमपि विहितम् तैनेव शर्म महाभागेन। उदाहरणस्वरूपे 'श्रीसुभाषचन्द्रः' इति नाम्नी एकादशपद्यमयी कविताया: पद्यद्वयं प्रस्तौमि—

श्री कीर्तिध्वज इव राष्ट्रसंस्कृते यो
विद्वान् भारतगगनाङ्गणे विरेजे।
श्रद्धेयो मतिमहतां सतां वरेण्यो
धन्योऽसौ जयतितमां सुभाषचन्द्रः ।।?।।

अन्तिमो पद्यः
जीवन् वा सुभटगतिं गतो द्युलोकं
दीर्घायुःस्वयमपरोऽष्टमो महात्मा
आकल्पं कविकुलकीर्तनीयकीर्ति
श्चारित्र्याद्ध्रुवाजरामरः सुभाषः ।।??।।[2]

श्रीशर्ममहाभागानां निबन्धानां संख्या तेषां रचनासु सर्वाधिकाः वर्तते। निबन्धेषु वेदातिरिक्तेषु प्रायः सर्वविधविषयाणां परिचर्चा समुपलभ्यते। तेषां निबन्धेषु भाषाशैली प्रौढ़ा विषयानुरूपा समासबहुला च वर्तते। यथा वर्णनात्मके गजयुद्धमित्याख्ये[3] निबन्धे युद्धस्थलं प्रति गच्छन्तं गजस्य क्रीडायाः वर्णनं कृतम्—

लोकानां दुश्चेष्टा सहस्रैर्गजराजस्य तस्योद्दण्डाचरणै श्चोभयथापि कष्टबहुलास्थितिर्जायमानास्ते। एवं क्लिश्यमानानां तेषां सर्वेषां गजपालानां भल्लैरङ्कुशैश्च मुहुर्मुहुर्विध्यमानोऽसौ मत्तवारणः कष्टसाध्ये रुपायैः कथं कथमपि चैकस्मात्पदादन्यद्दुगच्छति। क्वचिदग्रे गतोऽपि प्रतिनिवर्तते,

१—राजस्थानस्य कवयः (चतुर्थभागः) ६४ तमे पृष्ठे श्री जवाहरजयन्ती ।

२—राजस्थानस्य कवयः (चतुर्थभागः) ६२ तमे पृष्ठे श्री सुभाषचन्द्रः ।

३—जयपुरतः प्रकाश्यमाना भारती संस्कृत मासिक पत्रिकायां अष्टादश वर्षस्य चतुर्थ—पञ्चमे अङ्के १५३ पृष्ठे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचित्तीव्रजवं धावति, क्वचित्फलादिपदार्थान्शुण्डोत्तम्भितान्कृत्वा बहुदूरमुत्क्षिपति, क्वचित्तान्भूमाववपात्य पादाघातैरपमर्द्दयंश्चूर्णयति क्वचिन्मूको जडोऽन्धइव सर्वं सहोमार्गस्थिरतामाश्रयते, क्वचिदकस्माद्भ्रूमितलेशुण्डादण्डमास्फोटयति, क्वचिद्घण्टापथमुभयतो वर्तमानान्वृक्षान्स्तभ्यान्पादपान्समूलमुत्पाट्योत्क्षिपति, क्वचिद्धूलिमापूर्यशुण्डायामाकाशे भूमौ च सर्वतः प्रकिरति, क्वचिच्चीत्कारैर्दिशां मुखानि वधिरयति महद्भयं च दर्शकानां हृदि समुत्पादयति। सत्यप्येवं बहिस्थो मत्तगजोऽसौ कोऽपि महात्मावधूतो योगीव परिदृश्यते स्थितप्रज्ञ इत्यहो!"

· · · (गजयुद्धम्)

जीवनपरिचायकेषु निबन्धेषु महात्मागांधी-सुभाषचन्द्रबोसमहामना मालवीय–विश्वकविरवीन्द्र–विवेकानन्द–प्रफुल्लचन्द्रराय–मोतीलालनेहरु–नरदेवशास्त्री – बर्नार्डशा – नीत्से-सर्वपल्ली डॉ. राधाकृष्णन्–महामहोपाध्याय उमेशमिश्रः—म. म. गिरिधरशर्मा चतुर्वेदी – युगपुरुष जवाहरलालनेहरु – कविशिरोमणिभट्टश्रीमथुरानाथशास्त्रीत्यादि महापुरुषाणां व्यक्तित्वकृतित्वपरिचायकाः अनेकाः सारगर्भिताः बृहदाकाराः निबन्धाः विद्यन्ते। भाषासाहित्यविषये श्री शर्ममहाभागैः बंगला–मराठी–गुजराती–हिन्दी–संस्कृतेत्यादिभाषाणां तत्साहित्यस्य विभिन्न विषयाणां लेखा अपि लिखिताः। जयपुरतः प्रकाश्यमानायाः 'भारती' पत्रिकायाः चतुर्दशवर्षस्य २·३·९-१० चतुर्ष्वङ्केषु "गुर्जरभाषातत्साहित्यञ्च" एवं "श्रीगोवर्द्धनरामत्रिपाठी" लेखद्वयं विशेषतः उल्लेख्यम्।

एवंविधप्रकारेण समालोचनात्मकनिबन्धानां बाहुल्यमपि दरीदृश्यते। एषां निबन्धानामध्ययनेन प्रतीयते यत् श्रीशर्ममहाभागैः साहित्य-समाज-शैली-पत्रकारितादीनां सर्वेषां ग्रन्थानां समालोचना कृता। तासु समालोचनासु "मिथ्याकीर्तिर्लेखकमहाराजः" (अमृतलता पारडीतः प्रकाश्यमानायाः पत्रिकायाः द्वितीयवर्षस्य १, २, ३, अङ्केषु प्रकाशितः) "जाने त्वां संस्कृतपण्डितम्" "संस्कृतोद्धाराय क्रान्तिः क्रियताम्" "वाग्देवीयं बलिमपेक्षते" (सं. र. काशी व १६ अ. ७ सं. २००८) तथा "संस्कृते पत्रकारिता" प्रयागस्य च 'संगमनी' पत्रिकायाः प्रथमे वर्षे धारावाहिकरूपे प्रकाशितो लेखः "मर्मस्पर्शिव्यङ्ग्चकारो महाकविरकबरः"[1] इत्यादयो पठनीयाः लेखाः सन्ति।

गम्भीरभावप्रधानलेखानाञ्चातिरिक्तं तेनहास्यव्यङ्ग्यसाहित्येऽपि केचन निबन्धाः 'भारती' पत्रिकायां प्रकाशिता "धन्यवादस्यात्मचरितम्" (वर्ष ४/अ. ४) "खेलन्ती खट्वा" (व. ५/११,१२) "मर्कट महाशयः" (व. ७/३) "घण्टागौरवम्" (व. ५/१,२)

१—'संगमनी' प्रयागतः प्रकाश्यमानायाः पत्रिकायाः २०२२ तमे विक्रमाब्दे प्रथमवर्षस्य तृतीयचतुर्थअङ्कयोः शेषांशः द्वितीयवर्षस्य प्रथमेऽङ्के प्रकाशितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गतानां, विद्याभूषण-पं० श्रीगणेशरामशर्मणां सुरभारती सेवा

श्रीकृष्णचन्द्रशर्मा शोधच्छात्रः
संस्कृतविभागे, राजस्थानविश्वविद्यालयः, जयपुरम्

पूर्वाऽनुवृत्तम्—

७—महामहिषमर्दिनीस्तुति-देवीस्तुति-शतगालिकश्लोकाः सार्थाः (अप्रकाशिताः) केचन प्रकाशिताः

८—संस्कृत-कथा-कुञ्जम् राजस्थानसाहित्य—अकादमी—संगम—उदयपुरतः १९७६ तमे वर्षे प्रकाशितम् (विंशति कथानां संकलनम्)

९—पत्राणि पत्रकाराश्च "कमलापति-त्रिपाठीद्वारा प्रणीतग्रंथस्य संस्कृतेऽनुवादः। बनारस हिन्दूविश्वविद्यालयेन प्रकाशनार्थं स्वीकृतः।

१०—राजस्थान-साहित्य-अकादमी—संगम उदयपुरतः प्रकाश्यमानायाः त्रैमासिकी संस्कृतपत्रिकायाः स्वरमङ्गलायाः प्रथमो सम्पादकोऽयं महाभागः।

तेन प्रथमवर्षस्य द्वयोरङ्कयोः सम्पादनं विहितम्।

एतदतिरिक्तं श्रीमहाभागानां अष्टाधिकशतत्रयो विविधाः निबन्धाः, कथाः, उपन्यासाः जीवनपरिचयादयः, समालोचनात्मकाः भावात्मकाः, शास्त्रीयाः, सामाजिकाः, हास्यपरकाः निबन्धाः भारतवर्षस्य विभिन्न पत्रपत्रिकादिषु प्रकाशिताः सन्ति। तेषां वर्गीकरणं एवं प्रकारेण प्रस्तोतुं शक्यते—

१—आयुर्वेदविषयकः एकः
२—भ्रष्टाचारविषयकः एकः
३—संस्कृतसाहित्य-साहित्यकारैश्च सम्बन्धिताः सप्तदशसंख्यकाः
४—देशभक्तिः किं वा राष्ट्रसम्बन्धी नव
५—समस्यापूर्तयः त्रयः
६—विज्ञानसम्बन्धी अष्टौः
७—पत्रं पत्रकारसम्बन्धी नव.
८—संस्मरणात्मकाः चत्वारः
९—समालोचनात्मकाः पंचदश
१०—जीवनपरिचायकाः चतुः सप्ततिः
११—हास्यव्यङ्ग्यात्मकाः अष्टादशसंख्यकाः
१२—भावात्मकाः पञ्चसंख्यकाः
१३—सामाजिकलेखाः षड्संख्यकाः
१४—भाषणसाराः द्वौ
१५—कथा-एकत्रिंशत्
१६—ज्योतिषविषयकाः द्वौ
१७—गजलगीतयः नव
१८—संवादाः द्वौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मर्कटकृतोपप्लवान्नितरामाहतोऽस्मि !!! मृत्युर्मे समुपस्थितोऽधुना !!! किं करोमि ? कं शरणमहं गच्छामि ?? को नु मामस्मान्महोपद्रवात् पायात् ? अत्याहितं ! अहह, भोः। त्रायताम् !! त्रायताम् !! ....।

(–वक्रदर्शनो हनूमद्भक्तः पृ. १८-१९)

एवंविधप्रकारेण "शठे शाठ्यम्" इति कथायां सन्यासिनः वर्णनं प्रसंगानुकूलं वर्तते यथा—

मध्ये सन्यासिप्रवरस्य प्रपुष्टसर्वाङ्गी भव्या तेजोमयी मूर्तिर्विराजते। यतिप्रवरस्यास्या सुविशालं स्निग्धचिक्कणं सद्यो मुण्डितं शिरो, विशालो भालपट्टो, दीर्घापाङ्गे सघने-भ्रुवौ, कर्णान्तलम्बिनी सुविशाले नेत्रे, शोभना नासिका, सततमन्त्रोच्चाराभ्यासवशात् पल्लववत् प्रस्फुरन्तावधरोष्ठौ, रेखात्रितयसुन्दरमुदरं, करभशुण्डानुकारिणौ प्रपुष्टौ स्थूलौ मांसलौ च भुजौ, आरक्तच्छवी सुस्निग्धौ पाणिपल्लवौ, हस्ताग्राङ्गुलिषु रुद्राक्षजपमाला, समग्रमपि कलेवरं भस्मोद्धूलितं, मध्ये-मध्येरक्तचन्दनकेशरलाञ्छितस्त्रिरेखाचिह्नललितोऽस्य यतेः भौतिको विग्रहो विलोकमानानाम् जनानां हृदि तत्कालमेव कमप्यपूर्वं महाप्रभावमुत्पादयन्नास्ते।"

–(शठे शाठ्यम्-पृ. ३०)

अनेन प्रकारेण सिद्धोरासायनिक, भ्रातृस्नेह, स्पर्द्धा, श्रमदेवी, विधानभङ्ग इत्यादिसु कथासु स्वाभाविकं प्रसंगोचितभाषायां वर्णनं कृतमस्ति।

श्रीशर्ममहाभागानां आधुनिकेषु गद्यलेखकेषु स्थानं मान्यप्रतिनिधिरूपेण विद्यते। गद्यासाहित्यस्य सर्वासु विधासु तेन रचना विहिता। निबन्धकाररूपे तेषां नाम स्मर्यते अद्यावधि विद्वद्भिः सुरभारतीसमुपासकैः सहृदयरसज्ञैः साहित्यसेवकैः। संस्कृतवाङ्मये विवधविधासु तेषां रचनानां महत्त्वं ज्ञात्वा तेषां ग्रामोपकण्ठनिवासी राजस्थानविश्वविद्यालये संस्कृत विभागस्य शोधच्छात्रः श्रीप्रियव्रतपंड्या 'विद्याभूषण पं. श्री गणेशरामशर्मा व्यक्तित्वं कृतित्वञ्च' इति विषयमवलम्ब्य शोधकार्यरतो वर्तते।

श्रीशर्ममहाभागानां सुरभारती 'प्रेम' कीदृशमासीत्, अस्य परिचयः 'संगमनी' पत्रिकायाः सम्पादकं श्रीप्रभातशास्त्रीं प्रति लिखिते एकस्मिन्पत्रे स्पष्टो भवति, यत्—

"संस्कृतपत्रकारिता के क्षत्र में अपनी सेवायें अर्पित करता रहूँ और निर्वाहयोग्य धन पाता रहूँ तो आजीविका की समस्या से निश्चिन्त हाकर पूरो शक्ति से लखन सेवा में लग जाऊं। मुझे कोई वृत्ति या सहायता मिले जिससे मैं अपने लखन द्वारा सुरभारती का सेवा करता हुआ ही महाप्रयाण करूँ।"

उपरिविवेचितवर्णनेनानेन स्वर्गतानां विद्याभूषण पं. श्री गणशरामशर्ममहाभागानां सुरभारतीसेवायाः मूल्यांङ्कनं सम्यग्रूपेण भवतोऽयलं बहुविस्तरेण।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामवनगमनम्

द्वितीयः सर्गः

स्व० श्रीरघुवीरभट्टः

अथेन्दीवरश्यामलः शान्तमूर्तिः,
प्रियापार्श्वमासाद्य रामः सलीलम् ।
मुखं वीक्ष्य लोलालकैः राजमानं,
सरोजं वृतं चंचरीकैरिवास्याः ॥१॥

अवोचच्छुभेऽहं तवायत्तप्राण,
स्त्वमेवासि कान्ते कला चात्मनो मे ।
इयं संगतिर्जन्मजन्मान्तरेषु,
स्थिरास्यादिमां भावनां संधरेव ॥२॥

मया सत्यरक्षार्थमात्मोदयार्थं,
प्रजानां हितार्थञ्च संचिंतितं यत् ।
वनेऽहं चरन् लोकरक्षापरः स्यां,
प्रसंगेऽत्र कल्याणिकस्ते विचारः ॥३॥

अथाग्रे स ऊचे वने संचरद्भ्यो,
महादानवेभ्योऽतिभीताः सखेदम् ।
कथंचिज्जनाः कन्दमूलाशनेन,
जलेनैव वा जीवनं यापयन्ति ॥४॥

तृणान्येव शैय्या वनालीषु वासो,
न यत्रास्ति रक्षापि शीतातपाभ्याम् ।
नराः ज्ञानहीनाश्चरन्त्यत्र दीनाः
न तेषां च शाखामृगाणां विभेदः ॥५॥

अपाकृत्य सर्वापदो जीवनस्य,
स्थितिं सानुकूलां तथा कर्तुमीहे ।
ऋषीणामरण्यौकसां साहचर्याद्,
यथा ते मुदा जीवनं यापयेयुः ॥६॥

यदेत्थं गदन्तं वचः प्राणनाथं,
समालोकयत्सद्य एवोपयातम् ।
किमाख्येयमस्तीति संचिन्तयन्ती,
तदालेख्यमेवाभवद् राजपुत्री ॥७॥

तदैवोर्मिला लक्ष्मणेनात्र साकं,
स्वसारं समभ्येत्य वागित्थमूचे ।
त्वमार्येऽनुयाह्यार्यमालम्ब्य धर्मं
ममाप्यत्र वासोऽस्तु धर्मानुकूलः ॥८॥

विधातुं नियोगं ह्यशून्यं स्वसारौ,
वसेतां वने वा गृहे नैव भेदः ।
यथा कानने त्वं तथा मन्दिरेऽहं,
शुभं पातिव्रत्यं चरन्त्यौ समाने ॥९॥

अटव्यामटन्तं स्वसः ! स्वामिनं स्वं,
त्वमाराधयन्ती न खेदं लभेथाः ।
ममाप्यत्र गेहे भविष्यन्ति पुण्याः,
प्रियस्यार्यजेष्ठस्य चानन्तचर्चाः ॥१०॥

कदाचित् करिष्यामि काव्यार्थचर्चां,
स्वरं साधयिष्याम्युतादाय वीणाम् ।
गुरूणां च पादौ नमन्तीह नित्यं,
न वेत्स्यामि कालः कदायं व्यतीतः ॥११॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदाचित्सखीभिर्विधास्यामि वार्ता,
प्रसक्तापि नानाक्रियास्वत्र सम्यङ् ।
मुदा मातृपादौ च संवाहयन्ती,
सुखं यापयिष्यामि कालं स्वकीयम् ।।१२।।

ततश्चोर्मिला स्वार्यपुत्रेण साकम्,
स्वशुश्चार्यजेष्ठस्य पादौ प्रणम्य ।
निशम्याशिषम् नम्रभावेन पूर्णा,
प्रयातुम् स्वकीयं गृहं तत्पराभूत् ।।१३।।

कनिष्ठां स्वसारं तथा देवरञ्च,
स्वगेहाद्गतौ तावुभौ वीक्षमाणा ।
इतः पार्श्वगं प्राणनाथं विलोक्य,
मुदा मैथिली मीलिताक्षी जगाद ।।१४।।

वने राक्षसेभ्यो भयं ते न मेऽस्ति,
त्वया यत्प्रयुक्तं न युक्तं वचस्तत् ।
यतश्चावयोः क्षात्रधर्मः समानो,
यथा क्षत्रियस्त्वम् तथा क्षत्रियाऽहम् ।।१५।।

प्रयातुं वनं तत्परं त्वां विलोक्य,
यदा देवरो मेऽनुयातुं स्वजेष्ठम् ।
प्रियायै मनोभीष्टभावश्चकार,
कनिष्ठा स्वसा मे तदा मामुपेता ।।१६।।

दृढा धीमती सा वचः सारयुक्तं,
नियोगं च स्वं स्वं ह्यशून्यं विधातुम् ।
स्वसारावुभौ कानने वा गृहे किं,
वसन्त्यौ चरेतां मतं त्वित्थमूचे ।।१७।।

चकोरीव चन्द्राननं वीक्षमाणा,
कथं कानने क्लेशलेशं लभेयम् ।
परं शान्तिदं काननं मे हि यत्र,
तव प्रीतिपाथेयलाभोऽस्ति नूनम् ।।१८।।

स्वभ्रातुः समाराधने त्यक्तसौख्यः,
परं ध्येयमाप्तुं त्वितो यास्यतीति ।
स्वसा मे परं गौरवं मन्यतेऽत्र,
अभावेऽपि पीड़ा न वै वाधते ताम् ।।१९।।

अथाग्रे च सीता दृशा प्रीणयन्ती,
स्वकान्तं मनोभीष्टमित्थं जगाद ।
अहोनाथ मे नात्र त्यागं हि न्याय्यं,
महान्तो जनाः स्वीकृतं पालयन्ति ।।२०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संघगीता

ले० डॉ० श्रीधरभास्करवर्णेकरः, नागपुरम्

संघ जिज्ञासा

प्रथमोऽध्यायः

अथातिपावने स्थाने–भगवद्ध्वजशोभिते ।
समामिलन्ति नियतं युवका ध्येयनैष्ठिकाः ।। १ ।।

राष्ट्रीय स्वयं सेवक संघ की शाखा, अत्यन्त पवित्र स्थान पर जो भगवाध्वज लगे रहने के कारण सुशोभित हो रही है उस स्थान पर ध्येयनिष्ठ (राष्ट्र को परम वैभव पर ले जाने का जिनका लक्ष्य है निश्चित समय पर निश्चित रूप से सम्मिलित होते हैं।) प्रतिदिन आकर सम्मिलित होकर शारीरिक-मानसिक-वैचारिक कार्यक्रम करते हैं ।। १ ।।

तत्रैकदा समायातं श्रीगुरुं माधवाभिधम् ।
प्रसन्नहास्यविलसज्जटालश्मश्रुलाननम् ।। २ ।।

संघ शाखा पर एक दिन माधवराव नाम से विख्यात (पूजनीय श्रीगुरूजी) पधारे, उनका प्रसन्न तथा हास्य युक्त मुखमण्डल दाढी तथा मूंछों से सुशोभित था ।। २ ।।

राष्ट्रसङ्घटनासत्रे समिधीकृतजीवनम् ।
सम्यक् प्रणम्य तं सर्वे प्रसन्नमनसोऽभवन् ।। ३ ।।

पूजनीय श्री गुरूजी (सरसंघचालकजी) ने राष्ट्र की संघटना के यज्ञ में अपने जीवन को समिधा बना दिया था। उनको आदर पूर्वक प्रणाम करके सभी स्वयं सेवक प्रसन्न चित्त होगये ।। ३ ।।

शिक्षितानां सदाचारे सुविचारे च धीमताम् ।
य आसीदुज्ज्वलादर्शः प्रचारे तत्त्ववेदिनाम् ।। ४ ।।

वे पूजनीय श्रीगुरूजी शिक्षित लोगों में सदाचार परायणता से और बुद्धिमानों में उत्तम विचारों के कारण तथा तत्ववेत्ताओं में तत्वज्ञान के प्रचारक के रूप में उज्वल आदर्शवाले थे ।। ४ ।।

कर्मयोगी भक्तियोगी ज्ञानयोगी महानपि ।
राष्ट्रोत्थानाय यो जातः संघयोगी महातपाः ।। ५ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूजनीय श्रीगुरूजी कर्मयोगी थे, भक्तियोगी तथा महान ज्ञानयोगी होते हुए भी वे महान तपस्वी, राष्ट्रोत्थान के लिये संघयोगी बन गए ॥ ५ ॥

जितकामो हतक्रोधो विलुप्तमदमत्सरः ।
क्षीणसर्वेषणो योऽभूत् शुक्राचार्य इवापरः ॥ ६ ॥

वासनाओं को जीतकर, क्रोध को नष्ट कर, मद और मत्सर को समाप्त करके, सभी प्रकार की इच्छाओं को वशमें करने के कारण श्रीगुरूजी मानो दूसरे शुक्राचार्य ही थे ॥ ६ ॥

त्वङ्मांसरुधिरास्थीनि शिबिकर्णदधीचिवत् ।
येनार्पितानि राष्ट्राय क्षणशःकणशोऽनिशम् ॥ ७ ॥

जिन गुरूजी ने अपनी त्वचा, मांस, रुधिर और अस्थियों को राजा शिबि, दानवीर कर्ण और महर्षि दधीचि के समान हरक्षण अपने कण-कण को राष्ट्र के लिये अर्पित कर दिया ॥ ७ ॥

किञ्चिदङ्कुरितं राष्ट्रे संघबीजं प्रवर्धितम् ।
अक्षय्यवटवद् येन जीवनामृतसिञ्चनैः ॥ ८ ॥

जिन गुरूजी ने राष्ट्र में स्वल्पमात्रोप्त अंकुरित हुए इस संघकार्य रूपी बीज को अपने जीवनरूपी अमृत से सींच कर अक्षय वट वृक्ष की भांति राष्ट्र में बढा दिया ॥ ८ ॥

भूतं भवद्भविष्यच्च राष्ट्रस्य स्पष्टवादिनी ।
सतां प्रमाणभूताऽभूद् भारते यस्य भारती ॥ ९ ॥

भारत में जिन श्रीगुरूजी की वाणी राष्ट्र के भूतकाल वर्तमानकाल और भविष्यत् काल की स्पष्ट जानकारी देनेवाली व सज्जन लोगों के लिये प्रमाणभूत (प्रमाण देने योग्य) थी ॥ ९ ॥

भक्त्या परमपूज्यं तं परितः समुपाविशन् ।
दैनन्दिनप्रार्थनान्ते युवानस्ते प्रभाविनः ॥१०॥

तरुण प्रभावी कार्यकर्ता संघ स्थान पर प्रतिदिन की जाने वाली प्रार्थना के पश्चात् भक्तिपूर्वक परम पूज्य गुरूजी के चारों ओर बैठते थे ॥ १० ॥

तस्य स्वैरकथाभिस्ते मोदमाना मनस्विनः ।
श्रोतुमैच्छन् संघतत्त्वप्रबोधमधुरा गिरः ॥११॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उन श्रीगुरूजी द्वारा स्वेच्छा से वर्णित कथा आदि से प्रसन्न हुए मनस्वी कार्यकर्ता, संघतत्त्व की मधुरवाणी को सुनना चाहते थे ।। ११ ।।

न युवानः प्रगल्भन्ते प्रायो धीरा अपि स्वयम् ।
पुरः परमपूज्यानां वक्तुं जिज्ञासितं स्वकम् ।।१२।।

प्रायः स्वयं धीर युवकगण भी परमपूजनीय श्रीगुरूजी के समक्ष अपनी जिज्ञासा को रखने में संकोच करते थे ।। १२ ।।

तेषां कश्चिद् विजिज्ञासुः प्राश्निकश्च स्वभावतः ।
श्रद्धया परया प्राह श्रीगुरुं स्वमनोगतम् ।।१३।।

उन युवकों में से स्वभाव से ही किसी जिज्ञासु प्रष्टा ने परमश्रद्धा से श्रीगुरूजी के सामने अपने मन के विचार रक्खे ।। १३ ।।

युवक उवाच–

नमः श्रीगुरुदेवाय राष्ट्रधर्मप्रबोधिने ।
नमः परमपूज्याय मातृभूदैवताय ते ।।१४।।

युवक बोला—

राष्ट्र धर्म का प्रबोधन कराने वाले, परम पूजनीय तथा मातृभूमि के परम-भक्त श्रीगुरूजी आपको प्रणाम करता हूं ।। १४ ।।

केनाऽपि पूर्वपुण्येन सुलभं खलु मादृशाम् ।
दर्शनं भाषणं वा ते सौहार्दं च विशेषतः ।।१५।।

किसी पूर्वजन्म के पुण्य से ही मेरे जैसों को आपका दर्शन, भाषण और आपका विशेष सौहार्द प्राप्त हुआ है ।। १५ ।।

राष्ट्रकल्याणकारीणि कार्याणि विविधान्यपि ।
विगणय्य त्वयैकं हि संघकार्यं परं मतम् ।।१६।।

राष्ट्र का कल्याण करने वाले आपने, विविध कार्यों को अपनी गणना में से हटा कर केवल संघकार्य को ही सर्वश्रेष्ठ माना है ।। १६ ।।

सुदृढा यद्यपि श्रद्धा संघकार्ये हि मादृशाम् ।
अन्यकार्यविमोहेन मतिर्दोलायते परम् ।।१७।।

गुरूजी यद्यपि मेरे जैसे लोगों की श्रद्धा संघ कार्य में ही सुदृढ है किन्तु बुद्धि अन्य (सामाजिक, राजनैतिक, शैक्षणिक आदि) कार्यों में विमोहित होकर चलायमान हो जाती है ।। १७ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचित् सामाजिकं कार्यं कदाचित् राजनैतिकम् ।
क्षणं शैक्षणिकं किं वा विचालयति नो मनः ॥१८॥

हम सबका मन कभी अन्य सामाजिक कार्यों में, कभी राजनैतिक कार्यों में अथवा किसी क्षण शैक्षणिक कार्यों में विशेष रूप से लगने लग जाता है ॥१८॥

तदिमामस्थिरां श्रद्धां कर्तुं सुस्थेयसीं मम ।
श्रेष्ठत्वं संघकार्यस्य सम्यगद्य निवेदय ॥१९॥

अतः इस अस्थिर मेरी श्रद्धा को सुस्थिर करने के लिये संघकार्य की श्रेष्ठता को आप भली भांति बताने की कृपा करें ॥ १९ ॥

सन्देहं चलचित्तस्य तस्य हर्तुमशेषतः ।
सिद्धान्तं संघकार्यस्य सङ्घयोगी जगाद सः ॥२०॥

चलचित्त उस युवक का पूर्णतः संदेह निवारण करने हेतु संघ योगी उन श्रीगुरूजी ने संघ कार्य के सिद्धान्त को बताया ॥ २० ॥

॥ इतिश्रीसंघगीतायां **'संघजिज्ञासा'** नाम प्रथमोऽध्यायः ॥

"सङ्घमाहात्म्यम्"

द्वितीयोऽध्यायः

श्रीगुरुः प्रोवाच–

अपारभूमिविस्तारमगण्यजनसंकुलम् ।
राष्ट्रं संघटनाहीनं प्रभवेन्नात्मरक्षणे ॥२१॥

श्रीगुरूजी बोले,

अपार भूमि विस्तार वाला जिसमें असंख्य जनसंख्या हो, संघटन रहित वह राष्ट्र अपनी रक्षा करने में समर्थ नहीं होता ॥ २१ ॥

धनधान्यसुसम्पन्नं स्वर्णरत्नमयाकरम् ।
सुसंहतिं विना राष्ट्रं न भवेद्विभवास्पदम् ॥२२॥

धन्यधान्य से सुसम्पन्न, सोने और रत्नों की प्रचुर खानों से परिपूर्ण हो ऐसा राष्ट्र भी संगठित समाज के बिना वैभवशाली नहीं हो सकता ॥ २२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीरेतिहासविख्यातं साधुचारित्र्यविश्रुतम् ।
विना संघटनं राष्ट्रं न भवेद् बलवत्तरम् ।।२३

वीरों के इतिहास से विख्यात श्रेष्ठ चरित्र से प्रसिद्ध राष्ट्र यदि संगठित नहीं हैं तो वह अधिक बलशाली नहीं होवे ।। २३ ।।

धर्मसंस्कृतिसम्पन्नं धीरोदात्तगुणान्वितम् ।
संघशक्ति विना राष्ट्रं न भवेज्जगदादृतम् ।।२४।।

उत्तम धर्म और श्रेष्ठ संस्कृति वाला, धीरोदात्त गुणों से परिपूर्ण भी राष्ट्र संगठित शक्ति के बिना संसार में आदर का पात्र नहीं हो सकता ।। २४।।

जन्मस्थानं महर्षीणां तपःस्थानं च योगिनाम् ।
न जगद्वन्द्यतां राष्ट्रं भजेत् संघबलं विना ।।२५।।

चाहे महर्षियों का जन्म स्थान हो, चाहे योगियों की तपोभूमि हो किन्तु जिस राष्ट्र के निवासियों में संगठन का बल नहीं होता वह संसार के लिए वन्दनीय नहीं हो सकता ।। २५ ।।

न राष्ट्रं राष्ट्रतां याति यद्यसंघटिता जनाः ।
निदानं राष्ट्रभावस्य सुसंघटितजीवनम् ।।२६।।

जिस राष्ट्र में लोग संगठित नहीं हैं वह राष्ट्र राष्ट्रत्व को प्राप्त नहीं कर पाता । सुसंगठित जीवन ही राष्ट्रभाव का मूल कारण है ।। २६ ।।

अकृत्वा धीरवीराणां महासंघटनं दृढम् ।
केन राष्ट्रं परायत्तं स्वायत्तीकृतमात्मनः ।।२७।।

अपने राष्ट्र में निवास करने वाले धीर वीर लोगों का दृढ एवं महान् संगठन किए बिना किसने पराधीन राष्ट्र को स्वाधीन किया है ? ।। २७ ।।

कृते मन्त्रप्रयोगे या त्रेतायां तन्त्रसाधने ।
द्वापरे व्यूहरचने शक्तिः संघे हि सा कलौ ।।२८।।

पुरातन काल में कृतयुग में जो शक्ति मंत्र प्रयोग में होती थी वह त्रेतायुग में तन्त्र साधनों द्वारा प्रगट हुई, वही शक्ति द्वापर में व्यूह रचना द्वारा प्रगट हुई है और कलियुग में वही शक्ति संगठन में निवास करती है ।। २८ ।।

विपत्सु वज्रधैर्याणां संग्रामे वज्रदेहिनाम् ।
संघो राष्ट्रविपत्काले सद्वज्रकवचायते ।।२९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विपत्ति के समय पराकाष्ठा का धैर्य रखने वाले को, संग्राम के अवसर पर वज्र के सदृश दृढ देह वाले को और राष्ट्र पर जब आपत्ति आती है तब उसे संगठित शक्ति ही उत्तम वज्र की तरह कवच बन कर बचाती है ॥ २९ ॥

अप्यल्पशक्तेरस्पर्द्धेस्तथाऽल्पविषयस्य च ।
सुसंहतस्य राष्ट्रस्य नियता विश्वमान्यता ॥३०॥

अल्प शक्ति वाले, अल्प समृद्धिवाले तथा अल्प साधनों वाले सुसंगठित राष्ट्र को विश्व में मान्यता निश्चित मिलती है ॥ ३० ॥

शस्त्रसंभारमूलं हि प्रतीकारफलं बलम् ।
संघमूलं समुत्कर्ष-निःश्रेयसफलं बलम् ॥३१॥

जिस राष्ट्र का शस्त्रास्त्रों के संग्रह का मूल बल राष्ट्र को सुरक्षित रखने का फल प्रदान करवाता है ऐसा ही संगठन या बल जिस राष्ट्र के मूल में है उसे भौतिक और आध्यात्मिक दोनों प्रकार की समुन्नति का फल देने वाला होता है ॥ ३१ ॥

संघो दधाति सामर्थ्यं सामर्थ्यात् सर्वयोग्यता ।
योग्यत्वाद् यः समुत्कर्षो निरपायः स सर्वथा ॥३२॥

सामाजिक संगठन सामर्थ्य को धारण करता है सामर्थ्य से सब प्रकार की योग्यता प्राप्त होती है । योग्यता द्वारा जो समुत्कर्ष होता है वह सर्वथा विघ्न रहित होता है ॥ ३२ ॥

विदुषां शास्त्रतः शक्तिः वीराणां सा च शस्त्रतः ।
धनश्रमादितोऽन्येषां शक्तिः सर्वस्य संघतः ॥३३॥

विद्वान् लोग शास्त्रों से जिस शक्ति को प्राप्त करते हैं, वीरों को वह शक्ति शस्त्रों द्वारा मिलती है (अन्य) लोग धन और श्रम से जिस शक्ति को प्राप्त करते हैं सभी को संगठन द्वारा वह शक्ति प्राप्त होती है ॥ ३३ ॥

ज्ञानसंरक्षणे विप्राः क्षत्रिया राष्ट्ररक्षणे ।
संपत्संवर्धने वैश्याः संघतः प्रभवन्ति ते ॥३४॥

ब्राह्मण ज्ञान के संरक्षण में, क्षत्रिय राष्ट्र के संरक्षण में और वैश्य सम्पत्ति के संवर्धन करने में, सब संगठन से ही समर्थ होते हैं ॥ ३५ ॥

असमर्था विनिर्मातुं कुशला अपि शिल्पिनः ।
विना संघटनं किंचित् कलाकृत्यमलौकिकम् ॥३५॥

कुशल शिल्पकार भी बिना संगठन के किसी भी अलौकिक कलाकृति के निर्माण में असमर्थ रहते हैं ॥ ३५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रवादः साम्यवादो धर्मवादोऽथवाऽपरः ।
लोकसंघटनेनैव भजते दृढमूलताम् ॥३६॥

राष्ट्रवाद, साम्यवाद अथवा दूसरा धर्मवाद भी लोगों को संगठित कर के ही दृढमूलता को प्राप्त होता है ॥ ३६ ॥

सामर्थ्यमूलं स्वातन्त्र्यं श्रममूलं च वैभवम् ।
न्यायमूलं सुराज्यं स्यात् संघमूलं महाबलम् ॥३७॥

सामर्थ्यमूल स्वतंत्रता व श्रममूल वैभव न्यायमूल सुराज्य तथा संगठन मूल महाबल प्राप्त होता है ॥ ३७ ॥

॥ इतिश्रीसंघगीतायां 'सङ्घमाहात्म्यं' नाम द्वितीयोऽध्यायः ॥

तृतीयोऽध्यायः

युवक उवाच—

संघस्यापरिहार्यत्वं सामर्थ्यार्थं त्वयोदितम् ।
तद्धि विश्वजनीनत्वाद् ब्रह्मोद्यमिव भाति मे ॥३८॥

युवक बोला—

संघटन की अपरिहार्यता और सामर्थ्य आपने बतलाया। वह विश्वजनीन होने से मुझे ब्रह्मवाक्य की भांति प्रतीत होता है ॥ ३८ ॥

सत्यनिष्ठा अपि प्रायः सापवादं वदन्ति ते ।
सत्यं निरपवादं हि संघतत्त्वं त्वयोदितम् ॥३९॥

वे लोग सत्यनिष्ठा को प्रायः सापवाद ही प्रगट करते हैं। आपने निरपवाद सत्य जो संघतत्व है उसे बताया है ॥ ३९ ॥

सार्वभौमो हि संघस्य सिद्धान्तः सार्वकालिकः ।
विशदीक्रियतां भूयः सन्देहविनिवृत्तये ॥४०॥

सार्वभौम और सार्वकालिक जो संघ का सिद्धान्त है उसे आप फिर सन्देह निवृत्ति के लिऐ विस्तार से बतावें ॥ ४० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीगुरुः प्रोवाच–

योगक्षेमाय धर्मस्य सभ्यतायाः सुसंस्कृतेः ।
नैवान्यो विद्यते पन्था लोकसंघटनं विना ॥४१॥

श्रीगुरूजी बोले–

धर्म, सभ्यता और संस्कृति के योगक्षेम हेतु समाज के संगठन के बिना दूसरा कोई मार्ग नहीं है ॥ ४१ ॥

यतो यतो हि धर्मस्य ग्लानिर्लोकेषु जायते ।
ततस्ततः समाजस्य सामर्थ्यं परिहीयते ॥४२॥

जैसे जैसे समाज में संगठन के लिये ग्लानि होती है वैसे-वैसे समाज का सामर्थ्य क्षीण होने लगता है ॥ ४२ ॥

आदौ संघटयेद् राष्ट्रं ततः कांक्षेत् समुन्नतिम् ।
संघशक्ति विना राष्ट्रं कुतो वा कुत उन्नतिः ॥४३॥

सर्व प्रथम राष्ट्र का संगठन करे तत्पश्चात् समुन्नति की आकांक्षा करे। संगठित शक्ति के बिना राष्ट्र कहां और समुन्नति कहां ! ॥ ४३ ॥

सम्पत्तयः परायत्ताः प्रत्यासन्ना विपत्तयः ।
संघशक्तिविहीनानां जीवनं मरणास्पदम् ॥४४॥

संगठित शक्ति से विहीन राष्ट्र की सम्पत्ति दूसरों के हाथों में चली जाती है तथा विपत्तियां उसके सन्निकट आने लगती हैं उस राष्ट्र के लोगों का जीवन मरण तुल्य हो जाता है ॥ ४४ ॥

स्वराज्यं रामराज्यं स्याद् लोककल्याणसाधनम् ।
लोकायत्तं लोकमान्यं यदि संघटनात्मकम् ॥४५॥

समाज के प्रमुख लोगों द्वारा संचालित, समाज द्वारा मान्यता प्राप्त यदि संगठित समाज है तो वहां स्वराज्य रामराज्य हो जायेगा और समाज के कल्याण का साधन बन जायेगा ॥ ४५ ॥

अन्तः प्रवर्धते मैत्री क्षीयते बाह्यशत्रुता ।
दृढसंघटिते राष्ट्रे सामर्थ्यं वर्धतेतराम् ॥४६॥

संगठित समाज में अन्दर से मित्रता बढती है और बाहर की शत्रुता क्षीण होने लगती है। दृढ संगठित राष्ट्र में सामर्थ्य बढता ही जाता है ॥ ४६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वदा कलहायन्ते यावद् विघटिता जनाः ।
वर्धतेऽन्योन्यसौहार्दं प्रवृद्धे संघजीवने ॥४७॥

जब तक लोग विघटित रहते हैं तब तक सदा कलह बढता जाता है और संगठित जीवन होने पर आपस में एक दूसरे में मैत्री बढने लगती है ॥ ४७ ॥

जातीनां सम्प्रदायानां भाषाणां विविधात्मनाम् ।
भेदैर्विघटिते राष्ट्रे संघधर्मो हितावहः ॥४८॥

जातियों के, सम्प्रदायों के, भाषाओं के विविध भेदों से विघटित राष्ट्र में, संगठित रहने का धर्मपालन, कल्याणकारक होता है ॥ ४८ ॥

जातिद्वेषो धर्मनाशो देशद्रोहः स्वविस्मृतिः ।
यत्र प्रवर्धते तत्र संघधर्मो हि तारकः ॥४९॥

जहाँ जातिगत द्वेष, धर्म का नाश, देशद्रोह तथा 'स्व' की विस्मृति बढती है वहीं संगठित रहना या धर्मपालन ही उद्धार करनेवाला होता है ॥ ४९ ॥

विकासयति सद्भावान् विलोपयति दुर्गुणान् ।
विनाशयति विद्वेषान् कार्यं संघटनात्मकम् ॥५०॥

संगठनात्मक कार्य सद्भावों को विकसित करता है दुर्गुणों को नष्ट करता है और विद्वेषों को विनष्ट करता है ॥ ५० ॥

सद्वृत्तयः प्रकाशन्ते क्षीयन्ते दुष्प्रवृत्तयः ।
सुसंहते समाजे हि रमन्ते खलु देवताः ॥५१॥

ऐसे समाज में सद्वृत्तियां प्रकाशित होती हैं दुष्प्रवृत्तियां क्षीण होती हैं सुसंगठित समाज में देवता रमण करते हैं ॥ ५१ ॥

सज्जनानां परित्राणे वज्रपञ्जरसन्निभम् ।
लोकसंघटनं लोके ध्रुवं सामर्थ्यमैश्वरम् ॥५२॥

सज्जनों की रक्षा कहने में वज्र के पिंजरे के समान समाज का संगठन संसार में ईश्वरीय-अडिग सामर्थ्य देता है ॥ ५२ ॥

दुर्मदानां परिध्वंसे यत् सुदर्शनचक्रवत् ।
लोकसंघटनं लोके नूनमायुधमैश्वरम् ॥५३॥

दुर्मदों का विनाश करने में सुदर्शन चक्र की तरह समाज का संगठन निश्चित ही समाज में ईश्वरीय आयुध है ॥ ५३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहूपदेशमात्रेण मुहुः प्रवचनेन च ।
समाजे स्वार्थसंसक्ते संघभावो न वर्धते ।।५४।।

बहुत अधिक उपदेशमात्र करने से बार-बार प्रवचन करने से समाज के स्वार्थ में आसक्त होने पर संगठन का भाव नहीं बढता है ।। ५४ ।।

सुजना कुजनायन्ते मित्राण्यायान्त्यमित्रताम् ।
व्यक्तिस्वार्थहते राष्ट्रे संघकार्यं सुदुर्घटम् ।।५५।।

तब सज्जन दुर्जन हो जाते हैं मित्र भी शत्रु बन जाते हैं । व्यक्तिगत स्वार्थों से हत राष्ट्र में संगठन का कार्य होना बहुत कठिन है ।। ५५ ।।

क्षणे क्षणे विरोधश्च विपदश्च पदे पदे ।
प्रलोभनान्यनन्तानि संघकार्यं हि दुष्करम् ।।५६।।

जहां क्षण क्षण पर विरोध है, पद-पद पर विपत्तियां हैं और जहां लोगों के समक्ष अनन्त प्रलोभन हैं वहां संघ कार्य (संगठन का कार्य) होना बहुत कठिन है ।। ५६ ।।

यद् दुष्करं दुरापं च कल्याणोदर्कमन्ततः ।
तदेव यत्नतः साध्यं प्राणैरपि धनैरपि ।।५७।।

जो संघटन कार्य बहुत कठिन है और कठिनाई से करने योग्य है अन्ततोगत्वा जो राष्ट्र कल्याण के लिये बालरवि के सदृश है उस संगठन को प्राणों का भी उत्सर्ग करके, धन का भी परित्याग करके, यत्न पूर्वक सिद्ध करना चाहिये ।। ५७ ।।

।। इतिश्रीसंघगीतायां **'संघधर्मो'** नाम तृतीयोऽध्यायः ।।

"विहिताचारः"

चतुर्थोऽध्यायः

युवक उवाच–

संघकार्यस्य लोकेस्मिन् कल्याणोदर्कता तथा ।
युक्तियुक्तता प्रोक्ता श्रीगुरो बहुधा त्वया ।।५८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युवक बोला—

इस संसार में संगठन के कार्य द्वारा कल्याणरूपी फल तथा उस कार्य के लिये प्रयत्नों के विषय में भी हे श्री गुरूजी आपने अनेक बातें बताईं है ॥ ५८ ॥

निशम्यैतानि सूक्तानि छांदसानीव तेऽधुना ।
ज्योतिषेव तमोऽन्तःस्थं लीयते संशयात्मकम् ॥५९॥

आपके इन वैदिक मन्त्रों के सदृश सूक्तों को सुनकर अब हमारा संशयात्मक अन्तःकरण का अन्धकार ज्योति किरण से जैसे नष्ट हो जाता है वैसे नष्ट हुआ है ॥ ५९ ॥

यदुष्कर्षावहं कार्यं तत् तु प्रोक्तं सुदुष्करम् ।
केनाचारेण सुकरं तद् भवेदिति कथ्यताम् ॥६०॥

समाज एवं राष्ट्र के उत्कर्ष के लिये जो सुदुष्कर कार्य हैं वह तो आपने बताया अब वह किन व्यवहारों को करने से सुगम हो यह बतावें ॥ ६० ॥

श्रीगुरुः प्रोवाच–

श्रूयतां संघकार्यार्थम् आचारो यो हितावहः ।
न सिद्ध्यति सदाचारं विना कार्यं शुभंकरम् ॥६१॥

श्रीगुरूजी बोले —

संघ कार्य के लिये जो हितकर आचार (आचरण) है वह सुनो । शुभ फल देनेवाले सदाचार (उत्तम व्यवहार) के बिना कार्य सिद्ध नहीं होता ॥ ६१ ॥

उद्धरेदात्मनात्मानं सन्ततव्रतसाधनैः ।
आत्मोद्धारं विना लोके परोद्धारः सुदुष्करः ॥६२॥

व्यक्ति स्वयं के कठोर एवं सतत चलने वाले व्रत के साधनों से स्वयं का उत्थान करे । स्वयं के समुत्थान (समुद्धार) के बिना दूसरे का समुद्धार करना कठिन है ॥ ६२ ॥

सर्वमेव मनोमूलं कार्यं संघटनात्मकम् ।
वैमनस्यं न तत् संघे लेशतोऽप्यवशेषयेत् ॥६३॥

संघटन का सम्पूर्ण कार्य मनोमूल (मन को तल्लीन करके करने योग्य) है । संघ कार्य में वैमनस्यता (मन की उदासीनता) थोड़ी सी भी न रक्खे ॥ ६३ ॥

वाचा मित्रत्वमायान्ति वाचैवायान्ति शत्रुताम् ।
इति विज्ञाय संघार्थी सदा वाचंयमो भवेत् ॥६४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाणी से ही मित्रता होती है और वाणी से ही शत्रुता होती है यह ध्यान में रख कर संगठन चाहने वाला व्यक्ति सदा वाणी के संयम वाला रहे ।। ६४ ।।

संघकार्यैकनिष्ठस्य वरिष्ठस्य विशेषतः ।
वाचो भवेयु र्मधुरा सर्वलोकमनोहराः ।।६५।।

संगठन के कार्य में ही पूर्णतः लगे हुए जो वरिष्ठ लोग हैं विशेषतः उनकी तो वाणी मधुर हो ही और सभी लोगों के लिये मनोहर भी हो ।। ६५ ।।

ब्रूयात् सयुक्तिकं सौम्यं स्वानुभूतिप्रमाणकम् ।
विरोधिनः सुबुद्धस्य परिवर्तयितुं मतम् ।।६६।।

बुद्धिमान पुरुष को विरोधी लोगों को परिवर्तित करने के लिये (अनुकूल बनाने के लिये) युक्तियुक्त, सौम्य और अपने अनुभव में आये हुए प्रमाणों को देते हुए वचन बोलने चाहिये ऐसा मेरा मत हैं ।। ६६ ।।

एहि ब्रूहि समाधेहि समाश्वसिहि मा स्म भैः ।
आपन्नमिति यो ब्रूयात् तस्य लोको वशंवदः ।।६७।।

आपत्ति में फंसा कोई व्यक्ति आवे तो उसे आओ, बोलो ऐसा कहे, उसका समाधान करे उसे अच्छी प्रकार आश्वासन दे, मत डरो–यह कहे तो उस व्यक्ति के सभी लोग अनुयायी (प्रेमी) हो जाते हैं ।। ६७ ।।

विरोधिनोऽपि श्रोतव्यम् आत्मनीनतया मतम् ।
तत्कालं न विरोद्धव्यं यथाकालं तु खण्डयेत् ।।६८।।

विरोधी को भी आत्मीयता दिखाते हुए सुनना चाहिये तत्काल उसका विरोध नहीं करना चाहिये । समय देख कर कालान्तर में उसकी अनुचित बात का खण्डन करना चाहिये (तत्काल नहीं) ।। ६८ ।।

वाक्ताडनं प्रमत्तस्य परीवादं रिपोरपि ।
प्रतिवादं विमूढस्य वर्जयेल्लोकसंग्रही ।।६९।।

प्रमत्त को डांटना, शत्रु की भी निन्दा करना मूर्ख का प्रतिवाद करना लोकसंग्रही इन सबको छोड दे ।। ६९ ।।

यथात्मनस्तथान्यस्य रहस्यं न प्रकाशयेत् ।
विजानीयाच्च वैगुण्यं यथान्यस्य तथात्मनः ।।७०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैसे स्वयं के रहस्य को कभी प्रगट न करे वैसे ही कभी किसी अन्य के भी रहस्य को प्रगट न करे। वैसे ही अपने दुर्गुणों को तथा अन्यों के दुर्गुणों को भी ध्यान में रखे ॥ ७० ॥

पितृवद् गुरुवृद्धेषु महिलासु च मातृवत् ।
भ्रातृवत् स्ववयस्येषु शिशुबालेषु पुत्रवत् ॥७१॥

अपने से बड़े और वृद्ध लोगों को पिता के समान, महिलाओं को माता के समान, सम आयु वालों को अपने भ्राता के समान और शिशुओं को अपने पुत्र की तरह जानें ॥ ७१ ॥

परगेहे स्वगृहवत् परकार्ये स्वकार्यवत् ।
स्थायिभावेन वर्तेत संघकार्यपरायणः ॥७२॥

संघ कार्य में लगा हुआ व्यक्ति दूसरे के घर को अपने घर की तरह दूसरे के कार्य को अपने कार्य की तरह स्थायीभाव से व्यवहार करे ॥ ७२ ॥

एकाकी नैव भुञ्जीत नैवैकाकी रमेत च ।
न चैकाकी नयेत् कालं संघकार्यपरायणः ॥७३॥

संघ कार्य में लगा हुआ व्यक्ति कभी अकेला न खाय, न अकेला खेले, न अकेला रहकर समय बितावे। ७३ ॥

सदा प्रवासी नीरोगो भद्रवेशः शुचिस्मितः ।
हितकारी मिताहारी भवेत् संघपरायणः ॥७४॥

संघ कार्य में परायण व्यक्ति सदा प्रवास में लगा रहे, नीरोग रहे, उत्तमवेश में रहे, शुद्ध पवित्र और हंसमुख रहे। वह दूसरों के लिये हित करने वाला, स्वयं कम आहार लेने वाला होवे ॥ ७४ ॥

श्रद्धावतः सुचारित्र्यान् सौजन्यविनयान्वितान् ।
व्यक्तिशः समुपादाय सत्संस्कारैः समुन्नयेत् ॥७५॥

श्रद्धावानों को, अच्छे चरित्रवालों को, सुजनों को तथा विनम्र स्वभाववालों से व्यक्तिशः सम्पर्क बढाकर सत्संस्कारों के द्वारा उनकी समुन्नति करे ॥ ७५ ॥

सोत्साहानां मनाक् कुर्यात् काले सत्त्वपरीक्षणम् ।
प्रोत्साहयेन्निरुत्साहान् न वाचाऽपितु कर्मणा ॥७६॥ —क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd. No. 1379/51
R. J. No. 2617
Licence No. PP. 9.
Licence to Post
Without
Prepayment

भारती

सूक्ति-सुधा

डॉक्टर श्रीगङ्गाधरभट्टः

सह-आचार्यं, संस्कृतविभागे, राजस्थानविश्वविद्यालयः, जयपुरम्

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ।।

(चाणक्य नीति १४-१.)

पृथिवी पर जल, अन्न और सुन्दर काव्य-ये तीन रत्न माने गये हैं परन्तु मूर्ख लोगों ने पत्थर के टुकडों को रत्न को संज्ञा दी है। मानव जीवन में जल और अन्न अपरिहार्य हैं। इनके बिना जीवन यापन सम्भव नहीं तथा साथ ही काव्य के अमृत का आस्वाद प्राप्त हो तो फिर और कौनसा रत्न अवशिष्ट रहता है।

राजपत्नी गुरोः पत्नी मित्रपत्नी तथैव च ।
पत्नी माता स्वमाता च पञ्चैते मातरः स्मृताः ।।

(चाणक्य नीति ५,२३)

राजा की पत्नी, गुरु की पत्नी, मित्र की पत्नी, पत्नी की माता तथा अपना जन्मदात्री माता ये पांचों मातृ पद की अधिकारिणियाँ हैं। शासक की पत्नी, गुरु जो विद्यादान देकर छात्र को संसार सागर से सन्तरण की शिक्षा देता है-उसकी पत्नी अवस्था में बडे मित्र, की पत्नो, पत्नी और स्वयं को जन्म देने वालो माता ये सब माता के समान सम्माननीय कहे गये हैं। इनके स्नेह एवं आशीर्वाद से लाकयात्रा सुगम, सफल और सानन्द सम्पन्न होती है।

जनिता चोपनेता च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ।।

(स्कन्धपुराण-रेवाखण्ड-३,२६,५४,)

माता के समान ही पिता भी पांच कहे गये हैं। जन्म देनेवाला पिता, यज्ञोपवीत कर वेदाध्ययन की शिक्षा देनेवाला तथा जो विद्यादान करता है ये पितृवत् समादरणीय एवं पूजनीय हैं। इनके अतिरिक्त अन्न देनेवाला तथा भय से सन्त्राण करने वाला राजा भो पिता के समान ही होता है। जनक जन्म देता है आचार्य यज्ञोपवीत संस्कार करके उसे अध्ययन के उपयुक्त बनाता है, वेदाध्ययन करता है तथा गुरु अन्य शास्त्रों का अध्ययन कराता है भय से रक्षा करने वाला तथा जीविकोपार्जन के लिए अन्न धन आदि देनेवाला राजा ये सभी पिता के समान पालन पोषण कर विकास के पथ पर अग्रसर करते हैं और वे अत्यन्त पूजा के योग्य हैं।

प्रकाशकः-संस्कृत प्रचार परिषद् राजस्थान,
पता—भारती भवन, बी. १५ न्यू कालोनी, जयपुर-३०२००१। दूरभाष-७५४६६
राधेश्याम द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित। दूरभाष-६१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृत-मासपत्रिकायाः

श्री बद्रीनाथः



स्वातन्त्र्यस्य प्रतीकोऽयं
सुख-शान्ति-समृद्धिदः ।
समुत्पतन् व्योम्नि राष्ट्र-
ध्वजो विजयतेतराम् ॥

—श्रीरामगोपालशास्त्री, जयपुरम्

श्री द्वारका

जगन्नाथः

रामेश्वरः

म् ३१

वरा:

ङ्कः १०

अगस्तः

१९८१

वार्षिकमूल्यम् पञ्चदशमुद्राः १५.००

एकप्रतेः—सार्धैकं रूप्यकम् १.५०

न्त्रतादिवस-रक्षाबन्धन-
विशेषाङ्कः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आन्ध्र-उत्तरप्रदेश-
बिहार-पञ्चनद-सर्वकारैः स्वीकृता

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

क्र.सं	विषयाः	निबन्धारः	पृष्ठ-संख्या
१.	मङ्गलम्	श्रीरामगोपालशास्त्री, जयपुरम्	३४३
२.	मासावतरणम्	,, ,, ,,	३४३
३.	उपनिषत्	डा० शिवदत्तशर्मा चतुर्वेदी वाराणसी	३४४
४.	सम्पादकीयम्	प्रधानसम्पादकः	३४५
५.	श्रद्धाञ्जलिः	श्रीदीनानाथत्रिवेदी मधुपः	३४८
६.	आयुर्वेद-स्तम्भः—	वी० बी० नटराज शास्त्री, त्रिचिरापल्ली	३५०
७.	संघगीता	ले० श्रीश्रीधरभास्करवर्णेकरः नागपुरम्	३५५
८.	देवो भक्तं प्रति	कुमारी कुमुद कान्हे रायपुर	३६१
९.	प्रार्थना		३६२
१०.	विश्व-वार्ता:—	ले० श्रीविश्वदर्शी	३६३
११.	संस्कृतव्याकरणप्रवेशिका	(सौ) सुनीति दुबले	३६५
१२.	नारी-स्तम्भः—	डा० श्रीमती राजेश्वरीभट्टः, जयपुरम्	३६७
१३.	पुस्तक–समीक्षा	श्रीगङ्गानाथझा, इलाहाबाद	३६८
१४.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, जयपुरम्	३७०
१५.	धिङ् मेघ !	डा० शिवदत्त शर्मा चतुर्वेदी वाराणसी	३७६
१६.	अभिलाषोऽस्माकम्	श्रीरामस्वरूपशास्त्री, बम्बई	३७९
१३.	सूक्ति-सुधा	डा० श्रीगङ्गाधरभट्टः, जयपुरम्	३७९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानसंरक्षकाः–
जगद्गुरुशङ्कराचार्य-
स्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः
कांचीकामकोटिपीठाधिपतयः

संस्थापकः
स्व. श्री उमाकान्तकेशव
आप्टे
(बाबा साहब आप्टे)

प्रधान सम्पादकः
जगदीशशर्मा
साहित्याचार्यः
सम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
सहसम्पादकः
रामगोपालशास्त्री जपुयरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

संरक्षकः
श्रीदेवीशङ्करतिवाड़ी
जयपुरम्
प्रबन्ध-सम्पादकः
श्रीगिरिराजशर्मा
भारती-भवनम्
बी १५, न्यू कालोनी
जयपुरम्–१
(राजस्थानम्)

वर्षम् ३१ | श्रावणः, विक्रमाब्दः, २०३८ [अगस्तः, १९८१] | अङ्कः १०

मङ्गलम्

सौरी-तटे कमल-गुञ्जित-भृङ्ग-पुञ्जे
दोलाऽऽलिभिर्विरचिताऽस्ति कदम्ब-कुञ्जे ।
आरुह्य तामतिसुखेन सुदोल्यमानौ
श्रीमन्मुकुन्दचरणौ शरणं प्रपद्ये ।।

मासावतरणम्

इलां समां श्याममयीं प्रकुर्वन्
दोला-सुखं सर्वजनेषु यच्छन् ।
आश्लेषयन् भूमिरुहैर्लताश्च
मनोहरः **श्रावणमास** एति ।।

—श्रीरामगोपालशास्त्री, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनिषत्

डा० शिवदत्तशर्मा चतुर्वेदी
प्रवक्ता–साहित्य, काशी हिन्दू विश्वविद्यालय, B ३ । १ F. F., B. H. U. वाराणसी

(१)

उपनिषदिति शब्दोऽयं
सिद्धान्तार्थे प्रयुक्तोऽस्ति
सिद्धान्ताविर्भावे
कथितं "तत्रेयमुपनिषद् भवति"

(२)

प्रथमं सिद्धान्तानां
स्फूर्तिः संजायते चित्ते
पश्चात् क्रियासु तेषां
प्रयोगयोगः समायाति

(३)

वेदान्तेषु ग्रन्था
उपनिषदिति वा समाख्याताः
परमात्मतत्त्वसाक्षात्कारे
सिद्धान्तभूतास्ते

(४)

"आत्मा वा द्रष्टव्यः
श्रोतव्यश्चाथमन्तव्यः
अथ च निदिध्यासनमपि
कार्यं तस्येति " ऋषिराह

(५)

कोऽसावात्मा ? तस्य च
दर्शनमननादयः कथं वा स्युः ?
सर्वेऽप्येते विषयाः
साङ्गोपाङ्गाः समादिष्टाः

(६)

ऊहापोहाः सर्वे
मतभेदाश्चाथ भाष्येषु
सम्यक् प्रदर्शिता वा
मान्यतमैस्तावदाचार्यैः

(७)

सर्वापीयं सरणिः
परमेशान्वेषणे दृष्टा
संसारे ज्ञानानां
गौरवभूता प्रतिष्ठिता भवति

(८)

लोके विज्ञानानां
विपुलं यद् यत् क्रियारूपम्
सर्वेषामपि तेषां
मूलं सुविचारितोपनिषत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आबालवृद्धमहिलामानसमोदावहमहबहलेऽस्मिन्भरतभूभागे को नाम मासो यत्र द्वित्राः पञ्चषा वा न समापतेयुरुत्सववासराः। सर्वेषां मासानामन्वर्थनामधेयतयास्यापि तत्त्वं स्वत एव परापतति। वैदेशिकाभिमतमासनाम्नामवैज्ञानिकत्वमिव नास्ति भारतीयमासनामधेयानामवैज्ञानिकत्वम्। प्रवर्त्तमानोऽयं श्रावणो मासः शाब्दिकसरण्या श्रवणेन युक्ता-पूर्णिमा श्रावणी सास्त्यस्मिन् मासे स श्रावणो मास इति श्रावणसंज्ञायाः सार्थकत्वोपपत्तिः। त्रयीसमलंकृतश्रोत्रिय इव मासोयमुत्सवत्रयीसमाश्लिष्टोऽत्रश्रावणीकर्मणोऽवश्यमनुष्ठेयतायाः शास्त्रप्रतिपादितत्वादयमेव-विचारसहतामालम्बते। उपनयनसंस्कारसंस्कृतैरखिलैरपि द्विजातिभिरुपाकर्मावश्यमनुष्ठातव्यन्नित्यत्वात्। तदेवोक्तं नारायणवृत्तौ-"अथातोऽध्यायोपाकरण" मिति सूत्रव्याख्याने यस्माद् ब्रह्मयज्ञाध्ययनं नित्यम् अत उपाकर्मावश्यकमित्यादिना ब्रह्मयज्ञाङ्गताऽप्युक्ता। कृतोपनयनसंस्कारेणोपाकर्मप्रथमारम्भः प्रथमवर्षे गुरुशुक्रयोरुदयास्तकाले न विधातव्यः। उपाकृतौ ब्रह्मचारिगृहस्थवानप्रस्थानां समेषामेवाधिकारः सन्यासिनो विहाय न केवलं ब्रह्मचारिण एव। तथा च जीर्णप्रयोगरत्ने गोभिलः "उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते" धारणाध्ययनाङ्गत्वात् गृहिणां ब्रह्मचारिणाम्।" कर्मैतदोषधिप्रादुर्भावे श्रावण्यां कार्यमन्यथा तु प्रौष्ठपद्यामपि। यद्यपि चतुर्वेदानां भिन्नशाखानां भिन्नभिन्नकाला निरूपितास्तथापि सर्वेषामत्रैव समावेशादुपाकर्मानुष्ठानकालस्य त्रयः पक्षा निगदिताः। श्रावण्यां श्रवणेन पंचम्यां हस्तेन वा। श्रवणयुक्तायां पूर्णिमायां इत्येकः पक्षः। श्रवणाभावे केवलायां पूर्णिमायाम्। हस्तयुक्तायां पंचम्यां वा। हस्तयोगाभावे केवलायां पंचम्यामाहोस्वित्केवले हस्त एव। भद्रासंक्रान्त्यादिदूषिततत्वे तु न पूर्णिमादिने कार्यमपितु विकल्पप्रदर्शिततिथ्यादिषूपाकृतिः कार्या। विकल्पप्रदर्शिततिथ्यादिषूपाकृतिः कार्या। विकल्पपक्षोक्ततिथ्यादिष्वप्यौषधिप्रादुर्भावाभावे ग्रहणसङ्क्रान्तियोगे कारणान्तरेणातिपत्तौ वा वर्षर्तु मध्ये यदाकदाऽपि कार्यम्। तदुक्तं शौनकेन तद्वार्षिकमित्याचक्षते इति। वर्षासुभवं वार्षिकं चतुर्दशीविद्धायां पूर्णिमायामुपाकर्मनिषेधकारणानि कालिकापुराणोक्तवचनानि निर्दिश्यन्ते—

चतुर्दश्यां समुत्पन्नावसुरौ मधुकैटभौ।
वेदान्स्वीकुर्वतः पद्मयोनेस्तौ जह्रतुः श्रुतीः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आहृत्य ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयम्।
अभूल्लब्धश्रुतिर्ब्रह्मापर्वण्यौदयिके पुनः ॥
अतो भूतयुते तस्मिन् नोपाकरणमिष्यते।
आसुरं वर्जयेत्कालं वेदाहरणशङ्कया ॥

एवं चोपाकर्म चतुर्दश्यामविधाय पूर्णिमायामेव करणीयम्। ग्रहणादिदोषसत्वे तस्यामौषधिप्रादुर्भावे सति श्रावणपंचम्यां कार्यम्। औषधिप्रादुर्भावे तु पूर्वोक्त एव पन्थाः समाश्रयणीयः। उपाकर्मणो ब्रह्मयज्ञाऽङ्गत्वात् नित्यत्वमतो न हेयताऽस्य समुचिता। समासतो विधिरेवमुपक्रमस्य पूर्वं सङ्कल्प्य स्नात्वौषधिभिः सम्पूज्य ऋषीनुपक्रमः कार्यः। तथा च—

श्रावण्यां प्रौष्ठपद्यां वा
उपाकृत्य यथाविधिः।
युक्तश्छन्दांस्यधीयीत मासान्
विप्रोऽर्धपञ्चमान् ॥

अत्र विप्रपदोपादानादतिरिक्तानां क्षत्रियादीनामन्वारम्भमात्रन्नाधिकारः। एतेन सार्धं चतुर्मासानन्तरमुत्सर्जनप्राप्तिस्तथापि साम्प्रतमुपनीत्या सहैव समावर्तनानुष्ठानमिव "पुण्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवा" इत्यत्राथवापदद्योतितपक्षसमाश्रयणं युक्तं लाघवात्–कर्मलोपाप्रसक्तेराचारान्त र्भूतत्वाच्च। अस्मिन्नेवाहनि क्रियमाणकर्माद्यनुष्ठानानन्तरं रक्षासूत्रं बध्नीयादुत विन्यस्तसिद्धार्थादिकां रक्षापोटलिकां कृत्वा तद् बन्धनं कार्यम्। मदनरत्नभविष्योक्तरक्षाबन्धनमहिमसंक्षिप्तसारोऽयम्—"सर्वरोगप्रशमनार्थं सर्वाशुभविनाशाय सकृत्कृतेन वर्षमेकं रक्षा भवेत्। पुरा द्वादशवार्षिको देवासुरसंग्रामः समजायत तत्र देवराडसुरैः पराजितःससुरो बृहस्पतिमेत्य-प्रोवाच–स्थातुन्न शक्तो गन्तुं च। ततः निशम्यैतद् गुरू रक्षापोटलिकां कृत्वा शच्यै समार्पयदिद्राण्या च सा गोसर्गकाल एव बद्धा पूर्णिमायामाखण्डलस्य सव्ये पाणौ। पुलोमजाबद्धरक्षासूत्रो गत्वाऽसुरान् विजिग्येऽतो रक्षाबन्धनं कार्यम्। युधिष्ठिरेण रक्षाबन्धनविधिं पृष्टः कृष्णः प्राह श्रावणस्य पौर्णमास्यां श्रुतिस्मृतिप्रदर्शितविधिना स्नात्वोपाकर्मादिकं ब्राह्मणैः सार्धं वेदान् यथाशक्तिः संकीर्त्योपराह्णे पोटिलां कारयित्वाऽक्षतसर्षपसुवर्णयुतां राजसभायामासनं दत्वोपविशेत्। ततश्च प्रथमं देवद्विजातिशस्तान्वस्त्रैरक्षाभिरभ्यर्च्य पुरोधा राज्ञो दक्षिणहस्ते "येनबद्धो बली राजा दानवेन्द्रो महाबलः। तेन त्वामभिबध्नामि रक्षे मा चल मा चल" इति मन्त्रोच्चारणपूर्वकं रक्षापोटलिकां बध्नीत। पश्चाद् ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः। कर्तव्यो रक्षिकाबन्धो द्विजान् सम्पूज्य भक्तितः॥ शूद्रा अप्यऽस्मिन् दिनेऽमन्त्रकं स्नानं दानं च कृत्वा रक्षाबन्धनं कुर्युः। अनेन रक्षाबन्धनं कुर्युः। अनेन रक्षाबन्धनेन वर्षपर्यन्तं सर्वदोषरहितः सुखी च भवेन्मानवः। भारतीयसंस्कृतिरक्षणायात्मरक्षायै च [सङ्घीभूय सकलैरपि भेदमन्तरेण यथाविधिः पर्व महता समारोहेण मानयितव्यम्। सङ्घटनेनैव राष्ट्रस्याऽपि सुरक्षा भवितुं सुशका नान्यथा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सङ्घटितैः सूत्रै र्बलवानपि जन्तुर्वशीकर्तुं शक्योऽतः सङ्घटनाय प्रयतितव्यम्। अत एवोक्तं "सङ्घे शक्तिः कलौ युगे" इति।

मदनरत्नभविष्योक्तरक्षाबन्धनविषयकश्लोकसारः—

'सर्वरोगोपशमनं सर्वाशुभविनाशनम्।
सकृत्कृतेनाब्दमेकं येन रक्षाव्रतो भवेत्॥
शृणु पाण्डवशार्दूल इतिहासं पुरातनम्।
इन्द्राण्या यत्कृतं पूर्वं शक्रस्य जयवृद्धये॥
देवासुरमभूद्युद्धं पुरा द्वादशवार्षिकम्।
तत्रासुरैर्जितः शक्रः सह सर्वैः सुरोत्तमैः॥
वृहस्पतिमुपामन्त्र्य-इदं वचनमब्रवीत्।
न स्थातुं चैव शक्नोमि न गन्तुं तैरभिद्रुतः॥
सर्वथा योद्धुमिच्छामि गुरुस्तं च न्यवारयत्।
तयोः संवदतोरेवं शची प्राह सुरेश्वरम्॥
अद्य भूतदिनं देव प्रातः सर्वं भविष्यति।
अहं रक्षां विधास्यामि येनाजेयो भविष्यसि॥
इत्युक्त्वा पौर्णमास्यां सा पौलोमी कृतमङ्गला।
बबन्ध दक्षिणे पाणौ रक्षापोटलिकां ततः॥
बद्धरक्षस्ततः शक्रः कृतस्वस्त्ययनो द्विजैः।
जधान दानवानीकं क्षणात्काल इव प्रजाः॥
शक्रश्च विजयी भूत्वा पुनरेव जगत्त्रयीम्।
एष प्रभावो रक्षायाः कथितस्ते युधिष्ठिर॥
जयदः सुखदश्चैव पुरारोग्यधनप्रदः।
क्रियते केन विधिना रक्षाबन्धः सुरोत्तम॥
कस्मिंस्तिथौ कदा देव एतन्मे वक्तुमर्हसि।
यथा यथा हि भववान्विचित्राणि प्रभाषसे॥
तथा तथा न मे तृप्तिर्बह्वर्थाः शृण्वतः कथाः।
संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये॥
स्नानं कुर्वीत मतिमाञ्छ्रुतिस्मृतिविधानतः।
ततो देवान्पितृँश्चैव तर्पयेत्परमाम्भसा॥
उपाकर्मादिकं प्रोक्तमृषीणां चैव तर्पणम्।
कुर्वीत ब्राह्मणैः सार्धं वेदानुद्दिश्य शक्तितः॥
शूद्राणां मन्त्ररहितं स्नानं दानं च शस्यते।
ततोऽपराह्णसमये कुर्यात्पोटलिकां शुभाम्॥
कारयेच्चाक्षतैस्तद्वत्सिद्धार्थैः हेमचर्चिताम्।
वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वा मलवर्जितैः॥
विचित्रतन्तुग्रथितो स्थापयेद्भाजनोपरि।
कार्या गृहस्य रक्षा गोमयरचितैः सुवृत्तकुण्डलकैः।
दूर्वावर्णकसहितैर्भित्तौ दुरितोपशमनाय॥
उपलिप्ते गृहमध्ये दत्तचतुष्कं न्यसेत्कुम्भम्।
पीठं दत्वोपविशे द्राजामात्यैर्युतञ्च सुमुहूर्ते॥
वेश्याजनेन सहितो मङ्गलसहितैः समुत्थितैश्चिह्नैः।
रक्षाबन्धः कार्यः प्रशान्तिदः सर्वविघ्नानाम्॥
देवद्विजातिशस्तान्वस्त्रै रक्षाभिरर्चयेत्प्रथमम्।
तदनु पुरोधा नृपते रक्षां बध्नीत मन्त्रेण॥
येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वामभिबध्नामि रक्षे मा चल मा चल॥
ब्राह्मणैः क्षत्रियै र्वैश्यैः शूद्रैश्चान्यैश्च मानवैः।
कर्तव्यो रक्षिकाबन्धो द्विजान्संपूज्य भक्तितः॥
अनेन विधिना यस्तु रक्षाबन्धनमाचरेत्।
स सर्वदोषरहितः सुखी संवत्सरं भवेत्॥
यः श्रावणे विमलमासि विधानविज्ञो
रक्षाविधानमिदमाचरते मनुष्यः।
आस्ते सुखेन परमेण स वर्षमेकं
पुत्रःप्रपौत्रसहितः ससुहृज्जनः स्यात्॥

॥ इति शुभम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैकुण्ठस्थ-वैद्यराज-स्वामि-लक्ष्मीराममहाराजस्य द्वाचत्वारिंशत्तमे
निर्वाणदिवसे समर्प्यमाणः

श्रद्धाञ्जलि:

धन्यो मान्यो धनी विद्वान् वैद्यविद्याविशारदः ।
स्वामिवर्यः स नाकस्थो **लक्ष्मीरामः** प्रणम्यते ।। १ ।।

शास्त्रेषु प्राथितास्ति का भगवतो विष्णोः सुपत्नी ? तथा–
ज्येष्ठो दाशरथिश्च को निगदितः शास्त्रेषु प्राज्ञोत्तमैः ? ।
यत्प्रश्नोत्तरयुग्मसंयुतमिदं यस्यास्ति नाम प्रियम्,
तस्मै स्वामिपदाञ्चिताय मयका श्रद्धाञ्जलि र्दीयते ।। २ ।।

अथ च–

गुरुनिर्दिष्टमार्गेण प्रचलन् भिषजां वरः ।
श्रीलक्ष्मीरामपीठेशः **स्वामी रामप्रकाशकः** ।। ३ ।।

दीनान् हीनान् जनान् रक्षन् दयादृष्ट्या विशेषतः ।
श्रीगोविन्दप्रसादेन सानन्दं मोदतां सदा ।। ४ ।।

शुभतिथिः
श्रावण कृ० ८ शु०
वै० सं० २०३८

समर्पको विनीतः–
दीनानाथत्रिवेदी मधुपः
जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हमारे देश की सभी प्रान्तीय भाषाएँ जैसे— राजस्थानी, अवधी, बंगला, उडिया, बिहारी, पंजाबी, गुजराती, मराठी, तामिल, तेलगू, मलयालम आदि सभी देववाणी संस्कृत से ही प्रादुर्भूत हुई हैं। अतः सम्पूर्ण देशको एकता के सूत्र में बाँधने वाली यह मजबूत कडी है इसमें हमारे धर्म और संस्कृति की धरोहर भी लिखी पडी है अतः इसके प्रचार प्रसार की कामना करते हुए

भवदीय

JANSON'S

IMPORT EXPORT

P. BOX 2428

6580 IDARO BERSTEIN

WEST GERMANY

DEALER IN

TRETIOUS STONES

EMPERAUD RUBIES

SAPHAIRS

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद-स्तम्भः—

आयुर्वेदीयं आत्मस्वरूपम्

वी० बी० नटराज शास्त्री, त्रिचिरापल्ली

पूर्वाऽनुवृत्तम्—

अयं भावः—परमात्मन इव जीवात्मनश्च आदिः नास्ति, परमार्थतः उभयोरभिन्नत्वात्। यदा परमात्मा प्रपञ्चस्य सिसृक्षया मायासंज्ञकस्वशक्तिसंयुक्तः क्षेत्रवर्गं सृजति, तदा आत्मा क्षेत्रज्ञसंज्ञां लभते। इयं प्रपञ्चसृष्टिपरम्परा तावत् अनादिनिधना, कालवत्। यद्यपि क्षेत्रवर्गः सादिः, तेन नश्वरः, तथाऽपि, यत् क्षेत्र—क्षेत्रज्ञयोः पारम्पर्यं परम्परासन्तानं, तच्च अनादिकं क्षेत्रज्ञ इव। उभयोश्च अनादित्वात् संसारे, क्षेत्रक्षेत्रज्ञयोः कतरस्यापि पूर्वतरत्वं नैव शक्यते व्यपदेष्टुं बीजाङ्कुरवत्।

वेदान्तदर्शनेऽपि संसारस्य अपरपर्यायरूपक्षेत्रक्षेत्रज्ञपारम्पर्यस्य अनादित्वं प्रोच्यते।

शिष्यो भूयः पृच्छति—पुरुषे हर्षविषादाभिव्यञ्जकं लक्षणं स्पष्टमुपलभ्यते। "स्यात् कथं चाविकारस्य विशेषो वेदनाकृतः" इति। अत्र विशेषशब्दो हर्षशोकानुभवयोः सामान्यवाचकः।

गुरुः परिहरति—

"नैकः कदाचिद्भूतात्मा लक्षणैरुपलभ्यते।
विशेषोऽनुपलभ्यस्य तस्य नैकस्य विद्यते॥
संयोगपुरुषस्येष्टो विशेषो वेदनाकृतः।
वेदना यत्र नियता विशेषस्तत्र तत्कृतः॥"

इदं तात्पर्यम्—भूतात्मा य एकः अद्वितीयः केवलश्चेतनाधातुः स अविकारी लक्षणैः प्राणापानादिभिः न उपलभ्यते। यतस्तस्य चिन्मयस्य, निर्गुणत्वात् अनुपलभ्यस्य, लक्षणविशेषः कोऽपि न विद्यते। सुखदुःखरूपो वेदनाकृतो विशेषः सत्वादिगुणसंयुक्तपुरुषस्यैव संभवति। संयोगपुरुषस्यापि अहं सुखी अहं दुःखी इति वेदना न परमार्थतः सत्या, किन्तु, अनात्मनि देहे आत्मत्वेन आध्यास आरोपितैव शुक्तिरजतवत् इति बोद्धव्यम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिकित्साविषये धातुस्थितिं बुभुत्समानः शिष्यः पृच्छति—

"अथ चार्त्तस्य भगवन् तिसृणां कां चिकित्सति ।
अतीतां वेदनां वैद्यो वर्त्तमानां भविष्यतीम् ।।
भविष्यन्त्या असंप्राप्तिः अतीताया अनागमः ।
साम्प्रतिक्या अपि स्थानं नास्त्यार्त्तेः संशयो ह्यतः ।।"

वेदनाशब्दः सामान्यतः सुखदुःखोभयवाची । रोगाधिकारे दुःखकारणरोगवाची । चिकित्साविषये वेदनाया विज्ञातव्यात् कुतोऽयं प्रश्नः ।

धातुवैषम्यं हि विकारः । धातूनां क्षणे क्षणे शीर्यमाणजायमानस्वभावेन तद्गत-विकारस्य अस्थायित्वात्, धातुसमीकरणरूप-चिकित्सायाः स्थानं विषयश्च न भवति ।

यतः—अतीतवर्त्तमानभविष्यन्तीषु वेदनासु—आर्त्तेः अतीतायाः अपुनरागमः भविष्यन्त्याः असत्ता, साम्प्रतिक्या अपि अनवस्थानं भवति । एवं सति, आर्त्तेः तिसृषु अवस्थासु, वैद्यः कां अवस्थां चिकित्सितुं शक्नोति ? इति प्रश्नार्थः ।

अथ आचार्यः—"त्रिकाला अपि वेदनाः भिषक् चिकित्सति" इति, त्रैकालिकस्वरूपं आर्तीनां चिकित्सानां च विस्तरेण प्रतिपाद्य, "त्रिकाला अपि वेदनाः भिषक् चिकित्सति" इति युक्तिभिः निरूपितवान् विस्तरेण । एष चिकित्सास्वरूप-विस्तरः आत्मस्वरूपप्रबन्धे न उल्लिख्यते अनपेक्षितत्वात् विस्तरभिया च ।

रोगो द्विविधः व्यापककालभेदेन । मिथ्याऽऽहारविहारादिनिदानैः जायमानाः ज्वरातीसारोन्मादादयः शारीरमानसा रोगाः, ये निदानपरिवर्जनभेषजसेवनेन निवर्त्तन्ते, एते परिमितकालमात्रव्यापकाः । अपरः प्रकारः—
मनुष्याणां धर्माधर्मकर्मनिमित्तः जननमरणरूपसंसाररोगः, यः अपरिमेयकालं असङ्ख्येय-बहुजन्मव्यापको भवति । अस्य संसारमहारोगस्य च चिकित्सोपदेशलक्ष्यत्वात् आयुर्वेदस्य, आचार्यः साधारणरोगस्य त्रिकालवेदनाचिकित्सायुक्त्युपदेशेन सहैव उपदिशति—

" x x x x x चिकित्सा तु नैष्ठिकी या विनोऽपधाम् " इति ।

उपधा तृष्णा प्रतिप्रयोजनकामना । निष्ठा ब्रह्मनिष्ठा संसारान्मोक्ष इति यावत् । उपधां प्रतिप्रयोजनकामनां विना भिषग्भिः यदि रुग्णानां चिकित्सा क्रियते सा चिकित्सा न केवलं रुग्णानां रोगमोचनं करोति, अपितु भिषजामपि संसारान्मोक्षं ददाति इति फलितार्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथातः उपधायाः परित्यागे हेतुं प्रयोजनं चोपदिशति—

"उपधा हि परो हेतुः सुःख-दुःखाश्रयप्रदः ।
त्यागः सर्वोपधानां च सर्वदुःखव्यपोहकः ।।
कोषकारो यथा ह्यंशून् उपादत्ते वधप्रदान् ।
उपादत्तो तथार्थेभ्यः तृष्णामज्ञः सदाऽऽतुरः ।।
यस्त्वग्निकल्पानर्थान् ज्ञो ज्ञात्वा तेभ्यो निवर्त्तते ।
अनारम्भादसंयोगात् तं दुःखं नोपतिष्ठते ।।"

उपधा—प्रतिप्रयोजनलिप्सया वैदिकं स्मार्त्तं लौकिकं वा यत् कर्म क्रियते तत्प्रयोक्त्री तृष्णा-उपधा इत्युच्यते सैषा उपधा एव शारीरमानससमस्तदुःखानां प्राप्तौ, परो हेतुः नान्यः। यस्मादेवं तस्मात्, सर्वोपधानां परित्यागः सर्वप्रकारदुःखानां व्यपोहकः। स्वस्यैव उपधया स्वदुःखानि अनुपतन्ति इत्येतत् दृष्टान्तेन विशदीक्रियते—कोषकारः ऊर्णनामाख्यः क्रिमिविशेषः स्वमुखलालयैव अंशुमयं जालं कुर्वन्, जालमध्ये बद्धः वधं ऋच्छति यथा, तथैव अज्ञो नरः नियतदुःखजनन्या उपधया आतुर-अर्थेभ्यः फलेभ्यः कामनया कर्माणि कुर्वन् दुःखानि उपादत्ते। यो विवेकी ज्ञः इत्थं दुःखकारणं ज्ञात्वा अग्निकल्पाभ्यः सर्वप्रकारोपधाभ्यो निवर्त्तते, तं किमपि न उपतिष्ठते ।

ननु, शुभकामनया कृतकर्मणां सुखफलहेतुत्वं प्रसिद्धम्। तथा सति, कथमुच्यते फलकामनायाः (उपधायाः) ऐकान्त्येन दुःखहेतुत्वम् ? इति चेत्, सत्यं शुभकर्मणां सुख फलावहत्वं सिद्धम्—तथाऽपि तानि इष्टापूर्त्तादि-परोपकार-देशसेवादिधार्मिककर्माण्यपि यदि ऐहिक कीर्तिवित्तलाभादि-आमुष्मिकस्वर्गभोगादिसुखलिप्सया क्रियन्ते चेत्, तज्जन्यसुखफलानां उपभोगार्थं कर्त्तुः जन्मानि उत्पादयन्त्येव, यथा अशुभानि कर्माणि। तथा सुखकामं कर्मठं भूयः तादृशकर्मसु प्रवर्त्तयन्ति। एवं पुनः पुन. जंननमरणात् किमस्ति दुःखतरम् ? यत एवं धार्मिककर्माण्यपि कर्त्तुः पुनर्भवकारणानि भवन्ति, अतः जननमरणात्मकसंसारमहारोगात् मोक्षं प्रतिबध्नन्त्येव। यदि विद्वान् धार्मिककर्माणि विहितानि यदि सर्वथा निष्कामनया परमेश्वरप्रीत्यर्थं आचरति, तदा तानि कर्माणि भर्जितबीजानि इव किमपि फलं नोत्पादयन्ति कर्त्तुः कर्मफलेन असंयोगात् इहैव मुक्तिः सिद्ध्यति। अतः सत्कर्मणां फलासक्तेः परित्यागः, असत्कर्मणामपि सर्वथा अनारम्भः दुःखजिज्ञासुना कर्त्तव्य इति, 'उपधा हि परो हेतुर्दुःखाश्रय-प्रदः" इत्यारभ्य "अनारम्भादसंयोगात् तं दुःखं नोपतिष्ठते" अन्ते सिद्धान्तः उक्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रैतत् आकूतं अवधातव्यम्—यथा परोपकारइष्टापूर्त्तादिकर्मणां निष्कामनया अनुष्ठितानां मोक्षकारकत्वम् । तथैव, " x x x x चिकित्सा तु नैष्ठिकी या विनोपधाम् " अर्थात्, अणुमात्रमपि प्रतियोजनेच्छां विना केवलं भूतदयया क्रियते चेत् तथा क्रियमाणा आतुरचिकित्सा अपि निश्चयेन भिषजः भवरोगं हन्यात् इत्युक्तिः कथं सङ्गच्छेत ?

यतः मोक्षः अग्निहोत्रादिकर्मभिः क्रमेण प्राप्य सत्वशुद्धिलोकदोषदर्शनवैराग्य-श्रवण-मनन-निदिध्यासनैः अन्ते आत्मज्ञानेनैव लभ्यः । पुष्कलार्थकरी भूयो भूयः काम वर्धिनी बन्धिनी हि चिकित्सावृत्तिः । कथं सा वैराग्यलभ्यमोक्षसाधिका भवितु अर्हेत् ? इति चेत् श्रूयताम्—परोपकारदेशसेवादिलौकिककर्माणि तथा इष्टापूर्त्तादि श्रौतस्मार्त्त-कर्माणि च ऐहिकामुष्मिकफलकामनया कृतानि तत्फलोपभोगार्थं कर्त्तॄन् पुनः पुनर्जन्मभिः ध्रुवं योजयन्त्येव । सर्वथा निष्कामनया कर्त्तार एव मुक्ता भवन्ति । सत्कर्मणां अनुष्ठानं न मोक्षसाधनम्, किन्तु, तत्र निष्कामत्वमेव मोक्षसाधकक्षमं इति शास्त्रगुरूपदेशाभ्यां ये विदन्ति तेषां विदुषां उपधां विना परमेश्वरप्रीत्यर्थं सर्वकर्मणां अनुष्ठानं सुकरं भवति ।

इष्टापूर्त्तानां सद्यः ऐहिकं फलं प्रायो नास्ति । रोगचिकित्सा तावत् भिषजां धन-राशियशः करी । सद्यः फलादायिन्याः चिकित्सावृत्त्याः निष्कामनया आचरणं अत्यन्तं दुष्क-रतरम् । तादृशीं करोपरि सद्यो धनावहामपि चिकित्सां सदा सर्वत्र निष्कामनया केवलं भूत-दयया धनानासक्तः यदि धीरः कश्चित् करोति, तस्य भवमहारोगात् मोक्षः करगत एव न संशयः, इति—

"चिकित्सा तु नैष्ठिकी या विनोपधाम् ।"

इति आयुर्वेदसमयः सर्वथा निरवद्यः ।

दुस्तरसंसारमहासागरे अज्ञानेन घटीयन्त्रवत् सदा परिभ्रमतो जीवात्मनः मोक्षो-पायान् जिज्ञासुः शिष्यः, निरस्तसमस्तदुःखस्वरूपं इति प्रशंस्यमानं मोक्षस्वरूपं प्रथमं पृच्छति—

" क्व चैता वेदनाः सर्वाः निवृत्तिं यान्त्यशेषतः " इति । यद्यपि वेदनाशब्दः सुख-दुःखोभयबोधवाचकः, संसारस्य दुःखैकपरत्वात् इह वेदनाशब्दः दुःखपर्यायः । शान्तिनिवृत्ति-शब्दयोः अर्थभेदः, शान्तिः तात्कालिकी यत्र पुनरावृत्तिः संभवक्षमा, निवृत्तिः आत्यन्तिकी-पुनरावत्तिशंकाविरहिता इति ज्ञातव्यम् । इदं विशदयति प्रश्नवाक्ये "निवृत्ति–अशेषतः इति शब्दयोः प्रयोगः । (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Phone : 267651/52

देववाणी संस्कृत जो देश की सभी
प्रान्तीय भाषाओं की जननी है
उसका सर्वत्र प्रचार प्रसार हो
इसी कामना से–

RAVIN TRADING Co.

5 MOHATTAS MARKET

1st FLOOR PALTAN ROAD

BOMBAY 400.001

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संघगीता

ले० डॉ० श्रीधरभास्करवर्णेकरः, नागपुरम्

"संघयोगः"

सप्तमोऽध्यायः

पूर्वाऽनुवृत्तम्—

रहस्यं तदपूर्वस्य संघयोगस्य सारतः ।
सुप्रबोधयितुं शक्तो भवतो भुवि नापरः ॥११९॥

इस अपूर्व संघयोग का सार रूप में रहस्य अच्छी प्रकार बताने को इस भूमि पर आपके सिवाय अन्य समर्थ नहीं है ॥ ११९ ॥

श्रीगुरुः प्रोवाच—

सर्वधर्मसमावृत्तिः सर्वजातिसमा मतिः ।
सर्वसेवापरा नीतिरिति सङ्घस्य पद्धतिः ॥१२०॥

श्री गुरुजी बोले—

सभी धर्मों के साथ समान वृत्ति, सभी जातियों के साथ समानता की बुद्धि, सभी लोगों के साथ सेवा परायणता की नीति यह सङ्घ की पद्धति है ॥ १२० ॥

सुखदुःखे समे कृत्वा समौ जयपराजयौ ।
संघयोगे प्रवर्तेत स्वराष्ट्रोत्कर्षकांक्षया ॥१२१॥

सुख और दुःख में सम होकर, जय और पराजय में भी सम व्यवहार करके, अपने राष्ट्र के उत्कर्ष की आकांक्षावाले सङ्घयोग में प्रवृत्त होवें ॥ १२१ ॥

सुप्रियाऽप्रिययोस्तुल्यस्तथा मानापमानयोः ।
सङ्घयोगे प्रवर्तेत कीर्तिलाभपराङ्मुखः ॥१२२॥

प्रिय और अप्रिय में तुल्य होकर तथा मान और अपमान में समान रह कर, कीर्ति लाभ से पराङ्मुख होकर संघयोग में प्रवृत्त होवें ॥ १२२ ॥

परान् समुपसेवेत न सेव्येत परं परैः ।
इत्थं सेवाव्रतं नित्यं स्वीकार्यं संघयोगिना ॥१२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूसरों की ठीक प्रकार से सेवा करे किन्तु अन्यों द्वारा सेवित न हो इस प्रकार संघयोगी द्वारा नित्य सेवाव्रत स्वीकार्य होना चाहिये ॥ १२३ ॥

अदाम्भिकत्वमाचारे विचारे दूरदर्शिता ।
प्रचारे तत्त्वनिष्ठत्वं स्वीकार्यं सङ्घयोगिना ॥१२४॥

आचरण में अदाम्भित्व (अहंकार रहितता) विचारों में दूरदर्शिता प्रचार में तत्वनिष्ठता संघयोगी द्वारा स्वीकार्य होनी चाहिये ॥ १२४ ॥

विद्यावृद्धेषु सुश्रद्धा तपोवृद्धेषु पूज्यता ।
वयोवृद्धेषु नम्रत्वं स्वीकार्यं सङ्घयोगिना ॥१२५॥

विद्वत्ता में अपने से बड़ों में उत्तम श्रद्धा, तपोवृद्धों में पूज्यता, वयोवृद्धों में नम्रता यह संघयोगी द्वारा स्वीकार्य होनी चाहिये ॥ १२५ ॥

धीरोदात्तो महाकार्ये भवेद् धीरोद्धतः क्रुधि ।
बालेषु धीरललितः धीरशान्तः स्वभावतः ॥१२६॥

संघयोगी में महान् कार्यों में धीरोदात्तता होवे, क्रोध आने पर धीरोद्धतता होवे, व बालों में धीरललित तथा स्वभाव से धीरशान्त होना चाहिये ॥ १२६ ॥

अनुगृह्णाति यः सर्वान् विगृह्णाति न केनचित् ।
संगृह्णाति स एकाकी लोकान् शतसहस्रशः ॥१२७॥

जो सब लोगों पर अनुग्रह करता है, किसी से भी विग्रह (लड़ाई) नहीं करता वह अकेला ही सैंकडों हजारों लोगों को साथ मिला लेता है ॥ १२७ ॥

अहं तव, मम त्वं च, मम यत् तत् तवैव च ।
इत्थमात्मीयताऽन्योन्यं सङ्घयोगस्य धारणा ॥१२८॥

मैं तुम्हारा हूं और तुम मेरे हो, मेरा जो कुछ है वह तुम्हारा ही है इस प्रकार की एक दूसरे में आत्मीयता संघयोग की धारणा करती है ॥ १२८ ॥

भावयन्ति प्रीणयन्ति स्निह्यन्ति च परस्परम् ।
संवर्धयन्ति चान्योन्यं सङ्घयोगपरायणाः ॥१२९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संघयोग परायण लोग एक दूसरे का आदर करते हैं, एक दूसरे को प्रसन्न करते हैं, परस्पर स्नेह करते हैं और आपस में एक दूसरे का संवर्धन करते हैं ॥ १२९ ॥

श्रद्धा त्यागस्तपो यत्नः समता शुद्धशीलता ।
इत्येतत् सङ्घयोगस्य विज्ञातव्यं षडङ्गकम् ॥१३०॥

श्रद्धा, त्याग, तप, यत्न, समता तथा शुद्ध चरित्र सम्पन्नता ये संघयोग के छ अङ्ग जानने चाहिये ॥ १३० ॥

॥ इतिश्रीसङ्घगीतायां **"संघयोगो"** नाम सप्तमोऽध्यायः ॥

गुणादर्शो

अष्टमोऽध्यायः

युवक उवाच—

राष्ट्रे संघटनाहीने सङ्घकार्यं प्रवर्धयन् ।
आदर्शः कार्यकर्तॄणां भवानेव हि मूर्तिमान् ॥१३१॥

युवक बोला—

संगठन हीन राष्ट्र में संगठन को बढाते हुए आप ही कार्यकर्ताओं में मूर्तिमान आदर्श हैं ॥ १३१ ॥

तथापि सूक्तिरूपेण क्रियतां गुणवर्णनम् ।
पथप्रदर्शकं यत् स्यात् सङ्घमार्गानुयायिनाम् ॥१३२॥

तो भी सूक्ति के रूप में गुणवर्णन करें जिससे संगठन के मार्ग के अनुयायियों को वह पथप्रदर्शक हो ॥ १३२ ॥

श्रुत्वा श्रुत्वाऽद्य ते वाणीं सङ्घतत्त्वोपदेशिनीम् ।
शुश्रूषते हि नो भूयोऽप्यतृप्तमिव मानसम् ॥१३३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संघतत्व का उपदेश करनेवाली आपकी वाणी को सुन-सुन कर अतृप्त की तरह हमारा मानस फिर भी सुनने की इच्छा करता है ।। १२३ ।।

श्रीगुरुः प्रोवाच—

चतुर्धा पुरुषा लोके सङ्घकार्योपकारकाः ।
मर्मज्ञा युक्तकर्मज्ञाः सद्गुणज्ञाः सुयोजकाः ।।१३४।।

श्री गुरूजी बोले—

समाज में संघ (संगठन) कार्य के उपकारक चार प्रकार के लोग होते हैं। मर्मज्ञ, योग्य कर्म को जानने वाले, सद्गुण को जानने वाले और अच्छे योजक लोग ।। १३४ ।।

इतिहासरहस्यज्ञा वर्तमानप्रबोधिनः ।
नीतिज्ञा नियतिज्ञाश्च सङ्घे स्युर्मार्गदर्शकाः ।।१३५।।

इतिहास के रहस्य को जानने वाले, वर्तमान का विशेषज्ञान रखने वाले, नीतिज्ञ और दैवज्ञ संघ कार्य के मार्गदर्शक होवें ।। १३५ ।।

दैवावलम्बिनः केचित् केचिद् दैवावलम्बिनः ।
सङ्घकार्यप्रवृत्ताः स्युः पुरुषार्थावलम्बिनः ।।१३६।।

कुछ लोग भाग्य पर अवलम्बन करनेवाले होते हैं कुछ दैव बल का अवलम्बन करने वाले होते हैं (किन्तु) संघकार्य में पुरुषार्थ का अवलम्बन करनेवाले प्रवृत्त होवें ।। १३६ ।।

योजकत्वं विधिज्ञत्वं कुशलत्वं च कर्मसु ।
यन्त्रतन्त्रपरिज्ञानं सङ्घकार्योपकारकम् ।।१३७।।

योजकता, विधिज्ञता, कर्मों में कुशलता, यन्त्र और तंत्र का परिज्ञान संघकार्य के लिये उपकारक होता है ।। १३७ ।।

वक्तृत्वं गीतगानं च कथाकथनकौशलम् ।
यत्नेनैतेऽधिगन्तव्या लोकसङ्घटका गुणाः ।।१३८।।

भाषण करने का ज्ञान, गीत गाने में निपुणता, कथा कहने की कुशलता प्रयत्न करके ये सब प्राप्त करने चाहिये । ये समाज संगठक के गुण हैं ।। १३८ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य लोकाः प्रियालोके लोकानामपि यः प्रियः ।
लोकसङ्घटनाकार्ये स कर्ता नावसीदति ।।१३९।।

समाज में जिसको लोग प्रिय लगते हों, जो लोगों को भी प्रिय लगता हो समाज संगठन के कार्य में वह कार्यकर्ता दुखी नहीं होता (विफल नहीं होता) ।। १३९ ।।

भीमार्जुनसमा वीर्ये विवेके धर्मराजवत् ।
माद्रेयाविव सेवायां भारतं भूषयन्ति ते ।।१४०।।

पराक्रम में भीम और अर्जुन के समान, विवेक में धर्मराज के समान, सेवा करने में नकुल सहदेव के समान जो होते हैं वे भारत को विभूषित करते हैं ।।१४०।।

गोपालसांघिक: कृष्णो रामो वानरसाङ्घिकः ।
सद्भिक्षुसाङ्घिको बुद्धो महात्मानो हि साङ्घिकाः ।।१४१

श्रीकृष्ण ग्वालों का संगठन करनेवाले थे । राम वानरों का संगठन करनेवाले हुए, बुद्ध सद्भिक्षुओं का संगठन करनेवाले हुए (इस प्रकार) महात्मा लोग संगठन कर्ता होते हैं ।। १४१ ।।

आत्मज्ञानं परं ज्ञानं बलमात्मबलं परम् ।
आत्मदानं परं दानं सङ्घार्थं नापरं परम् ।।१४२।।

आत्मज्ञान सबसे ऊंचा ज्ञान है आत्मबल सबसे ऊंचा बल है आत्मदान सब से ऊंचा दान है संगठन के लिये आत्मदान से उत्कृष्ट दान नहीं है ।। १४२ ।।

मैत्री समानशीलेषु करुणा, दुर्बले जने ।
मुदिता सज्जनोत्कर्षे स्यादुपेक्षा विरोधके ।।१४३।।

समान शीलवालों में मैत्री, दुर्बलजनों पर दया, सज्जनों के उत्कर्ष पर प्रसन्नता तथा विरोधियों की उपेक्षा हो ।। १४३ ।।

युद्धवीराद् दयावीराद् दानवीरात् तथैव च ।
धर्मवीरादपि श्रेयान् सङ्घवीरो दृढव्रतः ।।१४४।।

युद्धवीर से, दयावीर से तथा दानवीर से और धर्मवीर से भी दृढव्रती संघवीर श्रेष्ठ होता है ।। १४४ ।।

गतलोभो हृतक्रोधो जिततृष्णो धृतव्रतः ।
सुकृतज्ञः स्थिरप्रज्ञो भवेत् सङ्घधुरन्धरः ।।१४५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोभरहित, क्रोध को नष्ट कर देनेवाला, तृष्णा को जीत लेने वाला, व्रत को धारण करने वाला, उत्तम कृतज्ञ स्थिर प्रज्ञावाला संघ धुरन्धर होवे ।। १४५ ।।

किमतो बहुनोक्तेन श्रूयतां सूत्रतोऽन्ततः ।
वैशिष्ट्यं कार्यकर्तुर्यत् सर्वथा देवदुर्लभम् ।।१४६।।

अब इससे अधिक कहने से क्या अन्ततः सूत्ररूप में सुनो ! कार्यकर्ता का जो वैशिष्ट्य है वह सर्वथा देवदुर्लभ है ।। १४६ ।।

विजितात्मा विनीतात्मा प्रशान्तात्मा सुकीर्तिमान् ।
विशुद्धात्मा प्रसन्नात्मा परमात्मा हि मूर्तिमान् ।।१४७।।

(संघ का कार्यकर्ता) विजितात्मा विनीतात्मा प्रशान्तात्मा सुकीर्तिमान् विशुद्धात्मा प्रसन्नात्मा तथा निश्चय ही मूर्तिमान् परमात्मा होता है ।। १४७ ।।

इति गुर्वर्थगम्भीरां सङ्घतत्त्वोपदेशिनीम् ।
सुभाषितरसार्द्रां च वाणीं हृदयतोषिणीम् ।।१४८।।

गुरोः परमपूज्यस्य सङ्घसिद्धान्तजीविनः ।
निपीय गतसन्देहा युवानस्तेऽभवँस्तदा ।।१४९।।

इस प्रकार की प्रभावी अर्थगंभीर संघतत्व का उपदेश करने वाली सुभाषित-रस से सनी हुई हृदय को संतुष्ट करनेवाली संघसिद्धान्तों के अनुसार जीवनवाले परमपूज्य श्री गुरूजी की वाणी का पान कर के सभी वे युवक निःसंशय हो गए ।। १४८-१४९ ।।

तानि संस्मृत्य संस्मृत्य सदुक्तिवचनानि च ।
अन्तरङ्गमभूत् तेषां प्रबोधानन्दमेदुरम् ।।१५०।।

उन (गुरूजी द्वारा बताए) सदुक्ति के वचनों को स्मरण कर-कर के उन युवकों का अन्तरङ्ग प्रबोधानन्द से प्रसन्न हो गया ।। १५० ।।

तेऽशक्नुवन्त उद्वक्तुं हृदयोत्थां कृतज्ञताम् ।
प्रणम्य शिरसाऽगच्छन् पुनरागमनाय च ।।१५१।।

अपने हृदयों में उठी हुई कृतज्ञता को प्रगट करने में असमर्थ वे सभी युवक पूजनीय श्री गुरूजी को नतमस्तक होकर प्रणाम करते हुए पुनरागमन के लिये चले गए ।। १५१ ।।

।। इतिश्रीसङ्घगीतायां '**गुणादर्शो** नाम अष्टमोऽध्यायः ।।

ॐ तत सत

CC-0. In Public Domain: Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवो भक्तं प्रति

कुमारी कुमुद कान्हे
व्याख्याता-शासकीय संस्कृत महाविद्याल, रायपुर (मध्यप्रदेश)

पुरा पंढरपुरनाम्नि ग्रामे सेनानामको नापितः प्रतिवसति स्म। स प्रतिदिनं राजग्रहं गत्वा राज्ञः श्मश्रु-केशकर्त्तनादि करोति स्म जीवनयापनं च करोति स्म। सः भगवतः विठ्ठलस्य अनन्यभक्त आसीत्। अहर्निशं तस्य स्मरणमर्चनं कृत्वा सुखेन स्वभार्यया सह प्रतिवसति स्म। एकदा प्रातःकाले स सेना ईश्वराराधनकाश्चर्ये एतादृश एकाग्रचित्तोऽभवत् यत् सः पूर्णरूपेण विस्मृतः यत् राजगृहे तस्य किमपि दैनिककर्त्तव्यम् अस्तीति। तस्य ध्यानावस्वाकाले गृहे-राजपुरुषाः आगताः तमानेतुम्। परं सः विठ्ठलाराधने सक्तत्वात्, तान् पुरुषान् आश्वास्य "प्रतीक्षस्य तावत् किञ्चित्, पूजां परिसमाप्य त्वरितं आगमिष्यामि" इत्यकथत्। ते पुरुषाः राजानं प्रतिनिवृत्य यदुक्तं तत्तथैव राज्ञे निवेदितवन्तः। राजापि किञ्चित् कालं नापितम् प्रतीक्ष्य यदा तमनायान्तमपश्यत् तदा सञ्जातरोषः पुनः राजपुरुषान् तदगृहं प्राहिणोत्। ते राजपुरुषाः राजाज्ञामनुसृत्य नापिताय राजदण्डं श्रावयितुं गताः।

इतः भगवतः दशा दर्शनीयाऽऽसीत्। सः स्वभक्तस्य ईदृशीमवस्थां स्वकीयाराधने विरतस्य नापारयत्। अतः नापितवेषेण राजगृहं प्रस्थितः। स्वकिरीटकुण्डलादीन् पीताम्बरादिवस्त्रान् विहाय नापितस्य परिवेषं कृत्वा क्षुरपेटिकां गृहीत्वा राजगृहं गतवान्।

राजा तु नापितं दृष्ट्वा प्रसन्नोऽभवत्। विठ्ठलरूपधारिणा नापितेन प्रथमं राज्ञः मुखं जलेन सम्यक् सिञ्चयित्वा प्रक्षालितम् तदनंतरं केशकर्तनार्थं क्षुरिकां गृहीतवान्। तदनंतरं तैलमर्दनं अकरोत् ततः अन्तरधात्।

इतः नापितस्य ध्यानभङ्गमभवत्। अतः स अतित्वरेण राजगृहं गन्तुं प्रायतत्। एवं राजद्वारे उपस्थितः अभवत् परं स अतीव आश्चर्यचकितोऽभवत्। यदा तम् दृष्ट्वा राजा अत्यानंदेन तम् बहु प्रशशंस। "अद्य त्वया अपूर्वं श्मश्रुकर्म कृतम्। अहम् प्रसन्नोऽस्मि। भूयो भूयो ममाङ्गेषु तैलमर्दनं कुरु। तच्छ्रुत्वा सेना अतिविस्मितोऽभवत्। मनसि चिन्तयति "अहं तु पूजाकार्ये एव रत आसीत् अतः अत्र न आगतः परं राजा त्वेवं वदति" किमव रहस्यम्? इति चिन्तयन् स गृहं गतः। अपरह्य पूजाकार्ये तस्य ध्यानावस्थायां आगतेन कृष्णेन स अजानत् यत् लीलावपुः श्रीविठ्ठलः स्वभक्तरक्षणार्थं राजदण्डात् तं निवारयितुं स्वयमेव राजगृहं प्रति प्रस्थितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रार्थना

यं वैदिका मन्त्रदृशः पुराणा
इन्द्रं यमं मातरिश्वानमाहुः
वेदान्तिनोऽनिर्वचनीयमेकं
यं ब्रह्मशब्देन विनिर्दिशन्ति ॥ १ ॥

शैवायमीशं शिव इत्यवोचन्
यं वैष्णवा विष्णुरिति स्तुवन्ति
बुद्धस्तथाऽर्हन्निति बौद्धजैनाः
सत्श्रीअकालेति सिक्ख-सन्तः ॥ २ ॥

शास्तेति केचित् कतिचित् कुमारः
स्वामीति मातेति पितेति भक्त्या
यं प्रार्थयन्ते जगदीशितारं
स एक एव प्रभुरद्वितीयः ॥ ३ ॥

वैदिक और मन्त्रदृष्टा ऋषि तथा पुराण के जानने वाले व्यक्ति जिसको इन्द्र, यम और मातरिश्वा कहते हैं, और वेदान्ती अनिर्वचनीय जिस एक का ब्रह्म शब्द से निर्देश करते हैं ॥ १ ॥

शैव जिसे भगवान शिव कहते हैं और जिसको वैष्णव लोग विष्णु के रूपमें स्तुति करते हैं। और बौद्ध लोग बुद्ध तथा जैन अर्हन् एवं सिक्ख जन सत्श्रीअकाल कहते हैं ॥ २ ॥

कुछ लोग जिसको शासक और कुछ कुमार मानते हैं, कुछ भक्ति से संसार के जिस ईश को स्वामी माता और पिता के रूप में प्रार्थना करते हैं वह एक ही प्रभु अद्वितीय है ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्व-वार्ताः—

बंगलादेशे राजनैतिकव्यतिकरः

(ले० श्रीविश्वदर्शी)

भारतस्य प्रतिवेशिनि बांगलादेशे राष्ट्रपतिः श्रीजियाउर्रहमानः शनैः शनैः राजनैतिकस्थिरतायाः स्थापनां कुर्वाण आसीत्, किन्तु २९ मईदिवसे सहसैव तदिदं श्रुत्वा सर्वे स्तब्धाः संजाता यत्तत्रत्येनैकेन सैन्याधिकारिणा मेजरजनरल मंजूरअहमदेन तद्विरोधे विद्रोहः कृतस्तेन च जियाउर्रहमानो गुलिकास्त्रेण हतः। यद्यपि जियाउर्रहमानोऽपि सैन्याधिकारी आसीत्तथापि तेन शनैः शनैः राजनीतिक्षेत्रात्सैन्यक्षेत्रस्य पार्थक्यं क्रियमाणमासीत्—यतो हि एतत्पूर्वं सैन्यविद्रोहादिना अष्टवारं क्रान्तिप्रयत्ना अनुष्ठिता अभूवन्। अधुनापि मंजूरस्यानुयायिभिः सैन्यैरस्थायिरूपेण शासनोपर्यधिकारस्य घोषणा कृताऽभूत्—मंजूरश्च पलायितः किन्तु राष्ट्रपतेरनुयायिभिः सैन्यैः सोऽल्पैरेव दिवसैर्निगृहीतः, क्रोधावेशवशाच्च नीयमान एव स मार्गे हतः। विद्रोहश्च दमितः।

तथापि बांगलादेशे अस्थिरता पुनरपि प्रारब्धाऽस्ति। १९७९ वर्षस्य निर्वाचनानन्तरं या स्थिरता समायाताऽभूत्सा समाप्ता। यद्यपि संप्रति अब्दुलसत्तारः कार्यवाहकराष्ट्रपतिर्निर्मितः, सेनाध्यक्षः लेफ्टिनेन्टजनरल अरशादश्च सैन्यानि नियंत्रयति तथापि सा स्थिरता समाप्ता। शनैः शनैस्तत्र जमायते-इस्लामी—इस्लामिकरिपब्लिकनपार्टीत्यादि भारत-विरोधि-दक्षिणपंथानुयायिना पुराणपथिनामिस्लामधर्मानुयायिनाम्—अपरतश्च साम्यवादिनामाधुनिकतायां प्रगतेश्च पक्षधराणां मध्ये विवादा उग्रं रूपं धारयिष्यन्तीत्यनुमीयते। ततश्च मध्यमार्गानुयायिनां दलानां लोकप्रियता शनैः शनैर्वृद्धिमेष्यति। अवामी लीगाख्यं दलमेतेषु, प्रमुखत उल्लेखनीयम्। एतस्य नेत्री संप्रति स्व० मुजीबुर्रहमानस्य पुत्री हसीना शेखमहोदयाऽस्ति। यदि विरोधिदलान्येकी भवन्ति तर्हि बी० एन० पी० इत्याख्यं सत्तारूढं दलं स्वकीयं सिंहासनं कम्पमानमनुभविष्यति। प्रतिवेशिनि देशे राजनैतिकी अस्थिरता भारतेऽपि कंचित्प्रभावं जनयिष्यतीति राजनीतिपण्डितानामाशंकास्ति। एतत्पूर्वं जियाउर्रहमानस्य या प्रतिष्ठाऽभूत्तद्वशात्—विरोधिनां राजनीतिदलानाम् अवामीलीग, समाजतांत्रिकदलादिमध्यमार्गानुयायिनां, इस्लामानुयायिदक्षिणमार्गिणां, साम्यवादानुयायिवामपंथिनां च, सर्वेषामपि प्रतिष्ठा नाऽभूत्तावत्प्रबला, तेन च बांगलादेशीयराष्ट्रियदलस्य (सत्तारूढस्य) बहुमतं सुस्थिरं जायमानमासीत्। घटनयाऽनया सर्वमपि विपरिवर्तितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद साहित्य की अमूल्य भेंट

वैद्य सहचर

लेखक—पं० विश्वनाथ द्विवेदी

वैद्य बन्धुओ,

चिकित्सा पद्धति को आगे बढ़ाने के लिए एक ही मार्ग है, और वह है—चिकित्सा शास्त्र के योगों पर पुन: नये सिरे से अन्वेषण कर उन्हें इस रूप में रख देना कि प्रत्येक साक्षर पुरुष उनको एक निश्चित रूप में प्रयोग कर समुचित लाभ उठा सके।

'**वैद्यसहचर**' ऐसे ही रहस्य का भण्डार है। इसमें श्री ललित-हरि आयुर्वेदिक कालेज, पीलीभीत में प्रयुक्त होने वाले ५० वर्षों के सुपरीक्षित और अव्यर्थ योगों का भी संग्रह है।

प्रस्तुत पुस्तक का उद्देश्य साधारण वैद्य को चिकित्सा मार्ग में सफल चिकित्सक बनाना है। सन्तोष का विषय है कि वैद्य समाज ने इसे अपनाया। इसके ६ संस्करण हो चुके हैं, यह इसकी उपयोगिता का स्पष्ट प्रमाण है।

पं० विश्वनाथ जी द्विवेदी ने इसके नये संस्करण को अधिक उपयोगी बना कर श्री बैद्यनाथ आयुर्वेद भवन लिमिटेड के निर्देशक वैद्यराज पं० रामनारायण जी शर्मा को प्रकाशित करने को दिया। ३४५ पृष्ठ की वैज्ञानिक पुस्तक का मूल्य १०) रुपये मात्र है। बैद्यनाथ दवाओं के विक्रेताओं के पास भी यह पुस्तक मिलती है।

प्रकाशक,

श्री बैद्यनाथ आयुर्वेद भवन लिमिटेड,

गेट नाग रोड, नागपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसमाचाराः

एतद् विदितमेव तत्रभवतां यत् ज्ञानप्रबोधिनीविभागभूता संस्कृत-संस्कृति-संशोधिका (संत्रिका) पुणेविद्यापीठस्य मान्यतां प्राप्तवती पदव्युत्तरसंशोधनकेन्द्रम् इति । एतस्य संशोधनकेन्द्रस्य उद्घाटनसमारोहः संपन्नः सौरज्येष्ठस्य पंचदशमे दिने शुक्रवासरे सायं ६.३० वादने । अध्यक्षस्थानं विद्यावाचस्पतिभिः सुरेन्द्रबारलिंगेमहोदयः अलंकृतमासीत् । समारोहः अतीव शोभनः संजातः ।

तत्र आदौ ज्ञानप्रबोधिनीप्रशालायाः प्राचार्यैः श्री वा. ना. अभ्यंकरमहोदयैः प्रशालाछात्रद्वयेन च वेदमन्त्रपठनं कृतम् । ततः अध्यक्षैः श्रीसरस्वतीपूजनं कृत्वा दीपं च प्रज्वाल्य पदव्युत्तरसंशोधनकेन्द्रम् उद्घाटितम् इति उद्घोषितम् । ततः संत्रिकाविभागस्य कार्यकारिप्रमुखा (सौ.) सुनीतिदुवले प्रास्ताविकम् उपन्यस्तवती । ततः पटे प्रविष्टेन छात्रद्वयेन व्रतग्रहणं कृतम् । 'संशोधनस्य स्वीकृतं कार्यं निरलसतया, निपुणं च करोमि, न कदापि प्रमदामि' इति तयोः प्रतिज्ञाः व्रतग्रहणस्य अङ्गीभूतं सरस्वतीपूजनं, मार्गदर्शकगुरुपूजनं च ताभ्यां कृतम् । स्वीयसंशोधनविषयस्य रूपरेखा च स्पष्टीकृता । श्री वि. ध. गुर्जर, सौ. हेमा क्षीरसागर इत्येतयोः नामनी । अनन्तरं मार्गदर्शकगुरुभिः प्रा. कृ. श्री. अर्जुनवाडकरमहोदयैः संशोधनकार्यस्य उपनिषद् उपदिष्टा । तत्र तैः पंचनियमाः संदिष्टाः । कोऽपि जनो, यः संशोधकः भवितुम् इच्छति तेन एते नियमाः अवश्यमेव स्वीकरणीयाः । अन्यथा संशोधनं नैव संभवति इति तैः आग्रहेण प्रतिपादितम् ।

तदनन्तरम् अध्यक्षमहोदयैः स्ववक्तव्ये कथितं यत् संशोधनं प्रातिभमेवास्ति । न कोऽपि " संशोधको भवामि " इति निश्चित्य संशोधको भविष्यति । संशोधनार्थं या प्रज्ञा प्राणभूता, सा भवति वा, न वा । यदि भवेत् तर्हि एव जनः संशोधकः स्यात् । यत् संशोधनम् अन्यसंशोधकानां निष्कर्षेषु आधारितं तन्न संशोधनसंज्ञाम् अर्हति । स्वीया प्रज्ञा, प्रतिभा च तत्र प्रमाणीकर्तव्या । अन्यथा यत् संशोधनं भविष्यति तत् डॉक्टर ऑफ फिलॉसॉफी इति पदवीं नार्हति किन्तु काम्पाउण्डर ऑफ फिलॉसॉफीः इत्यैव पदवी तत्र शोभना भवेत् ।

धन्यवादवितरणे ज्ञानप्रबोधिनीं संचालकत्वेन अलंकुर्वाणाः विद्यावाचस्पति पेंडसेमहोदयाः प्राहुः ।

'अस्माकं छात्राणां संशोधनं मा भवतु पूर्वगृहीतया दिशा । त एव चिन्वन्तु नूतनान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संशोधनमार्गान् अदृष्टपूर्वान् । संस्कृतस्य हिंदुसंस्कृतेश्च पूर्वाग्रहविरहितं सम्यक् संशोधनं भवतु ।

इत्यतः प्राथमिकशिक्षणस्तरे एव संस्कृतस्य प्रसारः कर्तव्यः । एतत् कर्तव्यमपि संत्रिकया स्वीकृतम् । विना संस्कृतं हिंदुसंस्कृतिरेव न संभवति'।

एवमुक्त्वा तैः चन्दनहारम् उपायनं च अर्पयित्वा अध्यक्षाणां संमानः कृतः । अन्ततः "वन्दे मातरम्" इति राष्ट्रगीतेन सभा समाप्तिं गता ।

एकं वैशिष्ट्यम् अस्याः सभायाः अवश्यमेव निवेद्यते यत् प्रास्ताविकं व्रतग्रहणं विद्यार्थिभूमिकानिदर्शनं, मार्गदर्शकानाम् उपदेशश्च एतत् सर्वं संस्कृतम् आश्रित्य संजातम् ।

भवदीया

(सौ) सुनीति दुबले

कार्यकारिप्रमुखा, संत्रिकाविभागः

आसिन्धुः सिन्धुपर्यन्ता-यस्य भारतभूमिका ।
पुण्यभूः, पितृभूश्चैव-स वै हिन्दुरिति स्मृतः ।।

—वीर सावरकर

सिन्धु महानद से लेकर सागर पर्यन्त इस भारत की भूमि को जो व्यक्ति अपनी पुण्यभूमि और पितृभूमि स्वीकार करता है, वही "हिन्दू" है ।

"पर उपदेश कुशल बहुतेरे,
जे आचरहिं ते नर न घनेरे" —गोस्वामी तुलसीदासजी

वह मुसाफिर क्या जिसे कुछ शूल ही पथ से थका दें ?
हौसला वह क्या जिसे कुछ मुश्किलें पीछे हटा दें ? —अज्ञात

पंजाबी चन्दू हलवाई करांचीवाला

कार्यालयः—१८५, बालकेश्वर रोड, तीनबत्ती, बम्बई–४००००६

स्थापना—१८९६ शाखायें :— तारका पताः—'चन्दूमेवा'

(१) जवेरी बाजार (२) ग्रान्टरोड (३) कोलाबा (४) दादरा (५) वरली नका (६) सायन सर्कल (७) ठाकुरद्वार (८) सूर्योदयस्टोर्स, चर्चगेट (९) घाटकोपर (पश्चिम) (१०) लिंकिंग रोड, (११) रेलवे स्टेशन के सामने, सांताक्रुज (पश्चिम)

कारखाना :—चन्दू भवन, ग्रान्टरोड, बम्बई–४००००७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारी-स्तम्भ—

गृहिणी गृहमुच्यते

डा० श्रीमती राजेश्वरीभट्टः
लालबहादुर-शास्त्री-कालेज, जयपुरम्

गृहिणीं विना न गृहं गृहमिति प्रवदन्ति विचक्षणाः गृहिणी एव सारं सकलस्य लोकव्यवहारस्य मण्डनं च गृहसज्जायाः। भारतीयायाः संस्कृते नार्य एव रक्षाकर्त्र्यः इति विदितं समेषां विद्वत्तल्लजानाम्। महिलाशब्दोऽपि गृहिण्या अपरः पर्यायः। तस्य व्युत्पत्तिलभ्योऽयमर्थः सम्पद्यते। यथाहि—महत उत्सवस्य इला भूमि र्महिला शब्देन व्यवह्रियते। उत्सवप्रियो हि लोकः। उत्सवानाञ्च नार्यो हि मूलकारणम्। "ना ना नारी निष्फला लोकयात्रा" इत्याभाणकं सुप्रथितमेव। गृहमागतानामतिथीनामादरसत्कारो गृहिणीं विना सर्वथा असम्भवः। गृहस्थजीवनं तां विना काठिन्येन याप्यते। अतिथयो हि गृहस्थानां कृते देवतुल्याः। प्राचीनकालादेव अतिथयः पूजार्हाः अद्यापि तेषां समुचिता सत्क्रिया गृहिणीभिरेव सम्पाद्यते। भोजनदानादिना ताः अभ्यागतानां स्वागतसत्कारं विदधति। गृहस्थसाज-सज्जा अपि ताभिरेव विधीयते। संयतोपस्करा सा कुटुम्बिजनैराद्रियते। नानाविधव्यञ्जनादिसमन्वितमशनादिकं तासां निर्माणकौशलमभिव्यनक्ति। गृहाङ्गणेष्वपि तासामुपस्थितिः शोभामादधाति। श्वशुरयोः सेवाशुश्रूषापि तस्यामेवाहिता विद्यते। वृद्धौ जननीजनकौ ससुखं वर्तेयाताम्—इत्यस्य सद्गृहिण्य एव मूलकारणम्। केन सम्बन्धिना कीदृशो व्यवहारः करणीयः कथञ्च तैः सह वर्तितव्यमित्यपि गृहलक्ष्मीमाश्रयते। अतएव गृहलक्ष्म्यस्ताः निगद्यन्ते तथैव च समाद्रियन्ते। गृहं तदैव गृहं भवति यदा तस्मिन् गृहिण्यो विराजन्ते। गृहस्य शोभा, समृद्धिः, सुखं, शान्तिः, सौमनस्यम्—सर्वमेव तदधीनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तक-समीक्षा:—

प्रधानसम्पादकः

वाणीविलसितम्

केन्द्रीय संस्कृतविद्यापीठसंकलितम्

प्राप्तिस्थानम्— **गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्**
मोतीलालनेहरूपार्क, इलाहाबाद–२११००२

मूल्यम्

विज्ञानसङ्कुलेऽस्मिन् समये सर्वाऽपि जनता संस्कृतं प्रत्युपेक्षाभावमेवादधते। सर्वत्रैव विज्ञानसाम्राज्यं प्रसरीसरीति। यत्रापि दृष्टिपातं कुर्मस्तत्र मनुष्याः मृगतृष्णायाः शरव्यभूता आलक्ष्यते जनसामान्यस्यैवेयं स्थिति र्न, अपितु देववाणीनिष्णाताः साधका अपि स्वानभ्यवसायिसन्ततीर्भ्रान्तविज्ञानवह्नौ भ्रंशयितुं सचेष्टा अवलोक्यन्ते, तेषां सुरगिरं प्रत्यपेक्षिताऽऽस्था नावशिष्यते। एवंविधपर्यावरणसंकुलेऽस्मिन्समाजे दैव्यावाचो विकसित-विलासं प्रति प्रयासः क्रियमाणस्तुलसीदासस्येमामुक्तिं स्मारयति—"लङ्कानिशिचरनिकट-निवासा, इहाँ कहाँ सज्जन का वासा।" एतद्विज्ञानस्पर्द्धोन्मत्तसमाजे संस्कृतवाण्या गौरवं प्रसारयितुं विहितोऽयं चेष्टाप्रयासोः वाणीविलसितमप्येकतमोऽस्ति।

संपादकस्य विचारधारयानया न मम कोऽपि विसंवादो यत् सुभाषितानि, गीतानि, तरुणीविलसितानि निश्चयेन सहृदयहृदयान्याह्लादयन्ति। केन्द्रीयसंस्कृतविद्यापीठप्रकाशित-सङ्कलने यास्तिस्रः समस्या विविधरूपेण सम्पूर्य प्रस्तुतीकृताः श्लाघनीयास्ताः। विशेषतः 'न प्रबुद्धां न सुप्ताम्" समस्यैषा विभिन्नक्षेत्राणां परिवेषेणालङ्कृता विनोदयति चेतांसि न केषाम्।

अद्यतनो विबुधवर्गोऽपि विज्ञानवैषम्यविवर्णवदनवधूट्याविलासैर्मुग्ध स्तथापि तद-न्तरस्था वासनात्मतया स्थायिनो भावाः कविताकामिनाकमनीयकलेवरक्रियाकलापान् प्रत्या-कर्षणात्तं निवारयितुं नाशक्नुवन्। सर्वस्मिन्नेतस्मिन् सत्यपि सहृदयतायाः शतांशोऽपि तत्रावशिष्यते चेत्तर्हि स साहित्यसाधनारतजनोपलब्धोनामानन्दमादातुं विवशो भवेदेव। कतिपयकविजनैः समस्यापूर्तेरस्याः क्रमे सामाजिकराजनीतिकपरिस्थितयः कटाक्षितास्तत्र व्यक्तिगतप्रतिभानां विवेचनमपि सर्वतः परिलक्ष्यते। यत्रेकत आध्यात्मिकाधिदैविकाधि-भौतिकभावनाभिः संश्लिष्टा रचना दृष्टिगोचरतामुपयाति तत्रान्यतः सरलभाषानिबद्ध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामाजिकराजनीतिकसमालोचनसङ्कुला रचनाः समाजस्य यथार्थस्वरूपज्ञाने सहायिकाः प्रतीयन्ते ।

अपि च यत्र तत्र प्रस्तुतरूपकचमत्कृतयोऽपि वास्तविकीं प्रतिभां स्पष्टयितुं न पश्चात्पदाः । भूमिकालेखकः सुरसरस्वतीं प्रति समाजस्यौदासीन्ये वर्तमानेऽपि निष्ठया-सह तस्याः प्रचारप्रसारावृद्दिश्य सततप्रयत्नशीलतायै यत् प्रैरयत् तत् श्लाघनीयम् "सत्यं शिवं सुन्दरम्" एतदुपासनायां विश्वबन्धुत्वभावनया विहितोऽयं सङ्कलनात्मकोऽभिनवः प्रयासः किन्न प्रशंसनीयः ।

कविवर्गेण पुरातनकाचकुप्यां नवां सुरां नवीनकाचकुप्यां पुरातनीं मदिरां पूरयितु-मिव विहितो यत्न आनन्दातिरेकस्य कारणतामुपयन्निव प्रतीयते । श्रीमतो राजेन्द्रमिश्रस्य यावनभाषासम्बन्धि छन्दःसु विहिता रचना युगानुसारि विधाय चारितार्थ्यप्रतीकायमाना लोलुभ्यन्ते ।

स्वतन्त्रभारते लब्धजनुषः सहृदयकवेः श्रीहरिदासस्य रचनासु चित्रितमद्यतनरसिक-समाजस्य मानसिकदशायाश्चित्रणमतीवरोचकं दरीदृश्यते । कवेर्दृष्टिः—सूक्ष्मतमा नवी-नेव च प्रतिभाति सङ्कलनस्यान्तिमभागसङ्कलिताभी रचनाभिः ।

सङ्कलनमिदमुदीयमानकवीनां प्रतीभानां प्रस्फुरणं प्रोत्साहयिष्यति । अपि चैवंविधा आयासादि न जानीमो वयं यत्कदाऽस्मत् समक्षं कालिदासभवभूतिसदृशान् कविपुङ्गवानुप-स्थापयेयुः । सङ्कलनमेतत् सहृदयसमाजे समुचितं सम्मानं प्राप्स्यतीत्याशयास्माकीना-धारणा यदयं प्रयासप्रवाहः सततमेव प्रवहेत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



३९–प्रजाप्रियो नृपतिः [संयुक्त-राज्य-अमेरिका-देशस्य श्रेष्ठकथा]

श्री "पद्म" शास्त्री
१२८ मुक्तानन्दनगर, गोपालपुरारोड, जयपुरम्–१५

कश्चिन्नृपो घोषणामकारयत्–वनेषु ये हरिणाः निवसन्ति ते राज्ञः सन्ति, तान्यो हनिष्यति स दण्डभाग्भविता। एको बालकश्चासीद् धीरो वीरश्च। शरसन्धानेऽपि निपुणश्चायं वनेषु पक्षिणां वधमकरोत्। तस्य नामासीद्-रोबिनहुडः। एकदा राज्ञः सचिवेन सह तस्य मैत्री सञ्जाता। सचिवोऽपि भुशुण्डिकासञ्चालने निपुणः परन्न रोबिनहुडसमः। बालश्चायं मत्तोऽपि निपुण इति विलोक्य मनसि विषण्णोऽपि तं प्रशशंस। तदैव सहसा ध्वनिरुत्पन्ना। सचिवः प्राह–यदि त्वं हरिणमेनं हनिष्यसि तर्हि पारितोषिकं प्रयच्छामि। रोबिनहुडः प्रत्युवाच–राज्ञः शासनं नोल्लंघयिष्ये। सचिवःप्राह–नाहं कस्मैचिदपि किमपि कथयिष्यामि। नृपतिश्च मद्वशवर्ती वर्तते।

किसी राजा ने घोषणा करवायी कि वनों में जो हरिण हैं वे राजा के हैं। उनको जो मारेगा उसे दण्ड मिलेगा। एक बालक जो धीर और वीर था। बाण चलाने में भी वह निपुण था तथा वनों में पशु-पक्षियों का वध करता था। उसका नाम था रोबिनहुड। एक बार राजा के मन्त्री के साथ उसकी मित्रता हो गई। सचिव भी बन्दूक चलाने में निपुण था परन्तु रोबिन के समान नहीं था। यह बालक मुझ से भी निपुण है यह देख कर मन में दुःखी होता हुआ भी वह उसकी प्रशंसा किया करता था। उसी समय, अचानक आवाज सुनायी दी। सचिव ने कहा—यदि तू इस हरिण को मार देगा तो मैं तुझे इनाम दूंगा। रोबिनहुड ने कहा- मैं राजा की आज्ञा का उल्लंघन नहीं करूंगा। सचिव ने कहा—मैं किसी से भी कुछ नहीं कहूँगा। राजा मेरे वश में है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातविश्वासो रोबिनः शरसन्धानमकरोत् झटिति हरिणममारयत्। सचिवः प्रोवाच–हरिणवधेन त्वमधुना दण्डभाग्भवितासि। इत्थं तौ परस्परमयुद्ध्यताम्। रोबिनो धनुरारोपयन् जगर्ज कान्दिशीकः सचिवः पलायितः। रोबिनेन विचारितं नगरं गत्वा ममानिष्टं भविता चातो वनेष्वेव जीवनयापनं करिष्ये। तेन सह बहवो जनाः सम्मिलिताः। सर्वे दलबलसंयोजनं कृत्वा यत्र तत्र तस्थुः। रक्षापुरुषा अपि तेभ्यो बिभ्यन्ति स्म। तस्य दलस्य चर्चा सर्वत्र प्रसृता।

रोबिन को उस पर विश्वास हो गया और उसने शीघ्र ही बाण चलाया, हरिण को मार दिया। सचिव ने कहा—हरिण का वध करने के कारण तुम्हें दण्ड भोगना पड़ेगा। इस प्रकार उन दोनों में झगड़ा हो गया। रोबिन धनुष चढ़ा कर गरजने लगा। सचिव डर के मारे भाग गया। रोबिन ने विचार किया, नगर में जाकर मेरा बुरा ही होगा अतः जंगलों में जाकर अपना जीवन यापन करूंगा। उसके बहुत से लोग चलने लगे। वे सभी दल-बल के साथ जहां कहीं रहने लगे। उसके दल की सब जगह चर्चा होने लगी।

एकदा प्रत्यूषे व्यचरन्तस्ते रुदतीं वृद्धामेकामपश्यन् राजमार्गे। कथं रोदिषीति प्रष्टवन्तश्च ते, सा प्रत्युवाच हरिणहतकौ मत्सुतौ रात्रौ प्राणदण्डं प्राप्नुतः, मत्पतिः पूर्वमेव मृतः। निर्धना दीना चाहं पुत्राभ्यां विना कथं जीवनं यापयिष्ये। तच्छ्रुत्वा जातदयो रोबिनः प्राह–चिन्तां मा कुरु मातः! तव पुत्रौ न प्राणदण्डभाजौ भवितारौ, तयोः स्थाने चाहमात्मबलिं ददानि। वृद्धा प्रसन्ना सती स्वगृहं प्रत्यागता।

एक दिन प्रातःकाल जब वे घूम रहे थे तब उन्होंने सड़क पर रोती हुई एक वृद्धा को देखा। उन्होंने पूछा—क्यों रो रही हो? वृद्धा ने उत्तर दिया, हरिण को मारने के कारण मेरे लड़कों को फांसी लग रही है। मेरा पति पहले मर चुका है। मैं निर्धन हूं, पुत्रों के बिना अपना जीवन कैसे बिताऊंगी?। यह सुनकर रोबिन को दया आ गई और वह बोला, चिन्ता मत करो, तुम्हारे पुत्रों को फांसी नहीं लगेगी, उनके स्थान पर मैं अपनी बलि दे दूंगा। वृद्धा प्रसन्न होती हुई अपने घर लौट गई।

रोबिनः शीघ्रमेव स्वसहयोगिनः सभामाकारयामास, प्राह च–सर्वे वधस्था-

रोबिन ने शीघ्र ही अपने सहयोगियों को बुलाया और कहा—सभी फांसी घर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नसमीपं गत्वा सन्नद्धा भवत. यदाऽहं बिगुलवादनं करिष्ये तदा सर्वे निर्गत्य प्रहरत । रोबिनो राजमार्गं प्रति प्राचलत् तत्र भिक्षुकमेकं ददर्श । भिक्षुकं विलोक्य रोबिनः प्राह–स्ववस्त्राण्युत्तार्य मह्यं प्रयच्छ, मद्वस्त्राणि च त्वं परिधस्व ताभ्यां वस्त्राणि परिवर्तितानि । नूतनवस्त्राणि धारयित्वा भिक्षुकः प्रसन्नः सञ्जातः । भिक्षुकवेशं धृत्वा रोबिनः प्राचलत् । मार्गे सचिव आगच्छन्नास्ते भिक्षुकः सचिवं निरीक्ष्य भिक्षामयाचत ।

के पास तैय्यार रहो, जब मैं बिगुल बजाऊं तब सभी निकल कर हमला कर देना रोबिन सड़क की ओर चल पड़ा वहां उसने एक भिक्षुक को देखा । भिक्षुक को देखकर रोबिन ने कहा—अपने वस्त्र उतार कर मुझे दो, मेरे वस्त्र तुम पहनो । उन दोनों ने अपने अपने वस्त्र बदल लिये । भिक्षुक नये वस्त्र पहन कर प्रसन्न हो गया । भिक्षुक का वेश धारण करके रोबिन चल पड़ा । रास्ते में सचिव आ रहा था । भिक्षुक ने सचिव को देखकर उससे भिक्षा मांगी ।

अश्वादवतीर्य भिक्षुकं सघृणं विलोक्यायं प्रोवाच–किं वाञ्छसि ? अहं प्रातःकालादेव तं नरमन्वेषयामि यः प्राणदण्डस्य कार्यं सम्पादयेत्, किं त्वं कार्यमेतत्करिष्यसि ?। कथन्न करिष्यामि, भिक्षुकः प्रत्युवाच । सचिवः प्रहृष्टः सन् प्राह, चल मया सह इत्युक्त्वा भिक्षुकं वधस्थानं नीतवान् । वधस्थाने वधार्थमुपनीतौ वृद्धसुतौ, जनसम्मर्दञ्च विलोक्य रोबिनो विस्मयमाप ।

घोड़े से उतर कर, भिक्षुक को घृणा पूर्वक देख कर सचिव ने कहा—क्या चाहते हो ? मैं प्रातःकाल से ही उस आदमी को ढूंढ़ रहा हूं जो फांसी लगाने का कार्य कर सके । क्या तू यह कार्य कर सकता है ? भिक्षुक ने कहा—क्यों नहीं करूंगा सचिव ने प्रसन्न होते हुए कहा—मेरे साथ चल, वह भिक्षुक को फांसी घर की ओर ले गया । रोबिन ने जब फांसी घर में उस वृद्धा के दोनों पुत्रों को और लोगों की भीड़ देखी तो उसे आश्चर्य हुआ ।

सचिवः प्रोवाच –अरे भिक्षुक ! त्वरा विधेहि, समयोऽतिवाह्यते । भिक्षुकः प्रत्युवाच–किं मृत्युदण्डात्प्रागी-

सचिव ने कहा—अरे भिक्षुक ! जल्दी करो, समय बीत रहा है । भिक्षुक ने कहा—क्या मृत्युदण्ड से पहले ईश्वर की

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्चरप्रार्थना न क्रियते, न कोऽप्युपदेशकश्चात्र ? नहि प्रार्थना तु कर्तव्या एव, अहमाकारयाम्युपदेशकम् । भिक्षुको झटिति बिगुलवादनमकरोत् । धनुराददाना सर्वतस्तत्र वनेचरसहयोगिनः प्रससृपुः । भयद्रुतं अत्याचारिणं सचिवं विलोक्य सर्वे जहसुः । रोबिनो वृद्धासुतौ निर्मुक्तबन्धनौ कृत्वा प्रोवाच, यथासुखं स्वगृहं गच्छताम् ।

प्रार्थना नहीं करते हो ? क्या यहां कोई उपदेशक भी नहीं है ? नहीं, प्रार्थना तो करनी ही चाहिये। मैं उपदेशक को बुलाता हूं । भिक्षुक ने शीघ्र ही बिगुल बजाया। धनुष लेकर रोबिन के सभी सहयोगी चारों ओर फैल गये। अत्याचारी उस सचिव को भयभीत देखकर सभी हँसने लगे रोबिन ने वृद्धा के पुत्रों को बन्धनमुक्त करके कहा—सुखपूर्वक अपने घर जाओ।

रोबिनः सचिवमाकृष्य वधस्थानमानयत् प्राह—इदानीं तव वधं विधास्यामि । सचिवः पौनः पुन्येन प्रणमन्प्रोवाच—त्यज मामनाथनाथ ! रोबिनः प्रत्युवाच—यदि तव नृपति र्भविष्ये हरिणवधे प्राणदण्डं न प्रदास्यसि तर्हि त्वामहं निर्मुक्तबन्धनं करोमि, ओमिति व्याहृत्य सचिवस्तस्य पादयोः पपात । रोबिनः स्वजनैः सह पुनः काननं विवेश ।

रोबिन सचिव को खींचकर फांसीघर के पास लेजाकर कहने लगा—अब मैं तुम्हारा वध करूंगा। सचिव ने बार बार प्रणाम करते हुए कहा हे अनाथों के नाथ ! मुझे छोड़ो। रोबिन ने कहा—यदि तेरा राजा भविष्य में हरिणों के मारने पर फांसी की सजा नहीं देगा तो मैं तुझे बन्धनमुक्त करता हूं। सचिव ने कहा—हां ऐसा ही होगा, वह रोबिन के पैरों में गिर पड़ा। रोबिन अपने लोगों के साथ फिर जंगल में चला गया।

जनाश्चात्याचारिणं नृपं सिंहासनादवतारयामासुः अमात्यञ्च । तत्स्थाने च सुयोग्यं, प्रजाहितचिन्तकं नृपं वरयामासुः । रोबिनस्तथैव वन्यजीवनमयापयत् । वनेऽपि न्यायप्रियस्य राज्ञः कीर्तिः प्रसृता । एकदा रोबिनश्चाखेटार्थं निर्गतः, तेन दृष्टं यत्कोऽपि सुन्दरो

लोगों ने अत्याचारी राजा को सिंहासन से उतार दिया और अमात्य को भी। उस स्थान पर सुयोग्य, प्रजा-हितचिन्तक राजा का वरण किया। रोबिन ने उसी तरह अपना जंगली जीवन बिताया। जंगल में भी न्यायप्रिय राजा की कीर्ति फैल गई। एक बार रोबिन शिकार खेलने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युवा अश्वमारुह्य आगच्छति । धनुर्निष्कास्य रोबिनः प्राह—यत्किमपि तव पार्श्वे विद्यते तत्प्रयच्छ, राजा सर्वं द्रव्यजातं निष्कास्य तस्मै प्रायच्छत् । रोबिनो निश्चयमकरोदयं तु नृपतिः । सर्वं धनं प्रत्यावर्त्य रोबिनः क्षमां याचमानः प्राह—भवादृशं नृपं विलोक्य परितुष्टोऽहम् ।

गया उसने देखा कि एक सुन्दर युवक घोड़े पर बैठ कर आ रहा है। धनुष निकाल कर रोबिन ने कहा—जो कुछ तुम्हारे पास है दो, राजा ने सब धन निकाल कर उसे दे दिया। रोबिन ने निश्चय किया कि यह तो राजा है। सारा धन लौटा कर रोबिन ने क्षमा मांगते हुए कहा—आप जैसे राजा को देख कर मैं बहुत प्रसन्न हूं।

इदानीमपि केचन जनाश्चात्याचारिणः सन्ति तेषां नियमनं कृत्वा सुखेन राज्यं प्रकरोतु भवान् । नृपः प्राह—भवन्तो वनवासिनः शूराः, धनुर्विद्याविशारदाः कुशलाश्च । भवतां सहयोगं विना कथं राज्यं सुराज्यं भवितुमर्हति । रोबिनो नृपतिं स्वावासस्थलमानीय विधिपूर्वकं स्वागतं कृतवान्, प्रीतिभोजं दत्वा स्वजाते र्धनुः कौशलं प्रदर्शितवान् ।

इस समय भी कुछ लोग अत्याचारी हैं उनका नियमन करके आप सुखपूर्वक राज्य कीजिये। राजा ने कहा-आप लोग वनवासी हो, शूर हो, धनुषबाण चलाने में कुशल हो। आपके सहयोग के बिना राज्य कैसे सुराज्य हो सकता है। रोबिन राजा को अपने निवास स्थान पर लाया और विधिपूर्वक उसका स्वागत किया, प्रीतिभोज देकर अपनी जाति का धनुष-कौशल दिखाया।

तेषां सत्कारं स्वीकृत्य नृपः प्राह-प्रचलन्तु भवन्तो मन्नगरीम्, स्वयोग्यतानुसारं कार्यञ्च कुरुत, येन राज्यस्य समुन्नतिः स्यात् । रोबिनस्तत्सहयोगिनृपेण सह नगरं प्रविश्य ससुखं स्वजीवनं यापयामासुः ।

उनका सत्कार स्वीकार करके राजा ने कहा—आप लोग मेरे नगर की ओर चलिये, अपनी योग्यता के अनुसार कार्य कीजिये ताकि राज्य की उन्नति हो सके। रोबिन और उसके सहयोगियों ने राजा के साथ नगर में प्रवेश किया और सुखपूर्वक जीवन बिताया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

डाक घर

सावधि जमा में

ब्याज की अब अधिक दरें

यह लोकप्रिय बचत योजना आपको अब अधिक आकर्षित करेगी

डाक घर सावधि जमा (डा० घ० सा० ज० के नाम से ज्ञात) में अब पहले से अधिक रिटर्न।

2 मार्च, 1981 से लागू संशोधित दरों पर नजर डालें और देखें कि क्या वे अतुलनीय नहीं?

1 वर्षीय – 8.5%
2 वर्षीय – 9.5%
3 वर्षीय – 10.5%

ब्याज छमाही आधार पर जोड़कर वार्षिक रूप से देय।

सर्वोत्तम योजना में अपना धन लगाएं।

अधिक जानकारी के लिए कृपया सम्पर्क करें:

- कोई भी डाकघर
- अधिकृत एजेंट
- जिला बचत अधिकारी द्वारा कलैक्टोरेट
- लघु बचत निदेशालय (राज्य सरकार)
- रा० ब० सं० का क्षेत्रीय कार्यालय (भारत सरकार)

या लिखें :-

राष्ट्रीय बचत संगठन

12, सेमिनेरी हिल्स, नागपुर-440006

डीएवीपी 81/4

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

113529
Digitized by Arya Samaj Foundation Chennai and eGangotri

-धिङ् मेघ !

डा. शिवदत्त शर्मा चतुर्वेदी, वाराणसी

धिक् क्रियसे रे मेघ, नितान्तम्
एषु दिनेषु विलोकय रे त्वम्
मारकोऽसि जनताया नित्यम्
विष्णुपदं तव पापैः क्रान्तम्
धिक् क्रियसे रे मेघ, नितान्तम्

भग्नस्तव मर्यादाबन्धः
धूमयोनिरसि नितरामन्धः
स्थानं सर्वं क्लेशक्लान्तम्
धिक् क्रियसे रे मेघ, नितान्तम्

अद्यावधिरसि कविभिरीडितः
मन्ये तस्मात् गर्वपीडितः
तवापि महिमा मतपत्रान्तम्
धिक् क्रियसे रे मेघ, नितान्तम्

अयि भोः, कपटवेशसन्यासिन्
पीडितार्तजनतापरिहासिन्
खण्डं खण्डं भवसि सहान्तम्
धिक् क्रियसे रे मेघ, नितान्तम्

Made out of the Finest Materials

MANGALORE GANESH BEEDIES

Smokers cannot afford to miss them

DAILY SALES EXCEED 8 CRORE BEEDIES

Head Office :

MANGALORE GANESH BEEDI WORKS

VINOBA ROAD : : MYSORE-570005

Telephone : 20241 Telegrams : 'AROMA'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाधीनता के 34 वर्ष

उपलब्धियां और भविष्य

□ हमने आधुनिक और आत्मनिर्भर अर्थ व्यवस्था का आधार तैयार किया है।

□ हमने खाद्यान्न में स्वावलम्बन प्राप्त किया, अपने औद्योगिक क्षेत्र का विस्तार किया और विज्ञान तथा प्रौद्योगिकी में महत्वपूर्ण प्रगति की।

1985 तक
हमारा उद्देश्य है कि निपट गरीबों के छठे भाग को गरीबी के इस स्तर से ऊपर उठाया जाए और अभाव ग्रस्त गांवों में पीने का पानी पहुँचाया जाए।
और 2000 ई० तक
कुष्ठ रोग निवारण तथा जन्म दर 36 से घटाकर 21 प्रति हजार की जाय।

'वह दिन आएगा, दृढ़ विश्वास रखें।'
(रवीन्द्र नाथ ठाकुर)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरुणा उद्योग

माइन ग्रानर्स, रेंजिंग कोन्ट्रेक्टर्स ट्रांसपोर्ट्स

वैंकर्स एण्ड कमीशन एजेन्ट्स

दूरभाष : ७३९२६

ग्राम अरुण उद्योग

हैड ग्राफिस :

श्री राम भवन

किशनपोल बाजार, जयपुर-१

ब्रांच ग्राफिस :

गांधी मार्ग, भद्रक (उडीसा)

स्टेशन मार्ग के सामने, जे० के० रोड़

(उडीसा)

वकिंग एट :

बाउला क्रोमाइट माइन्स एट : धानपुर जैपुर, जिला केउनझर (उडीसा)

केथपाल क्रोमाइट लाइन्स एट: बिरसल जिला धेनकानाल (उडीसा)

भारती के कतिपय प्रकाशन

१. ग्रम्बिकासूक्तम् संस्कृत हिन्दी टीका सहित	मूल्य २.५०
२. गल्पकल्पलतिका (बालोपयोगिनी)	,, १.५०
३. गोलनवाङ्कुरः (खगोलवर्णनम्)	,, २.००
४. ग्रायुर्वेदविशेषांकः	,, ५.००
५. ग्रारोग्याङ्कः	,, ५.००
६. बालोपदेशमणिमाला (हिन्दी अनुवाद सहित)	,, ३.००
७. सूक्तिसुधा (हिन्दी अनुवाद सहित)	,, २.००
८. मातृस्तवनं (हिन्दीपद्यानुवाद सहित)	,, २.००
९. ग्राध्यात्मिकशिवायनम् (हिन्दीगद्यानुवादसहित)	,, ५.००
१०. श्रीगुरुजीस्मृत्यङ्कः	५.००
११. दुर्गासप्तशतीसर्वस्वम् (हिन्दीपद्यानुवाद सहित)	,, ५.००
१२. भारतभक्तिस्तोत्रम् (हिन्दीगद्यानुवाद सहित)	,, १०.००
१३. लघुकथासंग्रह (हिन्दीगद्यानुवाद सहित)	,, ५.००
१४. शिवराज्योदयम् प्रथमखण्डः (सारसंक्षेपसहितः)	,, २०.००

व्यवस्थापक

भारती-संस्कृत-मासिक, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
113528

सूक्ति-सुधा

विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता

डॉक्टर श्रीगङ्गाधरभट्टः
सह-आचार्यः, संस्कृतविभागे, राजस्थानविश्वविद्यालयः, जयपुरम्

(१)

एकोऽहमसहायोऽहं कृशोऽहमपरिच्छदः ।
स्वप्नेऽप्येवंविधा चिन्ता मृगेन्द्रस्य न जायते ।।

(सुभाषितरत्न० पृ० २४० श्लो० २)

बलवान् व्यक्ति को किसी की चिन्ता नहीं रहती । उसे कोई भी दुश्चिन्ता आक्रान्त नहीं करती उसमें सामर्थ्य होता है अतः सबको अपनें अनुकूल बनानें में सक्षम है । मृगराज

अभिलाषोऽस्माकम्

श्रीरामस्वरूपशास्त्री
सम्पादकः—बालसंस्कृतम्-बम्बई 86

मानं रक्षेम देशस्य समवेताः सदा वयम्
मनसा कर्मणा वाचा कर्तव्येषु परायणाः ।।१।।
न श्रान्ता न हतोत्साहा न भ्रान्ता न च भीरवः
न भवेम निरुद्योगा हता विघ्नशतैरपि ।।२।।
शिवाजी इव योद्धारः प्रताप इव मानिनः
गाङ्गेय इव आदर्शा भवेम ब्रह्मचारिणः ।।३।।
सर्वविद्यासु विद्वांसः कलासु कुशला वयम्
प्रारब्धेषु च कार्येषु भवेम सफलाः सदा ।।४।।
ज्ञानविज्ञानशिक्षास्ववेषभाषाविभूषितम्
उदग्रं सर्वमित्रञ्च भारतं कामयामहे ।।५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd. No. 1379 51
R. J. No. 2617
Licence No. PP. 9.
Licence to Post
Without
Prepayment

भारती

यह कभी नहीं सोचता कि मैं अकेला हूँ, मेरा कोई सहायक नहीं अथवा मैं कमजोर या दुर्बल हूँ और मेरा कोई परिवार भी नहीं। उसे स्वप्न में भी ऐसी चिन्ताएँ नहीं सताती। अपने पराक्रम के बल पर वह अकेला ही समर्थ है।

(२)

जीर्णोऽपि क्रमहीनोऽपि कृशोऽपि यदि केसरी।
तथापि यूथनाथस्य शङ्कातङ्काय कल्पते ॥
(सुभाषित रत्न०-पृ० २४० श्लोक० ६)

जीर्णशीर्ण अथवा वृद्ध होने पर भी क्रमहीन अर्थात् चलने फिरने में असमर्थ होने पर भी तथा दुर्बल होने पर भी सिंह गजसमूह के स्वामी को शंकायुक्त एवं आतङ्कित करने में समर्थ होता है। अर्थात् दुर्बल होने पर भी तेजस्वी अपने शत्रु को शङ्कित एवं आशङ्कित कर सकता है।

(३)

नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः।
विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता ॥
(ग० म० पु० अ० १ ५ श्लो० १५)

वनचारी पशुगण सिंह का कभी राज्याभिषेक संस्कार नहीं करते। राजा बनाने के लिए उसका निर्वाचन आदि कुछ भी नहीं होता किन्तु पराक्रम से राज्य पर अधिकार करने वाला सिंह स्वयं ही मृगराज कहा जाता है। पराक्रमी स्वयं जो चाहे वही करने में समर्थ होता है। उसे किसी अन्य की सहायता की अपेक्षा नहीं रहती।

प्रकाशकः—संस्कृत प्रचार परिषद् राजस्थान.
पता—भारती भवन, बी. १५ न्यू कालोनी, जयपुर—३०२०१। दूरभाष—७५४९६
राधेश्याम द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित। दूरभाष—६१७६७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Stock Verification-2024

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2009

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar